त्रिधा पुनः। शतधा चैकधा चैव तथैव च सहस्रधा। कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये। चकार ब्रह्मसूत्राणि तेषां सूत्रत्वमञ्जसा। अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः। निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः। यथा व्यासत्वमेकस्य कृष्णस्यान्यविशेषणात्। सविशेषणसूत्राणि ह्यपराणि विदो विदुः। मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः। इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः। सूत्रेषु येषु सर्वेषु निर्णयः समुदीरितः। शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णयः। एवं विधानि सूत्राणि कृत्वा व्यासो महायशाः। ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु। ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तमः'—इत्यादि।

अथ शब्दो मङ्गलार्थोऽधिकारानन्तर्यार्थश्च। अतःशब्दो हेत्वर्थः। उक्तञ्च गारुडे;

"अथातः शब्दपूर्वाणि सूत्राणि निखिलान्यपि। प्रारभ्यन्ते नियत्यैव तत् किमत्र नियामकम्। कश्चार्थश्च तयोर्विद्वन्! कथमुत्तमता तयोः। एतदाख्याहि मे ब्रह्मन्! यथा ज्ञास्यामि तत्त्वतः। एवमुक्तो नारदेन ब्रह्मा प्रोवाच सत्तमः। आनन्तर्येऽधिकारेच मङ्गलार्थे तथैव च। अथ शब्दस्त्वतः शब्दो हेत्वर्थे समुदीरितः। परस्य ब्रह्मणो विष्णोः प्रसादादिति वा भवेत्। स हि सर्वमनोवृत्तिप्रेरकः समुदीरितः। सिद्धचौ परमाद्विष्णोः प्रथम द्वौ विनिःसृतौ। ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ

क्रमात्। तद्वत्तुल्यं वदंश्चापि तृतीयोऽत उदाहृतः। अकारः सर्ववागात्मा परब्रह्माभिधायकः। तथा प्राधान्यतोऽर्थो व्याप्तिस्थितिविधायकः। अतश्च पूर्वमुच्चार्य्यौ सर्व एते सतां मताः। अथातः शब्दयोरेवं वीर्य्यमाम्नाय तत्त्वतः। सूत्रेषु तु महाप्राज्ञास्तावेवादौ प्रयुञ्जते”—इति। अधिकारार्थश्चोक्तो भागवततन्त्रे—

मन्दमध्योत्तमत्वेन त्रिविधा ह्यधिकारिणः। तत्र मन्दा मनुष्येषु ये उत्तमगुणा मताः। मध्यमास्तृषिगन्धर्वा देवास्तत्रोत्तमा मताः। इति जातिकृतो भेदस्तथाऽन्यो गुणपूर्वकः। भक्तिमान् परमे विष्णौ यस्त्वध्ययनवान्नरः। अधमः शमसंयुक्तो मध्यमस्तसमुदाहृतः। आब्रह्मस्तम्भपर्य्यन्तमसारञ्चाप्यनित्यकम्। विज्ञाय जातवैराग्यो विष्णुपादैकसंश्रयः। स उत्तमोऽधिकारी स्यात् संन्यस्ताखिलकर्म्मवान्।”—इति।

अध्ययनमाचरतो नाविशेषादिति चोपरि—‘शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत्’ ‘परीक्ष्य लोकान् कर्म्मचितान् ब्राह्मणो निर्वेदमायात्’— ‘नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्’— ‘समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्’—‘यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम्’—‘यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्था प्रकाशन्ते महात्मनः।’—इत्यादिश्रुतिभ्यश्च। व्याससंहितायाञ्च—

“अन्त्यजा अपि ये भक्ता नामज्ञानाधिकारिणः। स्त्रीशूद्रद्विजबन्धूनां तन्त्रज्ञानेऽधिकारिता। एकदेशे

परोक्षे तु न तु अन्यपुरःसरे। त्रैवर्णिकानां वेदोक्तं सम्यग्भक्तिमतां हरौ। आनुरूप्युत्तमस्त्रीणामधिकारस्तु वैदिके। यथोर्वशी यमी चैव शच्याद्याश्च तथापरा"—इति। यतो नारायणप्रसादमृते न मोक्षः—न च ज्ञानं विनात्यर्थप्रसादः—अतो ब्रह्मजिज्ञासा कर्त्तव्या।

'यत्रानवसरोऽन्यत्र पदं तत्र प्रतिष्ठितम्। वाक्यञ्चेति सतां नीतिः सावकाशे न तद्भवेत्' इति बृहत्संहितायाम्।

'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय'—'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः'—'यमेवैष वृणुते तेन लभ्यः' 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादि श्रुतिस्मृतिभ्यः।

'कर्मणा त्वधमः प्रोक्तः प्रसादः श्रवणादिभिः। मध्यमो ज्ञानसम्पत्त्या प्रसादस्तूत्तमोत्तमः। प्रसादात्त्वधमाद्विष्णोः स्वर्गलोकः प्रकीर्त्तितः। मध्यमाज्जनलोकादिरुत्तमस्त्वेव मुक्तिदः। श्रवणं मननञ्चैव ध्यानं भक्तिस्तथैव च। साधनं ज्ञानसम्पत्तौ प्रधानं नान्यदिष्यते। न चैतानि विना कश्चिज्ज्ञानमाप कुतश्चन' इति नारदीये। 'ब्रह्म' शब्दश्च विष्णावेव—

'यमन्तःसमुद्रे कवयो वदन्ति तदक्षरे परमे प्रजाः। यतः प्रसूता जगतः प्रसूती प्रसूतो येन सर्वान् विससर्ज भूम्याम्' इति चोक्ता,—'तदेव ओं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्' इति श्रुतिः। तत्रो विष्णुरितिवचनाद्विष्णुरेव हि तत्रोच्यते, न चेतरस्य शब्दात् प्राप्तिः।

'नामानि विश्वानि न सन्ति लोके यदाविरासीद-

न्तस्य सर्वम्। नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति' इति भाल्लवेयश्रुतिः।

"यो देवानां नामधा एक एव तं संप्रश्नं भुवनानि यन्ति" इत्येवं शब्दानान्येषां सर्वनामता। 'अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुरिति' विष्णोर्हि लिङ्गम्। न च प्रसिद्धार्थं विनान्योऽर्थो युज्यते अजस्य नाभाविति।

'यस्या नाभेरभूत् श्रुतेः पुष्करं लोकसारम्। तस्मै नमोव्यस्तसमस्तविश्वविभूतये जगद्धात्रे विष्णवे लोककर्त्रे' इति स्कान्दे।

'परो दिवा पर एना पृथिव्येति' समाख्या श्रुतौ— 'यं कामयेतं तमुग्रं कृणोमि'—'तं ब्रह्माणं तमृषिं तं सुमेधा' मित्युक्त्वा 'मम योनिरप्स्वन्तः समुद्रः'— इत्याह। उग्रो रुद्रः समुद्रान्तर्नारायणः प्रसिद्धत्वात् सूचितत्वाच्चास्यार्थस्य—नचाविरोधे प्रसिद्धः परित्यज्यते—तत्त्वन्यायेन च श्रुतय एतमेव वदन्ति।'

'वेदे रामायणे चैव पुराणे भारते तथा। आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते'—इति श्रीहरिवंशेषु।

नचेतरग्रन्थैर्विरोधः—'एष मोहं सृजाम्याशु यो जनान् मोहयिष्यति। त्वञ्च रुद्र महाबाहो। मोहशास्त्राणि कारय। अतथ्यानि वितथ्यानि दर्शयस्व महाभुज!। प्रकाशं कुरु चात्मानमप्रकाशञ्च मां कुरु—इति वाराह वचनात्।

जन्माद्यस्य यतः इति ॥ २ ॥

शैवे च स्कान्दे। 'अपश्चादपकृष्टत्वं ब्रह्मेशानादयः सुराः। तदैवाच्युत यान्त्येव यदैव त्वं पराङ्मुखः' इति। ब्राह्मे च ब्रह्मवैवर्त्ते—'नाहं न च शिवोऽन्ये च तच्छक्त्ये-कांशभागिनः। बालः क्रीडनकैर्यद्वत् क्रीड़तेऽस्माभिरच्युत!' —इति। न च वैष्णवेषु तथा तच्चैष मोहमित्युक्तम् ॥ १ ॥

ब्रह्मणो लक्षणमाह—जन्मेति। सृष्टिस्थिति संहार-नियमनज्ञानबन्धमोक्षाः यतः। 'उत्पत्तिस्थिति-संहारा नियतिर्ज्ञानमावृतिः। बन्धमोक्षौ च पुरुषाद्यस्मात् स हरिरेकराट्" इति स्कान्दे। 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति' 'य उस्त्रिधातु पृथिवीमुत द्यामेको दधार भुवनानि विश्वा चतुर्भिः साकं नवतिञ्च नामभिश्चक्रं न वृत्तं व्यतीरवीविवत्परो मात्रया तन्वाहधाना न ते महित्वमन्वश्नुवन्ति, न ते विष्णो जायमानो न जातो देवमहिम्नः परमं तमाय।'—'यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वेत्यादि च।' अनु-मानतोऽन्यो न कल्पनीयाः।

'नावेदविन्मनुते तं बृहन्तं' 'सर्वानुभूतमात्मानं सम्परा ये औपनिषदं पुरुषम्'—इत्यादिश्रुतिभ्यः, न चानुमानस्य नियतप्रामाण्यम्।

'श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित्। निश्चयात् साधयेदर्थं प्रमाणान्तरमेव च। श्रुतिस्मृतिसहायं यत्

शास्त्रयोनित्वात् इति ॥ ३ ॥

तत्तु समन्वयात् ॥ ४ ॥

प्रमाणान्तरमुत्तमम् । प्रमाणपदवीं गच्छन्नात्र कार्या विचारणा । पूर्वोत्तराविरोधेन कोऽत्रार्थोऽभिमतो भवेत् । इत्याद्यमूहनं तर्कः शुष्कतर्कन्तु वर्जयेत्' इत्यादि कौर्मे । अशक्यत्वाच्चानुमानानां सर्वत्र अप्रामाण्यम्—

'सर्वत्र शक्यते कर्त्तुमागमन्तु विनानुमा । तस्मान्न सा शक्तिमती विनागमसुदीचितुम्' इति वाराहे । 'रेतो मातुश्च कलिका घृतधूमादिवासनम । जातिस्मृतिरयस्कान्त' सूर्यकान्तोऽम्बुभुक् च्यणम । प्रेत्य भूताप्ययश्चैव देवताभ्युपयाचनम | मृते कर्मनिवृत्तिश्च प्रमाणमितिनिश्चयः' इति मोक्षधर्मवचनाच्च नास्तिक्यवादो युज्यते—दर्शनाच्च तप आदिफलस्य ॥ २ ॥

'ऋग्यजुःसामाथर्वाश्च भारतं पञ्चरात्रकम् । मूलरामायणञ्चैव शास्त्रमित्यभिधीयते । यच्चानुकूलमेतस्य तच्च शास्त्रम् प्रकीर्त्तितम् । अतोऽन्यग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तत्' इति स्कान्दे । 'सांख्यं योगः पाशुपतं वेदारण्यकमेव च' इत्यारभ्य वेदपञ्चरात्रयोरैक्याभिप्रायेण पञ्चरात्रस्यैव प्रामाण्यमुक्तमितरेषां भिन्नमतत्वं प्रदर्श्य मोक्षधर्मेष्वपि, शास्त्रं योनिः प्रमाणमस्येति-'शास्त्रयोनिः' अन्नानां प्रतीयमानमपि नेतरेषां शास्त्रयोनित्वम् । कुतः ? । ३ ॥

अन्वय उपपत्त्यादिलिङ्गम् उक्तञ्च बृहत्संहितायाम्—

ईक्षतेर्नाशब्दम् ॥ ५ ॥

'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये' इति । उपक्रमादितात्पर्यलिङ्गैः सम्यक् निरूप्यमाणे तदेव शास्त्रगम्यम् ।

'मां विधत्तेऽभिधत्ते मां विकल्प्योऽपोह्यते ह्यहम् । इत्यस्या हृदयं साक्षान्नान्यो मद्वेद कश्चन' इति भागवते ॥४॥

ननु 'यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह । अशब्दमस्पर्शमरूपमव्ययं तथा रसं नित्यमगन्धवच्च यत्'—'अवचनेनैव प्रोवाच'—'यद्वाचानभ्युदितं येन वागभ्युद्यते 'यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्' इत्यादिभिः न तच्छब्दगोचरम् ? नेत्याह । 'स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते'—'आत्मन्येवात्मनात्मानं पश्येत्'—'विज्ञाय प्रज्ञां कुर्वीत' इत्यादिवचनैरीक्षणीयत्वाद्वाच्यमेव ।

'औपनिषदत्वाच्चावचनैनिश्चयम्'—'सर्वे वेदा यत् पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्' इत्यादिश्रुतिस्मृतिभ्यश्च ।

अवाच्यत्वादिकं त्वप्रसिद्धत्वात्-'न तदीदृगिति ज्ञेयं न वाच्यं न च तर्क्यते । पश्यन्तोऽपि न पश्यन्ति मेरोरूपं विपश्चित' इतिवत् । अप्रसिद्धेरवाच्यं तद्वाच्यं सर्वागमोक्तितः । अतर्क्यंतर्क्यमज्ञेयं ज्ञेयमेव परं स्मृतम्' इति गारुडे । न त्वाशब्दत्वमिति प्रसिद्धम् ॥ ५ ॥

गौणश्चेन्नात्मशब्दात् ॥ ६ ॥
तन्निष्ठस्य मोक्षोपदेशात् ॥७॥

न च गौण आत्मा दृश्यो, वाच्यश्च, न निर्गुण इति युक्तः— आत्मशब्दात्। 'यो गुणैः सर्वतो हीनो यश्च दोषविवर्जितः। हेयोपादेयरहितः स आत्मेत्यभिधीयते। एतदन्यस्वभावो यः स नात्मेति सतां मतम्। अनात्मन्यात्मशब्दस्तु सोपचारः प्रयुज्यते' इति वामने।

द्वे वाव ब्रह्मणो रूपे आत्मा चैवानात्मा च, तत्र य आत्मा सः नित्यः शुद्धः केवलो निर्गुणश्चाथ च योऽन्योऽयम् स ऽनात्मेति तवल्कार ब्राह्मणम्। न च मुख्ये सत्यमुख्यं युज्यते॥ ६॥

न हि गौणात्मनिष्ठस्य मोक्षः, यस्यानुवित्त प्रतिबुद्ध आत्मा अस्मिन् सन्देहे गहने प्रविष्टः स विश्वकृत् स हि सर्वस्य कर्त्ता सोऽस्य लोकः स उ लोक एवेत्यात्मनिष्ठस्य मोक्ष उपदिश्यते—'अयमात्मा ब्रह्म'।

'ब्रह्मेति परमात्मेति भगवानिति शब्द्यते। दत्तं दुर्वाससं सोममात्मेशब्रह्मसम्भवान्। चेतनस्तु द्विधा प्रोक्तो जीव आत्मेति च प्रभो। जीवाः ब्रह्मादयः प्रोक्ता आत्मैकस्तु जनार्दनः। इतरेष्वात्मशब्दस्तु सोपचारः प्रयुज्यते। तस्मात्मनो निर्गुणस्य ज्ञानान्मोक्ष उदाहृतः। सगुणास्त्वपरे प्रोक्तास्तज्ज्ञानान्नैव मुच्यते। परो हि पुरुषो विष्णुस्तस्मान्मोक्षस्ततः स्मृतः'—इति पाद्मे॥ ७॥

हेयत्वावचनाच्च ॥ ८ ॥

स्वाप्ययात् ॥ ९ ॥

गतिसामान्यात् ॥ १० ॥

श्रुतत्वाच्च ॥ ११ ॥

आनन्दमयोऽभ्यासात् ॥ १२ ॥

'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथाऽमृतस्यैष सेतुः' इत्यन्येषां हेयत्ववचनाच्च गौण आत्मा ॥ ८ ॥

'पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते'—'स आत्मना आत्मानमुद्धृत्यान्यस्य विलापयत्यथ आत्मैव भवति' स देवो बहुधा भूत्वा निर्गुणः पुरुषोत्तमः। एकीभूय पुनः शेते निर्दोषो हरिरादिकृत्'—इति स्वस्य स्वस्मिन्नप्ययवचनात्। नहि गौणस्यात्मनो निर्दोषस्य लयः। न च कस्यचिच्छाखास्वन्यथोच्यते ॥९॥

'सर्वे वेदा युक्तयः सप्रमाणा ब्राह्मं ज्ञानं परमं त्वेकमेव। प्रकाशयन्ते न विरोधः कुतश्चिद्वेदेषु सर्वेषु तथेतिहास इति पैङ्गिश्रुतेर्गतेर्ज्ञानस्य साम्यमेव ॥ १० ॥

'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्चेति। न ह्यशब्दं श्रूयते नचाप्रसिद्धं कल्पम् सर्वशब्दावाच्यस्य लक्षणायुक्तेः ॥ ११ ॥

'तमेव समन्वयं प्रकटयत्यानन्दमयोऽभ्यासादित्यादिना

विकारशब्दान्नेति चेन्न प्राचुर्य्यात् ॥ १३ ॥

समस्तेनाध्यायेन प्रायेनाभिप्रायेणान्यत्र प्रसिद्धानां शब्दानां परमात्मनि समन्वय. प्रदर्शितेऽस्मिन् पादे, नान्यथा तद्दृष्टेः। ब्रह्मजिज्ञासा कर्त्तव्येत्युक्त तत्र 'ब्रह्मपुच्छं प्रतिष्ठेत्यानन्दमयावयवरूप प्रतीयते न ह्यवयविन विनावयवमात्रस्य ज्ञेयतेत्यत आह—आनन्देति। आनन्दमयो ब्रह्मादिप्रकृतिर्विष्णुर्वा, ब्रह्मशब्दाद्धिरण्यगर्भस्य प्राप्तिः, शतानन्दनाम्ना च प्रसिद्धत्वाच्च रुद्रस्य। एवमन्येषामपि। 'मम योनिर्महद् ब्रह्मे'ति ब्रह्मशब्दाद्बहुभावाच्च प्रकृते ब्रह्म क्षत्त्राऽतिजीवकमलासनशब्दराशिष्विति ब्रह्मशब्दादेव सर्वजीवाना अन्नमयत्वादेश तथापि न ते आनन्दमय शब्देनोच्यन्ते, किन्तु विष्णुरेव 'तदेव ब्रह्म परमं कवीनाम्' एतमेव ब्रह्मे त्याचक्षते—

ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते। असम्पूर्णाः परे यस्मादुपचारेण वा भवेत्। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते। वासुदेवात्मकं ब्रह्म मूलमन्त्रेण या यतिः।,—इत्यादिषु। तस्मिन्नेव प्रसिद्धब्रह्मशब्दाभ्यासात् ॥ १२ ॥

विकारात्मकत्वात्तदभिमानित्वाच्च युज्यते प्रकृत्यादीनां मयट् शब्द न तु परमात्मन —इति माभूत् प्रचुरानन्दत्वाद्यानन्दमयः न तु तद्विकारत्वात् अन्नादीनाञ्च प्राचुर्य्यमेव मयतेऽस्ति चेति व्याख्यानात् तत्प्राचुर्य्यञ्च युज्यते, उपक्रमे

तद्धेतुव्यपदेशाच्च ॥१४॥
मान्त्रवर्णिकमेव च गीयते ॥१५॥

व्यत्वमेवायत्वं स वा एष इत्यस्य प्रारभ्य येऽन्नं ब्रह्मो-पासते इत्यादि ब्रह्मशब्दात् बहुरूपत्वाच्च न विकारत्वम-विरोधश्च न च पृथक कल्पना युक्ता स्वरूपश्च युज्यते, प्रचु-रप्रकाशो रविरितिवत ॥ १३ ॥

'को ह्येवान्यात् कः प्राण्यादेष आकाश आनन्दो न स्यात् इति ॥ १४ ॥

ब्रह्म विदाप्नोति परमिति सूचयित्वा 'सत्यं ज्ञानम-नन्तं ब्रह्मेति मन्त्रवर्णे लचितमेव ब्रह्म शब्दानुसन्धाना-द्गीयते।' न चावयवत्व-विरोधः 'स शिरः स दक्षिणः पक्षः स उत्तरः पक्षः स आत्मा स पुच्छमिति तस्यैवावयवत्वो-क्तेश्चतुर्वेदशिखायाम्।

'शिरा नारायण. पक्षो दक्षिणः सव्य एव च। प्रद्यु म्न-श्चानिरुद्धश्च सन्दोहो वासुदेवकः। नारायणोऽथ सन्दोहो वासुदेवः शिरोऽपि वा। पुच्छं सङ्कर्षणः प्रोक्त एक एव तु पञ्चधा। अङ्गाङ्गित्वेन भगवान् क्रीडते पुरुषोत्तमः। ऐश्वर्यान्न विरोधश्च चिन्त्यस्तस्मिन् जनार्दने। अतर्क्ये कुत हि स्तर्क स्त्वप्रमेये कुतः प्रमा" इति ब्रह्म संहिता-याम्।

'रसो वै सः रसः रसं ह्येवायं लब्ध्वानन्दो भवति' इति रस शब्देन विशेषणात्तत् सारभूत चिन्मात्रमेवोच्यते। इदमिति च दृश्यमानसन्निहितत्वात्। अनन्योऽप्यन्य

नेतरोऽनुपपत्तेः ॥ १६ ॥
भेदव्यपदेशाच्च ॥ १७ ॥

शब्देन तथैको बहुरूपवान्। प्रोच्यते भगवान् विष्णुरैश्वर्यात् पुरुषोत्तम' इति ब्रह्माण्डे ॥ १५ ॥

न चोक्तप्रासा विरिञ्चादिरुच्यते। न ह्यन्यज्ज्ञानान्मोक्ष उपपद्यते। 'तमेव विद्वानमृत इह भवति नान्यः पन्था विद्यते अयनाय' इति ह्युक्तम् ॥ १६ ॥

'ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः' 'अदृश्येऽनात्म्येऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयंगतो भवति स यथायं पुरुषः', इत्यादिना भेदेन व्यपदेशात्। न च 'तत् त्वमसि'-'अहं ब्रह्मास्मि' इत्यादिश्रुतिविरोधः, 'नामानि सर्वाणि यमाविशन्तीति तच्छब्दवाच्योक्तेः। 'इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भवाः। असर्वः सर्व इत्यपि विद्यात्मनि भिदाबोधो भेददृष्टाभिमानेन निःसङ्गेनापि कर्मणा। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वात्मैव स्वज्ञानात्मैव प्रत्यक्पराङ्विवेक ईयते बहुधेयते स पुरुषः स ईश्वरः स ब्रह्म सर्वान्तर्यामिवो विष्णुः सर्वनाम्नाभिधीयते।

'एषोऽहं' त्वमसो चेति न तु सर्वस्वरूपतः। नैतदिच्छन्ति पुरुषमेकं कुरु कुलोद्वह। इत्यादेश्च। उक्ता च प्राप्तिः ब्रह्मैव सन्नित्यपि जीव एव, तद्ब्रह्मशब्दः उपपद्यते च विरोधे,

कामाच्च नानुमानापेक्षा ॥ १८ ॥
अस्मिन्नस्य च तद्योगं शास्ति ॥१९॥
अन्तस्तद्धर्मोपदेशात् ॥ २० ॥

प्रमादात्मकत्वाद्बन्धनस्य विमुक्तत्वं च युज्यते 'मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः' इति भागवते ॥ १७ ॥

न तत्राप्यनुमानविरोधः यथाकामं ह्यनुमातुं शक्यते अतो न तत्त्वे पृथगनुमानमपेक्षते। उक्तञ्च स्कान्दे—'यथा कामानुमा यस्मात्तस्मात् सानपगाश्रुतेः। पूर्वापराविरोधाय चेष्यते नान्यथा क्वचित्' इति 'नैषा तर्केण मतिरापनेयेति' च ॥ १८ ॥

अस्य जीवस्य मुक्तिसमुच्चये च शब्दः। 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता। अनिलयनेऽभयं प्रतिष्ठां विन्दते एतमानन्दमयमात्मानमुपसंक्रामति' इत्यादि ॥ १९ ॥

'अदृश्येऽनात्मनीत्युक्तं तच्चादृश्यत्वमन्तःप्रविष्टं कर्तारमेतमन्तश्चन्द्रमसि मनसा चरन्तं सहैव न विजानन्ति देवा इत्यन्तःस्थस्य कस्यचिदुच्यते। स चेन्द्रो राजा सम युजस्तीत्यादिभिरन्यः प्रतीयते, तस्मात् स एवानन्दमय इति न मन्तव्यम्। अन्तःश्रूयमाणो विष्णुरेव, 'अन्तःसमुद्रे मनसा चरन्तं ब्रह्मान्वविन्दद् दश होतारमन्तःसमुद्रेऽन्तः कवयो विचक्षते। मरीचीनां पदमिच्छन्ति वेधसः। यस्याण्डकाय शुभमाहुः' इत्यादितद्धर्मोपदेशात्। स हि क्षीरसमुद्रशायी, तस्य च वीर्यमण्डकोशः 'सोऽभिध्याय



भेदव्यपदेशाच्चान्यः ॥ २१ ॥

आकाशस्तल्लिङ्गात् ॥ २२ ॥

शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः। अप एव ससर्ज्जादौ तासु वीजमवासृजत्। तदण्डमभवद्धैमं सहस्रांशु समप्रभम्। यस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः। आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः।' इति व्यासस्मृतिः। 'अहं तमेनो रश्मोन् नारायणं पुरुषं जातमग्रतः। पुरुषात् प्रकृतिर्जगदण्डम्' इति चतुर्वेदशिखायाम् ॥ २० ॥

'इन्द्रस्यात्मा निहितः पञ्च होता वायोरात्मानं कवयो निचिक्युः। अन्तरादित्येन मनसा चरन्त देवानां हृदयं ब्रह्मान्वविन्दत्' इत्यादिभेदव्यपदेशात् ॥ २१ ॥

'को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्' इत्याकाशस्यानन्दमयत्वे हेतुरुक्तः, न तु विष्णोरिति न मन्तव्यम्। यतः 'अस्य लोकस्य का गतिरित्याकाश इति होवाचेत्यत्र भूताकाशस्य प्राप्तिः, न चासौ युज्यते, 'किन्तु विष्णुरेव, स एष परोवरीयानुद्गीथः स एषोऽनन्त' इत्यादि तल्लिङ्गात्। 'विष्णोर्नु कं वीर्य्याणि प्रोवाच यः पार्थिवानि निर्ममे रजांसि परो मात्रया तन्वा वृधानेत्यादिना तस्यैव हि तल्लिङ्गम्। अनन्तो भगवान् ब्रह्मा आनन्देत्यादिभिः पदैः प्रोच्यते विष्णुरेवैकः परेषामुपचारतः' इति ब्राह्मे। 'नामानि सर्वाणि यमाविशन्तीति' चोक्तं बहुधैव, 'स

अत एव प्राणः ॥ २३ ॥

ज्योतिश्चरणाभिधानात् २४ ॥ ॥

छन्दोभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथाहि दर्शनम् ॥ २५ ॥

परमः स ईश्वरः स ब्रह्म सर्वान्तर्यामिको विष्णुः सर्वनाम्नाऽभिधीयते ॥ २१ ॥

'तद्वै त्वं प्राणोऽभवः महान् भोगः प्रजापतेः भुजः करिष्यमाणः यद्देवान् प्राणयो न वेति महाभोगशब्देन परमानन्दत्वं प्राणस्योक्तं, स च प्राणः प्रसिद्धो वायुरित्यापतति। न चैवं यतो विष्णुरेव प्राणः अत एव 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ अहो रात्रे पार्श्वे इत्यादि तल्लिङ्गादेव ॥२२॥

'यो वेद निहितं गुहायाम्' इत्युक्तं तच्च गुहानिहितं वि मे कर्णौ पतत वि चक्षुर्वी इदं ज्योतिर्हृदय आहितं यत वि मे मनश्चरति दूर आधीः किंस्विद्वक्ष्यामि किमुनूमनिष्य इति ज्योतिरुक्तं तज्ज्योतिरग्निरुक्तत्वात् प्रसिद्धाग्निरेवेति प्राप्तम्, आह—विष्णुरेव ज्योतिः कर्णादीनां विवरणाभिधानात् स हि परो मायया तन्वा वृधानेत्यादिना कर्णादिविदूरः ॥ २४ ॥

अथ 'यदतः परो दिवो ज्योतिर्दीप्यत इत्युक्तस्य ज्योतिषो गायत्री वा इदं सर्वमिति गायत्र्या समारम्भः कृतः, तस्मान्न विष्णुरिति चेत् — न तथा चेतोऽर्पणार्थं हि विनिगद्यते अग्निगायत्र्यादिशब्दार्थरूपोऽसाविति चेतो-

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २६ ॥
उपदेशभेदान्नेति चेन्नोभय-
स्मिन्नप्यविरोधात् ॥ २७ ॥
प्राणस्तथानुगमात् ॥ २८ ॥

ऽर्पणार्थं हि निगद्यते । तथाहि — दर्शन गायति चेत्यादि सर्वच्छन्दोऽभिधो ह्येष सर्ववेदाभिधो ह्यसौ सर्वलोका भिधो ह्येष तेषां तदुपचारत' इति वामने ॥ २५ ॥

'एतावानस्य महिमा ततो ज्यायांश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि' इति । 'सुवर्णकोप रजसा परीवृत देवाना वसुधा नोविराज अमृतस्य पूर्णा- न्तामुपकला विचक्षते । पाद यक्षो दुर्णकिलाविविल्स इति श्रुतेः । 'तस्मिन काले महाराजो राम इत्यभिधी यते । तथापि पौरुषे सूक्ते विष्णुरेवाभिधीयते' इति च स्कान्दे ॥२६॥

त्रिपादस्यामृत' दिवीति पूर्वोपदेश, 'परोदिव इति पञ्चम्यन्त पश्चिमः । तस्मान्नैकं वस्त्वत्रोच्यते इति चेत् — न त्रिसप्तलोकापेक्षयोभयस्मिन्नप्यविरोधात् ॥ २७ ॥

'प्राणो विष्णुः' इत्युक्त तत्र 'ता शोर्षं श्रियः श्रिताश्च । श्रोत्र मनो वाक् प्राण' इत्यत्र प्राणस्य विष्णुत्व न विद्यते, इन्द्रियै सहाभिधानादित्यत आह 'त देवा प्राणयन्त' स एषो'श्च स एष प्राणः प्राणा ऋच इत्येव' विद्यात् तदय प्राणोऽधितिष्ठतीत्याद्यनुगमादत्रापि प्राणो

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमाह्यस्मिन् ॥ २९ ॥

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ३० ॥

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासना-

विष्णुरेव । 'विष्णुमेवानन्दयन्देवा विष्णुं भूतिमुपासते । स एव सर्ववेदोक्तस्तद्वयो देह उच्यते'-इति स्कान्दे ॥ २८ ॥

ब्रह्मशब्दानुगमाच्च । 'प्राणो वा अहमस्मृष' इति पाद्मे वक्तुरात्मोपदेशादिन्द्र एवेति चेत्—न, 'प्राणस्त्वं प्राणः सर्वाणि भूतानि' इतिवदध्यात्मसम्बन्धो ह्यत्र विद्यते ॥ २९ ॥

शास्त्रमन्तर्यामी 'सविच्छास्त्रं परं पदम्' इति हि भागवते । 'तत्तत्राम्नोच्यते विष्णुः सर्वं शास्त्रस्य हेतुतः । न क्वापि किञ्चिन्नामास्ति तस्मते पुरुषोत्तमम्'इति च पाद्मे ॥३०॥

'अहं मनुरभवं सूर्यश्चे'त्यादिवत् । तावन्ति शतसम्वत्सरस्याह्नां सहस्राणि भवन्तीति जीवस्य लिङ्गम् । प्राण–सर्वादिमुख्यप्राणलिङ्गं तस्मान्नेति चेत् न, अन्तर्बहिः सर्वगतत्वेनेत्युपासनात्रैविध्यादिहाश्रितत्वाच्च यत्र तमेव सीमानं विदार्यैतया द्वारा प्रापद्यत स एतमेव पुरुषं ब्रह्म त तमपश्यत एष ह स्म वैतद्विद्वानाह महिदास ऐतरेयः' इत्यादिना महिदासाभिधो जज्ञे इतरायास्तपोबलात् । साक्षात् स भगवान् विष्णुर्यस्तन्त्वं वेदान् व्यधात् इति' च ब्रह्माण्डे । तत्तदुपासनयोग्यतया च पुरुषाणां केषाञ्चित् सर्वगतत्वेन केषाञ्चिद्धृदये हरिः । केषाञ्चिद्बहिरेवास्या-

वैविध्यादाश्रितत्वा-
दिह तद्योगात् ॥३१॥

इति वैयासिक ब्रह्मसूत्र प्रथमाध्यायस्य प्रथमः
पादः समाप्तः ॥ १अ० १पा० ॥

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

दुपास्यः पुरुषोत्तमः' इति ब्राह्मे । 'अग्नौ क्रियावतां विष्णु-र्योगिनां हृदये हरिः । प्रतिमास्वल्पबुद्धीनां सर्वत्र विदितात्मनाम्' इति च ॥ २१ ॥

इति श्रीमदानन्दतीर्थविरचिते ब्रह्मसूत्रभाष्ये
प्रथमाध्यायस्य प्रथमः पादः समाप्तः ।

लिङ्गात्मकानां शब्दानां प्रवृत्तिं विष्णौ दर्शयत्यस्मिन् पादे प्राधान्येन ब्रह्मतत्त्वमिति सर्वगतत्वमुक्तं विष्णोः, तच्च तस्यैतस्यामावादित्यो रस इत्यादिना आदित्यस्य प्रतीयते । अतोऽब्रवीत् — 'स यथायमशरीरः प्रज्ञानघन-इत्यादिना सर्वं शोध्यमानो नारायण एव'तदेव ब्रह्म परमं

विवक्षितगुणोपपत्तेश्च ॥ २ ॥

अनुपपत्तेस्तु न शारीरः ॥ ३ ॥

कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

शब्दविशेषात् ॥ ५ ॥

स्मृतेश्च । ॥ ६ ॥

कवीनाम् । परमं यो महोद्ब्रह्म वासुदेवात् परं को न ब्रह्मशब्दोदिता भवेत् । सहि सर्वगुणैः पूर्णस्तदन्ये तूपचारतः इति तस्मिन्नेव प्रसिद्धः ब्रह्मशब्दोपदेशात् । १ ॥

'मयोतोऽमृतोमतः' इत्यादि 'स हि न ते विष्णोर्जायमानो न जात.' इत्यादिना मृतत्वादिगुणः। 'स सविता स वायुः स इन्द्र सोऽमृतः सोऽहष्टो यो हरिः परमो यो विष्णुर्योऽनन्तः' इत्यादि चतुर्वेदशिखायाम् ॥ २ ॥

न चाखिलशब्दाद्यचतुर्थत्वादेव जीव इति वाच्यम्, एकस्य सर्वशरीरस्थत्वानुपपत्तेरेव । ३ ॥

'आत्मानं परमं शंसति' इत्यादि । ४ ॥

एतमेव ब्रह्मेत्याचक्षत इति न हि जीवमेव ब्रह्मेत्याचक्षते । 'एष नु एष ब्रह्मैव उ एषात्मैष उ एवेन्द्रो उ एव हरिर्हरति-परः परमानन्द' इति चेन्द्रद्युम्नशाखायाम् ॥५॥

'अहमात्मा गुडाकेश सर्वभूताशयस्थितः । मामाविश्य च भूतानि धारयाम्यहमोजसा'-इत्यादि । ६ ॥

न चासामाधिकं कल्प्य', सर्वेषु भूतेष्विलभंकीकल्वा-

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥

अत्ता चराचरग्रहणात् ॥ ९ ॥

चक्षुर्मयत्वादिना च जीवव्यपदेशाच्च नेति चेत्—न अर्भकौकस्त्वेन चक्षुर्मयत्वादिरूपेण च तस्यैव विष्णोर्निचाय्यत्वात् सर्वगतत्वेऽप्यर्भकौकस्त्वं युज्यते च व्योमवत्। 'सर्वेन्द्रियमयो विष्णुः सर्वप्राणिषु च स्थितः। सर्वनामाभिधेयश्च सर्ववेदेडितश्च सः' इति स्कान्दे। ७॥

जीवपरयोरेकशरीरस्थत्वे समानभोगप्राप्तिरिति चेत्—न, सामर्थ्यवैशेष्यात्। उक्तं हि गारुडे—'सर्वज्ञत्वस्वतन्त्रत्वभेदात् सर्वशक्त्यल्पशक्तितः। स्वातन्त्र्यपारतन्त्र्याभ्यां सम्भोगो नेशजीवयोः' ॥ ८ ॥

अस्मादस्य यत इत्युक्तं तत्कर्तृत्वं स यद्यदेवासृजत तत्तदत्तुमधीयत सर्वं वा अत्तीति तददितेरदितित्वमित्यदितेः प्रतीयते, स यद्यदेवासृजतेति पुंलिङ्गश्च कूटस्थोऽचर उच्यते इत्यादिवत्। अत्रोच्यते— न हि चराचरस्य सर्वस्यात्तृत्वमदितेः 'स्रष्टा पाता तथैवात्ता निखिलस्यैक एव तु। वासुदेवः परः पुंसामितरोऽल्पस्य वा न वा' इति स्कान्दे। एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपा। यमप्येति भुवनं साम्पराये नमोहरिष्टं तमिहायुपेत्तु देवः' इति श्रुतिः ॥ ९ ॥

प्रकरणाच्च ॥ १० ॥
गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११॥

सम्वत्सरस्रष्ट्रादिना तत्प्रकरणाच्च 'नैवासीत् किञ्च नाप्यादौ सत्त्वरासीद्रस्तदा। आसनो मनसास्वादोद एव जनार्दनः। शयानस्तासु भगवान्निर्ममेऽण्डं महत्तरम् तत्र सम्वत्सरं नाम ब्रह्माणमसृजत् प्रभुः। तमर्त्तु व्याददावास्यन्तदसौ विष्णुरावह। अथ तत् कृपया विष्णु स्तृष्टिकर्मण्ययोजयत्। सोऽसृजद् भुवनं विश्वमथा हरेर्विभुः' इति च ब्रह्मवैवर्त्ते॥ १०॥

सर्वोत्तमः पर उक्तः। ऋतं पिबन्तौ सुकृतस्य लोके। गुहा प्रविष्टौ परमे परार्द्धे छायातपौ ब्रह्मविदो वदन्ति। पञ्चा ग्नयो ये च त्रिणाचिकेता इति पिबन्तौ प्रतीयेते तौ कावितिं उच्यते, गुहां प्रविष्टौ पिबन्तौ विष्णुरूपे एव धर्मा समन्तात् विहन्तं व्यापत्तस्यौजेृहिं मातरिश्वा जगाम इत्यादिना तद्दर्शनात्।'आमान्तरात्मेति हरिरेक एव द्विध स्थितः। निविष्टो हृदये नित्यं रसं पिबति कर्मजम्' इति हहत्संहितायाम्।'शुभं पिबत्यसौ नित्यं नाशुभं स कृ कश्चित् 'यो वेदनिहितं गुहायाम्' इत्यादिना प्रसिद्धं शि शब्देन दर्शयति—'यः सेतुरीजानामक्षरं ब्रह्म तत् परमिति पृथग्वक्तुं गुणास्तस्य न शक्यन्तेऽमितत्वतः। यतोऽतो ब्रह्मश ब्देन सर्वेषां ग्रहणं भवेत्। एतस्माद् ब्रह्मशब्दोऽयं विष्णो रेव विशेषणम्। अमिता हि गुणा यस्मान्नान्येषां तम्र.

विशेषणाच्च ॥ १२ ॥

अन्तर उपपत्तेः ॥ १३ ॥

विभुम्' इति ब्राह्मे । न च जीवे समन्वयोऽभिधीयते, 'सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा सत्यं भिदा मे वारुण्यो मे वारुण्यो मे वारुण्य' । इति पैङ्गिश्रुतेः 'आत्मा हि परमः स्वतन्त्रोऽधिगुणः जीवोऽल्पशक्तिरस्वतन्त्रो वः' इति भाल्लवेयश्रुतिः । 'यथेश्वरस्य जीवस्य भेदः सत्यो विनिश्चयात् । एवमेव हि मे वाचं सत्यां कर्त्तुमिहार्हसि । यथेश्वरस्य जीवस्य सत्यभेदो परस्परम् । तेन सत्येन मां देवा स्त्रायन्तु सह केशवा' इत्यादेः 'नासत्यो भेद आदित्यः विष्णु' इत्युक्तम् । 'य एष आदित्ये पुरुषः सोऽहमस्मि स एवाहमस्मीत्यादावग्नेर्नामेवादित्यस्थत्वमुच्यते, अतोऽग्न्यादित्ययोरैक्यात् 'एषोऽन्तरक्षिणि पुरुषो दृश्यत' इत्यत्राप्यग्निरेवोच्यते ॥ १२ ॥

अतस्तद् यथा—पुष्करपलाश आपो नाश्लिष्यन्त एवमेवंविदि पापं किन्तु न श्लिश्यत इत्यादिना ज्ञानादेव सर्वपापाश्लेषाभोचोपपत्तिरिति । अतोऽब्रवीत् 'चतुरन्तःस्थो विष्णुरेव विपादस्यामृतं दिवि' इत्यादिना तस्यैवामृतत्वायुक्ते सद्मशब्दाद्युपपत्तेश्च । सोऽहमस्मीत्यादि त्वन्तर्याम्यपेक्षया । अन्तर्यामिणमीशेशमपेक्ष्याहं त्वमित्यपि । सर्वे शब्दाः प्रयुञ्जन्ते जातिभेदेऽपि वस्तुषु' इति महाकौर्मे ॥१३॥

'सर्पिर्वोदकं वा सिञ्चति वर्त्मना एव गच्छति' ...

स्थानादिव्यपदेशाच्च ॥ १४ ॥

सुख विशिष्टाभिधानादेव च ॥१५॥

श्रुतोपनिषत्कगत्यभिधानाच्च ॥१६॥

अनवस्थितेरसम्भवाच्च नेतरः ॥ १७॥

स्थानशक्तिः । 'वामनीर्भामनीः' इतराद्यात्मशक्तियोच्यते । तस्य द्योतलिङ्गं 'स ईशः सोऽसपत्नः स हरिः स परः स वीरो वरीयान्यदिदं चक्षुषि सर्पिर्वोदकं वा सिञ्चति वर्त्मना एव गच्छति स वामन स भामनः स आनन्दः सोऽच्युतः' इति चतुर्वेदशिखायाम् । स्थानत्वादिदं चक्षुरसङ्गं सव वसुभिः । स वामनः परोऽस्माकं गतिरितीव चिन्तयेत् । इति वामने ॥ १४ ॥

प्राणो ब्रह्म, क ब्रह्म, खं ब्रह्मेति विज्ञानमानन्दं ब्रह्म, आनन्दो ब्रह्मेति व्यजानादित्यादेस्तस्यैव तत्तल्लक्षणं । लक्षणं परमानन्दो विष्णोरेव न संशयः । अव्यक्तादित्यानान्त विष्णोरानन्दभागिनः' इति ब्रह्मवैवर्त्ते ॥ १५ ॥

न च मुख्ये सत्यमुख्यं युज्यते स एतान् ब्रह्म गमयतीति ॥ १६

न ह्यन्यविद्ययान्यगतिर्युक्ता । जीवस्य जीवान्तरः नियामकत्वेऽनवस्थितिः साम्यादसम्भवाच्च न जीवः, नियमप्रमाणाभावादनीश्वरापेक्षत्वाच्च ॥ १७ ॥

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥१८॥
न च स्मार्त्तमतद्धर्माभिलापात् ॥ १९ ॥
शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥२०॥

'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृत.' इत्यादिना अन्तर्याम्युच्यते। तत्र चैतदस्तमित्यस्ततत्वमुच्यते। स च यस्य पृथिवी शरीरमित्यादिना सर्वात्मकत्वात् प्रकृतिस्तत्त उजीवो वा युक्त, न हि विष्णोः पृथिव्यादिशरीरत्वमङ्गीक्रियत इत्यत आह—यं पृथिवी वेद पृथिव्या अन्तर इत्यादिनाधिदैवादिषु तद्धर्मव्यपदेशाद्विष्णुरेवान्तर्यामी। स हि न तं विष्णोऽजायमानो न जातः स,योऽतोऽश्रुतो गतो मतो दृष्ट. सर्वेषां भूतानामन्तरं पुरुष इत्यादिना विदितोऽन्तरश्च ॥ १८ ॥

त्रिगुणत्वादि-धर्मानुक्तेर्न स्मृत्युक्तं प्रधानमन्तर्यामी ॥ १९ ॥

'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयत्येष स आत्मान्तर्याम्यमृत'। यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरमित्युभयेऽपि शाखिनो भेदेनैनं जीवमधीयते। 'शीयते नित्यमेवास्माद्विष्णोस्तु जगदीदृशम्। रमते च परो ह्यस्मिन् शरीरं तस्य तद् जगत्' इति वचनाद शरीरत्वाविरोध' ॥ २० ॥

अदृश्यत्वादिगुणको धर्मोक्तेः॥२१॥
विशेषणभेदव्यपदेशाभ्यां च नेतरौ॥२२॥

अदृश्यत्वादि-गुणा विष्णोरुक्ताः। तत्र यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणि-पादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा इत्युक्त्वा—यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति। यथासतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वमित्युक्त्वा तत्परतः पराभिधानात्स्वाचाक्षरात् परतः पर इति परः प्रतीयत इति श्रतोऽब्रवीत् पृथिव्यादि दृष्टान्तमुक्त्वा अक्षरात् सम्भवतीह विश्वमित्यतः परं तत्परतः पराभिधानात् कूटस्थो अक्षर उच्यते इति स्मृतेश्च प्रकृतेः प्राप्तिः। अक्षरस्मात् परतः पराभिधानादेव च हिरण्यगर्भस्य, तत्रैव विज्ञानमृत इह सम्भवति। तत् कर्म्म हरितोषं यत् सा विद्या तन्मतिर्यया। अथ द्वे मा विद्ये वेदितव्ये परा चैवापरा च। तत्र ये वेदा यान्यङ्गानि यान्युपाङ्गानि यानि प्रत्यङ्गानि सा परा परा यया हरिर्वेदितव्यो योऽसावदृश्यो निर्गुणः परः परमात्मेत्यादिना तद्धर्मत्वेनावगतपरविद्याविषयोत्वोक्तेर्विष्णुरेवादृश्यत्वादिगुणकः॥२१॥

यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तप इति विशेषणाच्च प्रकृतिः। तस्मादेतद् ब्रह्म नामरूपमन्नञ्च -जायत इति भेदव्यपदेशाच्च विरञ्चिः। 'अपरं त्वक्षरं या सा प्रकृ-

रूपोपन्यासाच्च ॥ २३ ॥
वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥
स्मर्य्यमाणमनुमानं स्यादिति ॥ २५ ॥

तिर्जडरूपिका । श्रीः परा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया । तमचरं प्राहुः परतः परमचरम् । हरिमेवाखिलगुणमचरत्रयमीरितम्' इति स्कान्दे । अचराभिधानादचरात् परतः पर इत्यपि विशेषणमेव । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इति भेदव्यपदेशादीशशब्दप्राप्तोऽपि न रुद्रः । २२ ॥

यदापश्यः पश्यतिरुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिमिति । एको नारायण आसीन्न ब्रह्मा न शङ्करः स मुनिर्भूत्वा समचिन्तयत् तत्र ते व्यजायन्त विश्वे हिरण्यगर्भोऽग्निर्यमो वरुण रुद्रेन्द्रा इति तस्य हेतस्य परमस्य नारायणस्य चत्वारि रूपाणि शक्लं रक्तं रौक्म कृष्णमिति । स एतान्येतभ्योभ्यचीक्लपद् विश्वमिश्राणि व्यमिश्रयदत एतादृगेतद्रूपमिति तस्यैव हि रूपाण्यभिधीयते ॥ २३ ॥

श्रद्दश्यत्वादिगुणेषु सर्वगतत्वं यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते इति वैश्वानरस्योक्तमिति श्रत आह। अग्नाविष्णोः साधारणस्य वैश्वानरशब्दस्य विष्णोरेव प्रसिद्धत्वादात्मशब्देन विशेषणाद् वैश्वानरो विष्णुरेव ॥ २४ ॥

श्रहं वैश्वानरो भूत्वा प्राणिनां ...

शब्दादिभ्योऽन्तः प्रतिष्ठानान्नेति चेन्न, तथा दृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते ॥ २६ ॥ १।२।२६ ॥

माणमेवापि स एवोच्यत इत्यस्यानुमापकं स्वसमाख्यानात् इति शब्दः समाख्याप्रदर्शकः। २५।

अयमग्निः वैश्वानरः वैश्वानरमृत आजातमग्निम् इत्यादि शब्दैः वैश्वानरे तदुक्तं भवति। इयं गार्हपत्यो मनोऽन्वाहार्यं पचनमास्यमाहवनीय इत्याद्यग्निलिङ्गमादियच्छोक्तम्। येनेदमन्नं पच्यते तद्यद्भक्तं प्रथममागच्छेत् तद्धोमीय मित्यादिना पाचकत्वेनान्तः प्रतिष्ठानं प्रतीयते तस्मान्न विष्णुरिति चेत्—न अथ ईमसात्मानमणोरणीयांसं परतः परं विश्वं हरिमुपासीतेति सर्वनामा सर्वकर्मा सर्वलिङ्गः सर्वगुणः सर्वकामः सर्वधर्मः सर्वरूप इति स एतमेवमात्मानविश्व हरिमारादरमुपास्ते तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेषु देवेषु कामचारी भवति इति तत्तन्नामलिङ्गादिना तस्यैव दृष्ट्युपदेशात्छन्दोपनिषदि अनात्मत्वादनात्मान ऊनत्वाद्धुपराश्रितः। अग्राह्यर्षः परे सर्वे ब्रह्मात्मा विष्णुरेव चोक्तादिना को न आत्मा किं ब्रह्मेत्यारभ्यान्येषामसम्भवाद् विष्णुरेव वैश्वानरः। चन्द्रमा मनसो जातश्चक्षोः सूर्योऽजायत इत्यादिना यः पुरुषाख्यो विष्णुरभिहितस्तद्विधमेवात्र मूर्द्ध वसुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मेत्यादिनैव वैश्वानरमधीयते। यद्येन सकलवेद-

अत एव न देवता भूतञ्च ॥२७॥
साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥

शास्त्रागमतन्त्रयामलपुराणादिषु विष्णुपरत्वं पुरुषसूक्तस्य सूचयति । यथाहि पाद्मे, 'यथा हि पौरुषं सूक्तं नित्यं विष्णुपरायणम् । तथैव मे मनो नित्यं भूयाद्विष्णुपरायणम्' इति ॥ २६ ॥

चतुर्वेदशाखायाञ्च—'सहस्रशीर्षा पुरुषः सहस्राक्षः' सहस्रपादित्येष ह्येवाचिन्त्य परं परमो हरिरादिरनादिरनन्तोऽनन्तशीर्षोऽनन्ताक्षोऽनन्तबाहुरनन्तगुणोऽनन्तरूपः इति । बृहत्संहितायाञ्च—'यथैव पौरुषं सूक्तं विष्णोरेवाभिधायकम् । न तथा सर्ववेदाश्च वेदाङ्गानि च नारदे त्यादि । यस्माद्यत् जायते चाङ्गाल्लोकवेदादिकं हरेः । तन्नामवाच्यमङ्गं तद्यथा ब्रह्मादिकं मुखमिति श्रीनारदीयवचनान्न वेदोक्तिविरोधः । अग्निर्वैश्वानरादिशब्दस्तेजसि भूतेऽग्निदेवताया प्रसिद्धोऽप्यतः पूर्वोक्तहेतुः तत्र वात्र न सा तत्राभिधीयते ॥ २७ ॥

तन्नादय' शब्दा अग्न्यादिवाचका' । तथापि साक्षादेवानन्ययोगेन ब्रह्मवाचकैः शब्दैः व्यवहारार्थमनभिज्ञानाश्चान्यत्र व्यवहरन्तीत्यभ्युपगमे विरोधं जैमिनिर्वक्ति । व्यासचित्तस्थिताकाशादवच्छिन्नानि कानिचित् । अन्ये व्यवहरन्त्येतानुरीकृत्य गृहादिवदिति स्कान्दवचनाग्मतानां परस्परविरोधः ॥ २८ ॥

अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥
अनुस्मृतेर्बादरिः ॥ ३० ॥
सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ३१ ॥
आमनन्ति चैन मस्मिन् ॥ ३२ ॥

इति वैयासिकब्रह्मसूत्रप्रथमाध्यायस्य
द्वितीयः पादः ।

तत्र तत्र प्रसिद्धावप्यग्न्यादिषु ब्रह्मणोऽभिव्यक्तेरग्न्यादिसूत्रनियम इत्याश्मरथ्यः ॥ २९ ॥

तत्र तत्रोक्तस्य विष्णोरग्न्यादिषु अनुस्मर्यमाणत्वात् तन्नियम इति बादरिः ॥ ३० ॥

साक्षादप्यविरोधं वदन् जैमिनिः सूक्तादिनियममग्न्यादिसम्प्राप्त्या मन्यते । तद् यथा यथोपासते तदेव भवतीति दर्शयति । न ह्यन्योपासकोऽन्यं प्राप्नुत इति युज्यते इति अत आह ॥ ३१ ॥

एनं विष्णुमस्मिन् अग्न्यादावामनन्ति योऽग्नौ तिष्ठन् य एष एतस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुष इत्यादिना ॥ ३२ ॥

इति श्रीमदानन्दतीर्थविरचिते ब्रह्मसूत्रभाष्ये
प्रथमाध्यायस्य द्वितीयः पादः ॥ २ ॥

द्युभ्वाद्यायतनं स्व-शब्दात् ॥ १ ॥
मुक्तोपसृप्य व्यपदेशात् ॥ २ ॥
नानुमानमतच्छब्दात् ॥ ३ ॥

ओं तत्र चान्यत्र प्रसिद्धानां शब्दानां विष्णौ समन्वयं प्रायेणास्मिन् पादे दर्शयति। विष्णोः परविद्याविषयप्रकृतिमुक्तं तत्र यस्मिन् द्यौः पृथिवी चान्तरीक्षमोतं मनः सह प्राणैश्च सर्वैः तमेवैकं जानथ आत्मानमित्यत्र प्राणानां मूर्द्धि(?)रसि रुद्रो मा विशान्तकः प्राणेश्वरः कृत्तिवासाः पिनाकीत्यादिना रुद्रस्य प्राणाद्याधारत्वप्रतीतेः। स एषोऽन्तश्चरते बहुधा जायमान इति जीवलिङ्गाच्च तयोः प्राप्तिरिति अत उच्यते। तमेवैकं जानथ आत्मानमित्यात्मशब्दात् द्युभ्वाद्याश्रयो विष्णुरेव आत्मब्रह्मादयः शब्दास्सम्यते विष्णुमव्ययं न सम्भवन्ति यस्मात्तेनैवात्मा गुणपूर्णतेति ब्रह्मवैवर्त्ते। १॥

अमृतस्यैष सेतुरिति। ब्रह्मविदाप्नोति परम्। नारायणं महाज्ञेयं विश्वात्मानं परायणम्। मुक्तानां परमां गतिम्। एतमानन्दमयमात्मानमुपसंक्रामति इत्यादि तस्यैव मुक्तप्राप्यव्यपदेशात्। 'बहुनात्र किमुक्तेन यावन्नैनं न गच्छति। योगी तावन्न मुक्तःस्यादेष शास्त्रविनिर्णयः।' इत्यादित्यपुराणे ॥ २ ॥

नानुमानात्मकागमपरिकल्पितरुद्रोऽत्र वाच्यो, भस्मधरोयादितच्छब्दभावात्। सोऽन्तकः, स रुद्रः, स प्राणभृत् स प्राणनायकः, स ईशो यो हरिर्योऽनन्तो यो विष्णु-

प्राणश्च ॥ ४ ॥

भेदव्यपदेशात् ॥ ५ ॥

यः परः परो वरीयानित्यादिना प्राणानां ग्रन्थिलरुद्रत्वादि-
विष्णोरेवोक्तत्वात् ब्रह्माण्डे च। रुजं द्रावयते यस्मात्
तस्माद्रुद्रो जनार्दनः। ईशानादेव चेशानो महादेवो मह-
त्त्वतः। पिबन्ति ये नरा नाकं मुक्ताः संसारसागरात्।
तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः। शिवः
सुखात्मकत्वेन शर्वः संरोधनाद्धरिः। कृत्यात्मकमिदं देहं
यतो वस्ते प्रवर्त्तयन्। कृत्तिवासास्ततो देवो विरिञ्चिश्च
विरेचनात्। बृंहणाद् ब्रह्मनामासावैश्वर्य्यादिन्द्र उच्यते।
एवं नानाविधैः शब्दैरेक एव त्रिविक्रमः। वेदेषु स पुराणेषु
गीयते पुरुषोत्तम इति वामने च। न तु नारायणादीनां
नाम्नामन्यत्र सम्भवः। अन्यनाम्नां गतिर्विष्णुरेक एव
प्रकीर्त्तित इति। स्कान्दे च। ऋते नारायणादीनि
नामानि पुरुषोत्तमः। प्रादादन्यत्र भगवान् राजवत्तै-
स्वकं पुर इति। चतुर्मुखः शतानन्दो ब्रह्मणः पद्मभू-
रिति। उग्रो भस्मधरो नग्नः कपालीति शिवस्य च।
विशेषनामानि ददौ चक्रोशान्यपि केशव इति ब्राह्मे ॥३॥

एतैरेव हेतुभिर्नजीवो वायुश्च। अजायमानो बहुधा
विजायत इति तस्यैव बहुधा जन्मोक्तेः ॥ ४ ॥

नाटकं वाद्य जुष्टं यदा पञ्चत्वन्यमोगमस्य महिमा-
नमिति भेदव्यपदेशात् ॥ ५ ॥

प्रकरणात् ॥ ६ ॥

स्थित्यदनाभ्याञ्च ॥ ७ ॥

भूमा सम्प्रसादादध्युपदेशात् ॥ ८ ॥

धर्मोपपत्तेश्च ॥ ९ ॥

अक्षरमम्बरान्तधृतेः ॥ १० ॥

इह विद्ये वेदितव्ये इति तस्यैतत् प्रकरणम् ॥ ६ ॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ईशजीवयोः स्थित्यदनोक्तेः ॥ ७ ॥

प्राणो वा आशाया भूयानित्युक्ता यो वै भूमा तत् सुखमित्युक्तेस्तस्यैव भूमत्वप्राप्तिः उत्क्रान्त प्राणानित्यादिलिङ्गात् प्राणशब्दो वायुवाची अतो वक्ति । संप्रसादात् पूर्णसुखरूपत्वात् अध्युपदेशात् सर्वेषाम् उपर्युपदेशाच्च विष्णुरेव भूमा सहस्रशीर्षं देवं विश्वाक्षं विश्वसम्भवम् । विश्वं नारायणं देवमक्षरं परमं पदम् । विश्वतः परमं नित्यमिति श्रुतिः । तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीत्यादिना उत्क्रमणादिलिङ्गविरोधोऽपि ॥ ८ ॥

सर्वगतत्वादिधर्मोपपत्तेश्च ॥ ९ ॥

अदृश्यत्वादिगुणः अदृष्टं दृष्टः श्रुतं श्रोतेत्यादिना अहं सोममाहं न सम्भिभर्मीत्यादेस्तस्यापि सम्भवाममध्यमाक्षरस्योक्ता इति । अतो ब्रूते । एतस्मिन् खल्वक्षरे गार्ग्याकाश

सा च प्रशासनात् ॥ ११ ॥

अन्यभावव्यावृत्तेश्च ॥ १२ ॥

ओतश्च प्रोतश्चेत्यम्बरान्तस्य सर्वस्य धृतेर्ब्रह्मैवाक्षरं य एतिधातुः पृथिवीमुतद्यामिकोद्धारभुवनानि बिभ्रा भर्त्तासन् भ्रियमाणो बिभर्त्त्येको देवो बहुधा निविष्टः यदाभारं तद्रूपस्ते स भर्तुम्परास्थभार पुनरस्तमेति यस्मिन्निदं सम्बविभेधिसर्वं यस्मिन् देवा अधिविश्वे निषेदुरित्यादि श्रुतेः। पृथिव्यादिप्रकृत्यन्तं भूतं भव्यं भवच्च यत्। विष्णुरेको विभर्त्तीदं नान्यस्मात् समीष्टताविति च स्कान्दे ॥ १० ॥

सा च धृतिः प्रशासनादुच्यते। एतस्य वा अक्षरस्य वा प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिना। तच्च प्रशासनं विष्णोरेव। सप्ताहँगर्भा भुवनस्य विष्णोस्तिष्ठन्ति प्रदिशाविधिर्मणिचतुर्भिः माक नवतिश्च नामभियक्र न व्रत्तं व्यतीरवीविषदित्यादिश्रुतेः। एकः शास्ता न द्वितीयोऽस्ति शास्ता यो हृच्छयस्तमहमिदं ब्रवीमि। न केवल मे भवतश्च राजन् सर्वेवस वल्निनाश्चापरेयामित्यादेश्च। ११ ॥

अस्थूलमनण्वित्यादिना स्थूलादादीनामन्यवस्तु स्वभावाना व्यावृत्तेश्च अस्थूलोऽनणुरमध्यमो मध्यमो व्यापको योऽसौ हरिरादिरनादिरविश्वो विश्व. सद्गुणो निर्गुण इत्यादेर्विष्णोरेव ते धर्मा. अस्थूलोऽनणुरूपो सावविश्वो

ईक्षतिकर्मव्यपदेशात् सः ॥१३॥
दहर उत्तरेभ्यः ॥१४॥

विश्व एव च। विरुद्धधर्मरूपो सा वैश्वर्य्यात् पुरुषोत्तम इति ब्राह्मे ॥ १२ ॥

स देव सोम्येदमग्र आसीदित्यादिना सतः स्रष्टृत्वमुच्यते' तच सदवहुस्यां प्रजायेयेति परिणाम प्रतीतेर्न विष्णुः स ह्यविकारः सदा शुद्धो नित्य आत्मा सदा हरिरित्यादिनाऽविकारः प्रसिद्ध इति श्रुतौ ब्रवीति। तदैक्षतेतोक्षति कर्मव्यपदेशात् स एव विष्णुरेवोच्यते। नान्योऽतोऽस्ति द्रष्टा नान्योऽतोस्ति श्रोतेत्यादिना तस्यैव हि तल्लक्षण बहुत्वं चाधिकारेणैवोक्तम्। अजायमानो बहुधा विजायत इति ॥ १३ ॥

चन्द्रादित्याधारत्वं विष्णोरुक्तम्। तत्राथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणीत्यादिना आकाशस्य प्रतीयते स चाकाशो न विष्णुः तस्मान्ते शुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितमिति श्रुतेरिति। अत—आह। य आत्मापहतपाप्मा विजरो विमृत्यु र्विशोको विजघत् सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्य इत्यादिभ्य उत्तरेभ्यो गुणेभ्यो

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॥ १५ ॥
धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १६ ॥

ईश्वरो विष्णुरेव । योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति । स एष सर्वेभ्यः पाप्मभ्य उदित इत्यादिना विष्णोरेव हि ते गुणाः नित्यतीर्णाशनायादिरेक एव हरिः स्वतः अशनयादिकानन्ये तत्प्रसादात्तरन्ति हीति पाद्मे । सापेक्षनिरपेक्षयोश्च निरपेक्षं स्वीकर्तव्यम् । सत्यकामोऽपरो नास्ति सम्यते विष्णुमव्ययम् । सत्यकामत्वमन्येषां भवेच्च काम्यकामितेति च स्कान्दे ॥ १४ ॥

अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्तीति सुप्तस्य त्वसद्गतिर्ब्रह्मशब्दोच्यते । सता सोम्य तदा सम्पन्नो भवतीति श्रुतेः न हि सुप्तो गच्छति । अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके इति लिङ्गं च तथा दृष्टम् । अरण्यारण्य सुधासमुद्रौ तत्रैव सर्वाभिमतप्रदौ दावित्यादिना तस्यैव हि तल्लक्षणत्वेनोच्यते ॥ १५ ॥

एष सेतुर्विधृतिरिति श्रुतेः । एष भूताधिपतिरेष भूतपाल इत्यादस्य महिम्नोऽस्मिन्नुपलब्धेः । एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च एतस्य वा अक्षरस्य प्रशासने । स हि सर्वाधिपतिः सर्वपालः स ईशः स विष्णुः पतिः विश्वस्यात्मेश्वर इत्यादि श्रुतिभ्यस्तस्य ह्येव महिमा । सर्वेशो विष्णुरेको नान्योऽस्ति जगतः पतिरिति स्कान्दे ॥ १६ ॥

प्रसिद्धेश्च ॥ १७ ॥

इतरपरामर्शात् स इति चेन्नासम्भवात् ॥१८॥

उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १९ ॥

अन्यार्थश्च परामर्शः ॥ २० ॥

अल्पश्रुतेरिति चेत्तदुक्तम् ॥ २१ ॥

अनुकृतेस्तस्य च ॥ २२ ॥

तत्रापि दहरं गगनं विशोकस्तस्मिन् तदन्तस्तदुपासितव्यमिति प्रसिद्धेश्च। तदन्तस्थापिचत्वात् सत् सुषिर इति श्रुतिविरोधः ॥ १७ ॥

परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति होवाचेति जीवपरामर्शात् स इति चेत्—न, तस्य स्वतोपहतपाप्मत्वाद्यसम्भवात् ॥ १८ ॥

स तत्र पर्य्येति जक्षणक्रीडन्नममान इत्याद्युत्तरवचनाद् जीवेति चेत्–न, तत्र हि परमेश्वरप्रसादाविर्भूतस्वरूपोऽयमुच्यते। यत्प्रसादात् स मुक्तो भवति स भगवान् पूर्वोक्तः ॥ १९ ॥

य प्राप्य स्वेन रूपेण जीवो निष्पद्य स एष आत्मेति परमात्मार्थश्च परामर्शः ॥ २० ॥

दहर इत्यल्पश्रुतेर्नेति चेत्—न, निचाय्यत्वादेवं व्योमवच्चेत्युक्तत्वात्। एष म आत्मान्तर्हृदये ज्यायानिति श्रुत्युक्तत्वाच्च ॥ २१ ॥

अदृश्यत्वादय परमेश्वरे गुणा उक्ताः। तेषां मुख

अपि च स्मर्यते ॥ २३ ॥

शब्दादेव प्रमितः ॥ २४ ॥

शाश्वतं नेतरेषां तदेतदिति मन्यन्ते । निर्देश्यं परमं सुखमित्यादिना ज्ञानिसुखस्याप्यनिर्देश्यत्वमशेयत्वञ्चोच्यते । अतो वक्ति ।

तमेव भान्तमनुभाति सर्वमित्यनुकृतेस्तस्य भासा सर्वमिदं विभातीति वचनाच्च । परमात्मैवानिर्देश्य-सुखरूपः । न हि ज्ञानिसुखमनुभाति सर्वम् । न च तद्भासा अहं तत्तेजो राशीन् नारायणभासां हि सर्वं भाति । २२ ॥

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्र-मसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति । न तद्भास-यते सूर्यो न शशाङ्को न पावकः । यद् गत्वा न निव-र्त्तन्ते तद्धाम परमं ममेति च ॥ २३ ॥

विष्णुरेव जिज्ञास्य इत्युक्तम् । ऊर्द्धं प्राणमुन्नयत्य-पानं प्रत्यगस्यति । मध्ये वामनमासीनं विश्वे देवा उपासत इति सर्वदेवोपास्यः कश्चित् प्रतीयते । स च एवमेवैष प्राण इतरान् प्राणान् पृथगेव सन्निधत्ते । योऽयं मध्यमः प्राणः कुविदङ्गेत्यादिना प्राणव्यवस्थापकत्वान्मध्य-मत्वात् सर्वदेवोपास्यत्वाच्च वायुरेवेति प्रतीयते । अतो-ऽब्रवीत् वामनशब्दादेव विष्णुरिति प्रमितः । न हि श्रुतेर्लिङ्गं बलवत् । श्रुतिलिङ्ग समाख्या च वाक्यं प्रक-

हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ २५ ॥
तदुपर्य्यपि बादरायणः सम्भवात् ॥ २६ ॥
विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्२७

रथं तथा। पूर्वं पूर्वं वलीयः स्यादेवमागमनिर्णय इति स्कान्दे ॥ २४ ॥

-- तच लिङ्गं विष्णोरेव। तस्यैव, प्राणत्वोक्तेः स्वदेवत्व-प्राप्तोऽभव इति। सर्वगतस्यापि तस्याङ्गुष्ठमात्रत्वं हृद्या-काशापेक्षया युज्यते। इतरप्राणिनामङ्गुष्ठाभावेऽपि मनु-ष्याधिकारत्वान्न विरोधः ॥ २५ ॥

मनुष्याणामेव वेदविद्यायामधिकार --इत्युक्तम्। तिर्य्यगाद्यपेक्षयैव मनुष्यत्वविशेषणमुक्तं न तु देवाद्यपेक्ष-येत्याह। तदुपरि मनुष्यणां सतां देवावित्यप्युपरि सम्भवति हि तेषां विशिष्टबुद्धयादिभावा तिर्य्यगादीनां तदभावादभावः तेषामपि यत्र विशिष्टबुद्धयादिभाव-स्तत्राविरोधः निषेधाभावात् दृश्यन्ते हि तरितर्य्या-दयः ॥ २६ ॥

मनुष्या एव देवादयो भवन्तोति तदुपरीत्युक्तम्। तत्र यदि मनुष्याः सन्तो देवादयो भवन्ति तत् पूर्वं देवता-भावाद्देवतोद्दिष्टकर्मणि विरोध इति चेत् न अनेकेषां देवतापदप्राप्तेर्दर्शनात्। तेन नाकं महिमानः स चान्त यत्र पूर्वं साध्याः सन्ति देवा इति ॥ २७ ॥

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमाना-भ्याम् ॥ २८ ॥

अत एव च नित्यत्वम् ॥ २९ ॥

समान-नाम-रूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥ ३० ॥

वाचा विरूपाणान्तायत्वात् विप्रुतेरामनिश्चयात्रित्यत्वापेचत्वाश्च मूलप्रमाणस्य स्वतःप्रामाण्यसिद्धेय नित्यत्वाद्देदस्य । तदुदितानां देवानामनित्यत्वात् पुनरन्यभावनियमाभावाच्च शब्दे विरोध इति चेत्—न, सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । यथैव नियमः काले सुरादिनियमस्तथा । तस्मात्तानीदृशं क्वापि विश्वमेतद्भविष्यतीत्यादेः । अत एव शब्दात् तेषां प्रभवनियमात् । महतां प्रत्यचाद् यथेदानीं तथोपर्यपि देवादयो भविष्यन्तीतीतरेषामनुमानाच्च ॥ २८ ॥

अत एव शब्दस्य नित्यत्वादेव च देवप्रवाहनित्यत्वं युक्तम् ॥ २९ ॥

अतीतानागतानां देवानां समाननामरूपत्वात् प्राप्तपदानां मुक्तपदप्रवृत्तावप्यविरोधः । यथापूर्वमिति दर्शनात् । अनादि निधना नित्या वागुत्सृष्टा स्वयम्भुवा । ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः । वेदशब्देभ्य एवादौ निर्ममे स महेश्वर इति स्मृतेश्च ॥ ३० ॥

मध्वादिष्वसम्भवादनधिकारः जैमिनिः ॥ ३१ ॥

ज्योतिषि भावाच्च ॥ ३२ ॥

भावात्तु बादरायणोऽस्ति हि ॥ ३३ ॥

शुगस्य तदनादर-श्रवणात् तदाद्रवणात् सूच्यते हि ॥ ३४ ॥

वसूनामेवैको भूत्वेत्यादिना प्राप्यफलत्वात् प्राप्यपदानां मध्वादिविद्यास्वनधिकारं जैमिनिर्मन्यते ॥ ३१ ॥

ज्योतिषि सर्वज्ञत्वेऽभावाच्च। आदित्यप्रकाशेऽन्तर्भाववत् तज्ज्ञाने सर्ववसूनाम् अन्तर्भावात्। नित्यसिद्धत्वाद् विद्यानाम्। ३२।

फले विशेषाभावात् प्राप्तपदानामपि देवानां मध्वादिष्वधिकारं बादरायणो मन्यते, अस्ति हि प्रकाशविशेषः। यावत् सेवापरे तत्त्वे तावत् सुखविशेषता। सभावाच्च प्रकाशस्य परमेकमृते हरिम्। तेषां सामर्थ्ययोगाच्च देवानामप्युपासनम्। सर्वं विधीयते नित्यं सर्वयज्ञादि कर्म चेति स्कान्दे। यत्फलानधिकारमात्रं जैमिनिमतम् अतो न मतविरोधः। सर्वज्ञस्यैव व्यासस्य लेकदेशविचिन्तितम्। स्वीकृत्य मुनयो ब्रूयुस्तन्मतं न विरुध्यत इति च ब्राह्मे। मनुष्याधिकारत्वादित्युक्तेऽविशेषाच्छूद्रस्याप्यह हारेवा शूद्रेति पौत्रायणोक्तेरधिकार इति। अत आह। ३३॥

नासौ पौत्रायणः शूद्रः शुचाद्रवणमेव शूद्रत्वं ५।७५।

क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ३५
संस्कार-परामर्शात् तदभावाभिलापाच्च ॥३६॥
तदभावनिर्द्धारणे च प्रवृत्तेः ॥ ३७ ॥
श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ॥ ३८ ॥

एनमेतं मन्त्रमित्यनादरश्रवणात्। स ह सजिहान एव क्षत्तारमुवाचेति सूच्यते हि ॥ ३४ ॥

अतमस्त्वतरोरथ इति चित्ररथसम्बन्धिलेन लिङ्गेन पौत्रायणस्य क्षत्रियत्वावगतेश्च। रथस्त्वश्वतरीयुक्तश्चित्र इत्यभिधीयते इति ब्राह्मे। यत्र त्वष्टोश्वत्र न वेदो यत्र नो रथ इति च ब्रह्मवैवर्त्ते ॥ ३५ ॥

अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेत्यध्ययनार्थं संस्कारपरामर्शात्। नाग्निर्न यज्ञो न क्रियासंस्कारो न व्रतानि शूद्रस्येति पैङ्गिश्रुतौ संस्काराभावाभिलापाच्च। स्त्रीसमस्त्रीणान्तु न शूद्रवत्। सपत्नी मेऽपराधमपतिं स इत्यादिष्वधिकारदर्शनात। संस्काराभावेनाभावस्तु सामान्येन। अस्ति च तासां संस्कारः, स्त्रीणां प्रदानकर्म्मैव यथोपनयनं तथैव स्मृतेः ॥ ३६ ॥

नाहमेतद्वेद भो यद्गोत्रोऽहमस्मीति सत्यवचनेन सत्यकामस्य शूद्रत्वाभावनिर्धारणे हारिद्रुमतस्य नैतदब्राह्मणो विवक्तुमर्हतीति तत्संस्कारे प्रवृत्तेश्च ॥ ३७ ॥

श्रवणे त्रपुजतुभ्यां श्रोत्रपरिपूरणम्। अध्ययने जिह्वाच्छेदः। अर्थावधारणे हृदयविदारणमिति प्रतिषेधात्।

कम्पनात्॥ ३९॥
ज्योतिर्दर्शनात्॥ ४०॥

नाग्निर्न यत्र शूद्रस्य तथैवाध्ययनं कुतः। केवलैव तु शुश्रूषा त्रिवर्णानां विधीयते इति स्मृतेश्च। विदुरादीनां तूत्पन्न ज्ञानत्वात् कश्चिद्विशेषः॥ ३८॥

यदिदं किञ्च जगत् सर्वं प्राणये जातिनिःसृतम्। महद्भयं वज्रमुद्यतं यत्र तद्विदुरमृतास्ते भवन्तीत्युद्यतवज्रज्ञाना न्मीचः प्रतीयत इति अतोऽब्रवीत्। एजनीति कम्पनवचना दुद्यतवज्रो भगवान्। को ह्येवान्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्यादिति हि श्रुतिः। प्राणस्य प्राणमुत चक्षुषश्चक्षुरिति च। नभस्वतोऽपि सर्वाः सुचेष्टा भगवतो हरेः। किमुतान्यस्य जगतो यस्य चेष्टा नभस्वत इति स्कान्दे। चक्रवज्रसुधादेष वर्जनाद्वज उच्यते। खण्डनात् खड्ग एवैष इति नाम्ना हरिः स्वयमिति ब्रह्मवैवर्त्ते॥ ३९॥

हृदय आहितं ज्योतिः परमात्मेत्युक्तं तत्र योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिःपुरुष इत्यत्रोभौ लोकावनुसञ्चरतीति वचनाद् जीव इति प्रतीयत इति। अत उच्यते। विष्णुरेव ज्योतिर्विष्णुरेवात्मा विष्णुरेव ब्रह्म विष्णुरेव बलं विष्णुरेव यशो विष्णुरेवानन्द इति दर्शनाच्चतुर्वेदशिखायां ज्योतिर्विष्णुरेव प्राज्ञेनात्मा अन्वारूढ उत्सर्ज्जनाद् यातीति वचनात्तस्यापि लोकसञ्चरणमस्त्येव॥ ४०॥

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥
सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥
पत्यादिशब्देभ्यः ॥ ४३ ॥

इति वैयासिक-ब्रह्मसूत्रे प्रथमाध्यायस्य
तृतीयः पादः ।

सर्वाधारत्व विष्णोरुक्तं तत्राकाशो वै नाम नामरूप-योर्निर्वहितेत्याकाशस्य प्रतीयते । वै नामेति प्रसिद्धोपदेशात् प्रसिद्धाकाशग्रहणाङ्गीकर्त्तव्य इति । अत उच्यते । ते यदन्तरा तद्ब्रह्मेत्यर्थान्तरत्वादिव्यपदेशादाकाशो हरिरेव । अव्यर्णम् । ततो वाचो निवर्त्तन्ते अप्राप्य मनसा सहेत्यादि श्रुतेः तस्य हि तन्नवचणम् । अनामा सोऽप्रसिद्धत्वादरूपो भूतवर्ज्जनादिति च ब्राह्मे ॥ ४१ ॥

असङ्गत्वं परमात्मन उक्तं, तच्च स यत्तत्र किञ्चित् पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इति स्वप्नादि द्रष्टुः प्रतीयते । स च जीवः प्रसिद्धेरिति अतो वक्ति । प्राज्ञेनात्मना सम्परिष्वक्तो न वाह्यं किञ्चन वेदनान्तरम् । प्राज्ञेनात्मनान्वारूढ़ उत्सर्ज्जनाद् यातीति भेदव्यपदेशान्न जीवः परस्त्र वा असङ्गः स्वप्नादिद्रष्टृत्वं च सर्वज्ञत्वात्तस्यैव युज्यते ॥ ४२ ॥

एष नित्यो महिमा ब्राह्मणस्येति ब्राह्मणस्यापि नित्य-महिमा प्रतीयते स च ब्राह्मणः स वा एष महाजन आत्मा

आनुमानिकमप्येकेषामिति चेन्न शरीररूपक विन्यस्त-गृहीतेर्दर्शयतति च ॥ १ ॥

त्वलशब्दादिरिति प्राप्त देवानाञ्च विद्याकर्मणोः पद-प्राप्तिः सूचिता तदुपर्यपीति अतो ब्रवीति। सर्वस्याधिपतिः सर्वस्येशान. स वा एष नेति नेतोत्यादि शब्देभ्यो नित्य-महिमो विष्णुरेव उतामृतत्वस्येशानो यदन्नेनातिरोहति। सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशाविधर्मणि स यो तो श्रुत इत्यादिश्रुतिभ्यस्तस्यैव हि ते शब्दाः ॥४३॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमतब्रह्म सूत्रभाष्ये प्रथमाध्यायस्य तृतीयः पाद समाप्तः।

ओं। श्रुतिलिङ्गादिभिरन्यत्रैव प्रसिद्धानामपि शब्दानां सामर्थ्येन विशेषहेतुभिर्विष्णावेव प्रवृत्तिं दर्शयत्यस्मिन पादे। तत्तु समन्वयादिति। सर्वशब्दाना परमे समन्वय उक्तः तत्र युज्यते। अव्यक्तात् पुरुषः पर इति साख्यानु-मानकल्पित प्रधानमप्येकेषां शाखिनामुच्यते इति चेत् न, तस्यैव पारतन्त्र्याच्छरीररूपकेऽव्यक्ते विन्यस्तस्य परमात्मन एवाव्यक्तशब्देन गृह्यते। कमत्ययः कुत्सने। परमात्मन एवाव्यक्तशब्दमत्तत्वेन तच्छरीररूपत्वादितरस्याव्यक्तः शब्दः तुच्छेनाभ्वपिहितं तदासोदिति दर्शयति च। अव्यक्त-

सूक्ष्मन्तु तदर्हत्वात् ॥ २ ॥

तदधीनत्वादर्थवत् ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥

वदतीति चेन्न प्राज्ञो हि ॥ ५ ॥

अचलं शान्तं निष्कलं निष्क्रियं परम् । यो वेद हरिमात्मानं स भयादनुमुच्यत इति पिप्पलादिशाखायाम् । अक्षरं ब्रह्म परमम् इत्युक्त्वा अव्यक्तोऽक्षर इत्युक्त इति वचनाच्च ॥ १ ॥

सूक्ष्ममेवाव्यक्तशब्देनोच्यते यदव्यक्ततामर्हति । यत्तत् सूक्ष्मं परमं वेदितव्यं नित्यं पदं वैष्णव ह्यामनन्ति । यत् तल्लोकान् विदुर्लोकसारं विदन्त्येतत् कवयो योगनिष्ठा इति पिप्पलादिशाखायाम् । मुख्ये च विद्यमानेनामुख्यं युक्तम् ॥ २ ॥

तदधीनत्वाच्चाव्यक्तत्वादीनां तस्यैवाव्यक्तत्वपरावरत्वादिकमर्थवत् । यदधीनो गुणो यस्य तद्गुणी सोऽभिधीयते । यथा जीवः परात्मेति यथा राजा जयीत्यपि इति स्कान्दे ॥ ३ ॥

अन्यस्य न वाच्यत्वं युज्यते ॥ ४ ॥

महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते इति ज्ञेयत्वं वदतीति चेत् न, प्राज्ञः परमात्मा हि तत्रोच्यते । अणोरणीयान्महतो महीयानिति तस्यैव महतो महत्त्वम् । सर्वस्मात् परस्य महतोऽपि परत्वं युज्यते ॥ ५ ॥

प्रकरणात् ॥ ६ ॥

त्रयाणामेव चैव मुपन्यासः प्रश्नश्च ॥ ७ ॥

महद्वच्च ॥ ८ ॥

चमसवदविशेषात् ॥ ९ ॥

ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ॥ १० ॥

सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदं इति तस्य ह्येतत् प्रकरणम् ॥ ६ ॥

त्रयाणामेव पितृसोम्यत्वस्य स्वर्ग्याग्निपरमात्मनां प्रश्न उपन्यासश्च । अविज्ञान प्रार्थनश्च प्रश्न इत्यभिधीयते इति वचनान्न विरोधः ॥ ७ ॥

यथा हिमवच्छब्दो महत्त्वे प्रसिद्धोऽपि परमात्मन एव मुख्यः, एवमितरेऽपि ॥ ८ ॥

यथा चमसशब्दोऽन्यत्र प्रसिद्धोऽपीदं तच्छिरः एष ह्यर्वाग्बिलश्चमस ऊर्द्ध बुध्न इति श्रुतेः शिरोवाचकः । एवमव्यक्तादिशब्दाः सर्वेऽन्यत्र प्रसिद्धा अपि नामानि सर्वाणि यमाविशन्ति । तं वै विष्णुं परममुदाहरन्तीत्यादि श्रुतेः । परमात्माभिधायका एव अविशेषात् श्रुतेः ॥ ९ ॥

वसन्ते वसन्ते ज्योतिषा यजेतेत्यादि कर्म्माभिधायकस्य कर्म्मक्रमादिविरोधान्न युज्यत इति अत आह ज्योतिरित्यादि । कर्म्मवाचकत्वेन प्रसिद्धाभिधेयोऽपि स एव । एष इमं लोकमभ्यार्चदित्युपक्रम्य ता वा एताः सर्वा

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ ११ ॥
न सङ्ख्योपसंग्रहादपि नानाभावादतिरेकाच्च १२
प्राणादयो वाक्यशेषात् ॥ १३ ॥
ज्योतिषैकेषामसत्यन्ने ॥ १४ ॥
कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः ॥१५

ऋचः सर्वे वेदाः सर्वे एकैव व्यवहृतिः प्राण एव प्राणऋच इत्येव विद्यादिति ह्यधीयत एके ॥ १० ॥

मधुविद्यादिवत् सर्वशब्दार्थत्वेन परस्य कल्पनोपदेशाच्च न कर्मक्रमादिविरोधः ॥ ११ ॥

यस्मिन् पञ्च पञ्च जना आकाशस्य प्रतिष्ठित इत्यादिषु बहुसंख्योपसंग्रहेऽपि न विरोधः। तस्यैवाकाशादिषु नानाभावात्तदतिरिक्तस्वरूपवत्त्वाच्च ॥ १२ ॥

पञ्च पञ्चजनानाह प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मन इति वाक्यशेषात् ॥ १३ ॥

तद्देवा ज्योतिषां ज्योतिरित्यनेन कारणानां पञ्चकम् ॥ १४ ॥

अवान्तरकारणत्वेनापि स एवोच्यते इति वक्ति आकाशादिष्ववान्तरकारणत्वेन स एव स्थितः यथा व्यपदिष्टस्यैव परस्य य आकाशे तिष्ठन्नित्यादिना आकाशादिषूक्तेः ॥ १५ ॥

समाकर्षात् ॥ १६ ॥

जगद्वाचित्वात् ॥ १७ ॥

जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥१८॥

अन्यार्थन्तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १९ ॥

सर्वशब्दानां परमात्मवाचकत्वे कथमन्यत्र व्यवहार इति अतोऽत्रवोत। परमात्मवाचिनः शब्दा अन्यत्र समाकृष्य व्यवह्रियते। परस्य वाचका. शब्दा समाकृष्टेतरेष्वपि। व्यवह्रियन्ते सतत लोकवेदानुसारत इति पाद्मे ॥ १६ ॥

तर्हि कथं तेषां शब्दाना जगति प्रसिद्धि.। जगति व्यवहारो लोकस्य न तु परमात्मनि तथा। अतो जगति प्रसिद्धिः शब्दानाम ॥ १७ ॥

तदधीनत्वात्तच्छब्दवाच्यमित्युक्तम्। तज्जीवमुख्यप्राणयोर्लिङ्गम्। अस्य वटेकाशाभ्याम् जीवो जहात्यय स शुष्यति वायुना हि सर्वे लोका नेनीयन्ते इत्यादि श्रुतिभ्य इति चेत् न, उपासनात्रैविध्यादिति व्याख्यातत्वात्। १८।

परमात्मज्ञानार्थं कर्मादिकमपि वदतीति जैमिनि। कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञात भवतीति तस्मै होवाच द्वे विद्ये वेदितव्ये कतमे भगवः स आदेशो

वाक्यान्वयात् ॥ २० ॥

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २१ ॥

उत्क्रमिष्यत एवं भावादित्यौडुलोमिः ॥२२॥

अवस्थितेरिति काशकृत्स्नः ॥ २३ ॥

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २४ ॥

भवतीति यथा सौम्यैकेन मृत्पिण्डेनेत्यादिना प्रश्नव्याख्यानाभ्याम् । एवमपि चैके पठन्ति । यस्तं न वेद किमृचा करिष्यतीति ॥ १९ ॥

वाक्यस्याप्येवमन्वयो युज्यते पृथक् स्थितस्यापि परमात्मनः ॥ २० ॥

नान्यः पन्था विद्यते ऽयनायेति प्रतिज्ञासिद्धिर्लिङ्गत्वेन कर्म्मादिकमुच्यत इत्याश्मरथ्यः । यस्मादेवमनित्यफलमन्यत्तस्मान्नान्यः पन्था इति ॥ २१ ॥

उत्क्रमिष्यतो मुमुक्षोः कर्म्मादिना भाव्यं साधनसाधनत्वेन अतस्तदुक्तमित्यौडुलोमिः मन्यते ॥ २२ ॥

सर्वं परमात्मन्यवस्थितमिति वक्तुं तद्वचनमिति काशकृत्स्नः । कृष्णद्वैपायनमतादिकदेशविदः परे । वदन्ति यथा प्राप्तं न विरोधः कश्चनेति पाद्मे ॥ २३ ॥

कोऽयन्ता अपि तस्मिन्नेवेत्याह इन्द्रैतमेव पुरुषं सर्वाणि नामान्यभिवदन्ति । यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रमभिविशन्त्येवमेवैतानि नामानि

अभिध्योपदेशाच्च ॥ २५ ॥

साक्षाच्चोभयाम्नानात् ॥ २६ ॥

आत्मकृतेः परिणामात् ॥ २७ ॥

सर्वाणि पुरुषमभिसंविशन्तीति प्रतिज्ञादृष्टान्तानुपरोधात् प्रकृतिशब्दवाच्योऽपि स एव ॥ २४ ॥

मायान्तु प्रकृतिं विद्यान्मायिनं च महेश्वरम् । महामायेत्यविद्येति नियतिर्मोहिनीति । च । प्रकृतिर्वासनेत्येव तवेच्छानन्त ! कथ्यत इति वचनादभिध्यैव च प्रकृतिशब्देनोच्यते । सोऽभिध्यासप्रकृतिः स प्रज्ञा स आनन्द इति श्रुतेरभिध्या च स्वरूपमेव । 'ध्यायतीं ध्यानरूपासौ सुखी सुखमतीव च । परमैश्वर्ययोगेन विदर्थतयेच्यत इति आग्नाग्रे एषस्तेरय पुरुष एष प्रकृतिरेष आत्मैष ब्रह्मैष लोक एष चालोको योऽसौ हरिरादिरनादिरनन्तोऽनन्तः परमः परादिस्वरूप इति पैङ्गिश्रुतौ साक्षादेव प्रकृतिपुरुषत्वाम्नानात् । २५ । २६ ।

प्रकर्षेण करोतीति प्रकृतिरिति योगाच्च प्रकृतावनुप्रविश्य तां परिणामयेतत् परिणामनियामकत्वेन तत्स्थित्वात्मनो बहुधाकरणात् अथ होष आत्मा प्रकृतिमनुप्रविश्यात्मानं बहुधा चकार तस्मात् प्रकृतिरित्याचक्षत इति भाल्लवेयश्रुतिः । अविकारोऽपि परमः प्रकृतिस्तु विकारिणी । अनुप्रविश्य गोविन्दः प्रकृतिरभिधीयत

योनिश्च हि गीयते ॥ २८ ॥

एतेन सर्वे व्याख्याता ॥२९॥

इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीम-
दानन्दतीर्थभगवत्पूज्यपादविरचिते प्रथ-
माध्यायस्य चतुर्थपादः समाप्तः।

इति नारदीये। न चान्यत् कल्प्यम् अप्रमाणक-
त्वात्। २७॥

अव्यवधानेनोत्पत्तिद्वारत्वञ्च प्रकृतित्वं तथास्यैव हि
गीयते। यद्भूतयोनिं परिपश्यन्ति धीरा इति व्यवधाने
प्रसूतिस्तु पुंस्त्वं विद्वद्भिरिष्यते। सृतिरव्यवधानेन प्रकृति
त्वमिति स्थितिः। उभयात्मकसूतित्वाद्वासुदेवः परः
पुमान्। प्रकृतिः पुरुषश्चेति शब्दैरेकोऽभिधीयत इति
ब्रह्माण्डे॥ २८॥

एतेन सर्वे शून्यादि शब्दा अपि व्याख्याताः। एष
ह्येव शून्य एष ह्येव तुच्छ एष ह्येवाभाव एष ह्येवाव्यक्तोऽ-
दृश्योऽचिन्त्यो निर्गुणश्चेति महोपनिषदि। शब्दं कुरुते
विष्णुरदृश्यः सन् परः स्वयम्। तस्माच्छून्यमिति प्रोक्त-
स्तोदनात्तुच्छ उच्यते। नैष भावयितुं योग्यः केनचित्
पुरुषोत्तमः। अतो भावं वदन्त्येनं नाम्यत्वाद्वाग इत्यपि।
सर्वस्य तदधीनत्वात्तच्छब्दाभिधेयता। अन्येषां व्यव-
हारार्थमिष्यते व्यवहर्तृभिरिति महाकौर्मे एतेन तदधी-

नत्वादयुक्तयुक्तिसमुदायेन। अवधारणार्थं सर्वस्याप्युक्तस्याध्यायमूलतः। द्विरुक्तिं कुर्वते प्राज्ञा अध्यायान्ते विनिर्णये इति वराहसंहितायाम्॥ २८॥

इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थ भगवत् पूज्यपाद विरचिते प्रथमाध्यायस्य चतुर्थपादः समाप्तः।

अथ द्वितीयोऽध्यायः।

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्॥ १॥

इतरेषाञ्चानुपलब्धेः॥ २॥

उक्तेऽर्थे विरोधं दर्शयत्यनेनाध्यायेन। प्रथमपादे युक्तिविरोधं प्रथमतः स्मृत्यविरोधं दर्शयति सर्वथा रुद्रादयः अतस्तेषां वचनविरोधेऽप्रामाण्यमेव स्यादिति चेत् न अन्यस्मृतीनां विष्णादिभिर्नितरां सर्वैरेव कृतत्वाच्छ्रुतेराधिक्यं सिध्यति॥ १॥

इतरेषां तासु स्मृतिप्रोक्तानां फलादीनां प्रत्यक्षतोऽनुपलब्धेरप्रामाण्यं तासां युक्तं च प्रद्वेषं मार्गोपलब्धिरयोक्ता॥ २॥

एतेन योगः प्रत्युक्तः ॥ ३ ॥

न विलक्षणत्वादस्य तथात्वञ्च शब्दात् ॥४॥

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥५॥

योगफलं प्रत्यक्षोपलब्धिरिति न मन्तव्यम् । उक्ताभ्यासे तत्तत्काल एव फलादृष्टेः ।

नैव श्रुतिस्तदनुसारिस्मृतिश्च तदुक्तानुपलब्धेरप्रामाण्यं विलक्षणत्वान्नित्यत्वात्तदनुसारित्वाच्च । न हि नित्यदोषाः कल्प्याः स्वतश्च प्रामाण्यं अन्यथानवस्थितेः । न चक्षुर्न श्रोत्रं न तर्को न स्मृतिर्वेदा ह्येवैनं वेदयन्तीति भाल्लवियश्रुतेश्च । नित्यत्वञ्च शब्दादेव प्रतीयते । वाचाविरूपनित्ययेत्यादौ । अनादिनिधना नित्येति च स्मृतिः ॥ ३ ॥

अधिकारिणां फलं भविष्यत् पुराणि च । ऋग्यजुःसामाथर्वाख्या मूलरामायणं तथा । भारतं पञ्चरात्रञ्च वेदा इत्येव शब्दिताः । पुराणानि च यानीह वैष्णवानि विदो विदुः । स्वतःप्रामाण्यमेतेषां नात्र किञ्चिद्विचार्यते । यद्युक्तं न दृश्येत पूर्वकर्मात्रिकारणम् । नाप्रामाण्यं भवेदेषां दृश्यते ह्यधिकारतः । इतः प्रामाण्यमन्येषां न स्वतस्तु कथञ्चन । अदृष्टोक्तौ ततस्तेषामप्रामाण्यं न संशय इति ॥ ४ ॥

मृदब्रवीदापोऽब्रुवन्नित्यादि वचनाद्युक्तिविरुद्धो वेद इत्यतोऽब्रवीत् । मृदाद्यभिमानिदेवतैव तत्र व्यपदिश्यते । तेषाञ्चेतरेभ्यो विशिष्टं सामर्थ्यमनुगतिश्च सर्वत्र । अतस्तासां सर्वमुक्तं युज्यते ॥ ५ ॥

दृश्यते तु ॥ ६ ॥

असदिति चेन्न प्रतिषेधमात्रत्वात् ॥७॥

अपीतौ तद्वत् प्रसङ्गादसमञ्जसम् ॥ ८ ॥

न तु दृष्टान्तभावात् ॥ ९ ॥

स्वपक्षदोषाच्च ॥ १० ॥

तासां सामर्थ्यं महद्भिः भविष्यत् पुराणे । पृथिव्याद्यभिमानिन्यो देवताः प्रथितौजसः । अचिन्त्याः शक्तयस्तासां दृश्यन्ते मुनिभिश्च ताः । ताश्च सर्वा गता नित्यं वासुदेवैकसंश्रया । इति ॥ ६ ॥

असदेवेदमग्र आसीत् । असतः सदजायतेत्यादिना असतः कारणत्वोक्तेर्विरोध इत्यतो वक्ति । प्रतिषेधमात्रत्वान्नासतः कारणत्वं युक्तम । असतः कारणत्वाद्युक्तिविरुद्धं वेदवाक्यमित्येतदच्च निषिध्यते । सर्वशब्दानां ब्रह्मणि समन्वयेऽपि तदधीनत्वादर्थवदित्यादिनाऽमुख्यत्वेनान्यस्यापि वाच्यत्वाङ्गीकारादुभयत. प्राप्तिः । तथाच श्रुतिप्राप्तमेधासत्त्वमत्र निषिध्यते समस्यापरि निषेधात अर्थाद्युक्तिविरोधोऽत्र निराक्रियते । ७ ॥

स अत उत्पत्तौ प्रलयेऽपि सर्वासत्वमेव स्यात् । ८ ॥

प्रलये सर्वासत्वं भावे दृष्टान्तभावादेव न युज्यते । सत उत्पत्तिः सविशेषनाशश्च लोकेदृष्टः दृष्टान्ताभावादेव ॥ ९ ॥ १० ॥

तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः॥ ११॥

एतेन शिष्टापरिग्रहा अपि व्याख्याताः॥१२॥

एतावानेव तर्क इति प्रतिष्ठापकप्रमाणाभावात्तर्कादन्यथानुमेयमिति चेन्न। एवमपि प्रमाणासिद्धेऽपि मोक्षेऽन्यथानुमेयत्वादनिर्मोक्षप्रसङ्गः। अतो यावत् प्रमाणसिद्धं तावदेवाङ्गीकर्त्तव्यं नातोऽन्यच्छक्यम्। यावदेव प्रमाणेन सिद्धं तावदङ्गीकर्यान्नैव चान्यत्र शक्यं मानमूतं क्वचिदिति वामने॥ ११॥

एतेन दृष्टान्तभावेनाभावेन विशिष्टा अपरिग्रहा अपि विरुद्धसिद्धान्ताः। अकर्त्तृकत्वात् चेतनकर्त्तृत्वजीवकर्त्तृत्वादयोऽपि। अकस्मादोदमाविरासीदकस्मान्तिष्ठत्यकस्माल्लयमभ्युपैति। प्रधानादिदमुत्पन्नं प्रधानमधितिष्ठति प्रधाने लयमभ्येति न ह्यन्यत् कारणं मतम्। जीवाद्भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चलाः। जीवे तु लयमृच्छन्ति न जीवात् कारणं परमित्यादि श्रुतिप्राप्ता निराकृताः यथा दुःखादिषु जीवस्याप्यतन्त्रत्वमेवमन्येष्वपीति दृष्टान्तः। श्रुतिगतिश्च ब्रह्मवाचकत्वेन दर्शिता। यत्रान्यवाचकत्वेऽप्यविरोधस्तत्रान्यदप्यमुख्यतयोच्यते। यत्र विरोधस्तत्र ब्रह्मैवोच्यत इति नियमः॥ १२॥

भोक्त्रापत्तेरविभागश्चेत स्याल्लोकवत ॥१३॥
तदनन्यत्वमारम्भणशब्दादिभ्यः ॥१४॥

कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्तीति मुक्तजीवस्य परप्राप्तिरुच्यते। अतस्तयोरविभागः। अतः पूर्वमपि स एव। न ह्यन्यस्यान्यत्वं युज्यत इति चेन्न-स्याल्लोकवत्। यथा लोके उदक उदकान्तरस्थैकीभावव्यवहारेऽप्यन्तर्भेदोऽस्त्येव एव स्यादन्यत्रापि। तथाच श्रुतिः। यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवतीति स्कान्दे च। उदकं तूदके सिक्तं मिश्रमेव यथा भवेत्। न चैतदेव भवति यतो वृद्धिः प्रदृश्यते। एवमेव हि जीवोऽपि तादात्म्यं परमात्मनः। प्राप्तोऽपि नासौ भवति स्वातन्त्र्यादिविशेषणात् इति। ब्रह्मेशानादिभिर्देवैर्यत् प्राप्तं नैव शक्यते। तद्यत् स्वभावकैवल्यं स भवान् केवलो हरिरिति च। न ते महित्वमन्वश्नुवन्ति। न ते विष्णोर्जायमानो न जायत इत्यादि च फलतोऽपि युक्तिविरोधेऽन्तर्भावाच्चाक्तम् ॥ १३ ॥

स्वतन्त्रबहुसाधनदृष्टेर्लोकदृष्टान्तेनैव ब्रह्मणः स्वरूपसामर्थ्यादेव तस्य सृष्टिः किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित् कथमासीदिति ह्याक्षेप। अधिष्ठानाद्यनुक्तेः। चादिशब्दात् युक्तिभिश्च। परतन्त्रो ह्यपेक्षेत स्वतन्त्रः किमपेक्षते। साधनानां साधनत्वं यतः किं तस्य साधनैरित्यादिभिः ॥ १४ ॥

भावे चोपलब्धेः ॥ १५ ॥

सत्त्वाच्चावरस्य ॥ १६ ॥

असद्व्यपदेशान्नेति चेन्न धर्म्मान्तरेण वाक्यशेषात् ॥ १७ ॥

स्वतन्त्रसाधनभावे प्रमाणैरुपलभ्येत । अनुक्तं पञ्चभिर्वेदैर्न वस्त्वस्ति कुतश्चन । अतो वेदत्वमेतेषां यतस्ते सर्ववेदका इति स्कान्दे ॥ १५ ॥

अद्भ्यः सम्भूतः पृथिव्यै रसाच्चेत्यादि साधनान्तरप्रतीतेः कथमनुपलब्धिरित्यत आह । अवरस्य तदधीनस्य साधनस्य सत्त्वात् । काल आसीत् पुरुष आसीत् परम आसीत् तद्यदासीत्तदा सतम् आसीदेष ह्येक एव परम आसीदस्यैतदासीत् न ह्येतदासीद्धिति कापायणश्रुतिः ॥ १६ ॥

नासदासीन्नो सदासीत्तदानीमिति सर्वस्यासत्त्वव्यपदेशान्नेति चेन्न अस्वतन्त्रत्वपारतन्त्र्यादिधर्म्मान्तरेण हि तदुच्यते तम आसीदित्यादि वाक्यशेषात् न चान्यत्र प्रमाणमस्ति । अजा ह्येका जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः । अनाद्यनन्तं जगदेतदीदृक् प्रवर्त्तते नात्र विचार्यमस्ति । न चान्यथा क्वापि च कस्य चेदमभूत् पुरा नापि तथा भविष्यत् । असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम् । असत्यमाहुर्जगदेतदज्ञाः शक्तिं परेशस्य न विदुः परां हि । यः सत्यरूपं जगदेतदीदृक् स्रष्टा भूरात्मा सत्यकर्मा महात्माहुः सत्यकर्म्मेति सत्यं ह्येवेद विश्वमसौ सृजते ।

युक्तेः शब्दान्तराच्च ॥ १८ ॥

पटवच्च ॥ १९ ॥

यथा च प्राणादि ॥ २० ॥

अथैनमाहुर्नित्यकर्मेति । नित्यं ह्यावासो कुरुते । यच्चकेत सत्यमित्येतमेवमित्यादि स्मृतिश्रुतिभ्यश्च । परस्परविरोधे तु वाक्यानां यत्र युक्तता तत्रैवार्थः परिज्ञेयो नावाक्या युक्ति रिष्यत इति बृहत्संहितायाविरुद्धवत् प्रतीयते न आगम मात्र एवं मिथः । तत्र दृष्टानुसारेण तेषामर्थोऽन्ववेक्ष्यत इति च । ईशानोऽसौ जगन्मिथ्या न पूज्यो गुरुरित्यपि । इत्यादि बुद्धिरुद्धानि प्रमाणान्यपि युक्तय । प्रमाणैर्बहुभि-र्ज्ञेया भासा इति वैदिकैः । वेदवेदानुसारेषु विरोधेऽन्या-र्थकल्पना । अन्येषान्तु विरुद्धानां विप्रलम्भोऽथ विभ्रम इति भागवततन्त्रे । शास्त्रार्थयुक्तोऽनुभवः प्रमाणन्तूत्तमं मतम् । मध्यमत्वागमो ह्येव प्रत्यक्षमधमं स्मृतम् । प्रत्यक्षयो रागमयोर्विरोधे निर्णयाय तु । अनुमया न स्वतन्त्रा प्रमाण-पदवीं ययुरिति पुरुषोत्तमतन्त्रे ॥ १७ ॥

साधनानां साधनत्वं यदात्माधीनमिष्यते । तदा साधनसम्पत्तिरैश्वर्यद्योतिका भवेदित्यादेः साधनान्तरेण सृष्टिर्युक्ता । अद्य सम्भूतो हिरण्यगर्भं इत्यष्टावित्यादि-शब्दान्तराच्च ॥ १८ ॥

साधनान्तरेण हि पटादिसृष्टिर्दृष्टा ॥ १९ ॥

तच्च साधनं जातं तेनानुप्रविष्टमेव । यथा शरीरेन्द्रि-

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥२१॥

अधिकन्तु भेदनिर्देशात् ॥ २२ ॥

अश्मादिवच्च तदनुपपत्तिः ॥ २३ ॥

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २४ ॥

यादि। प्रकृतिं पुरुषञ्चैव प्रविश्य पुरुषोत्तमः। क्षोभयामास भगवान् सृष्ट्यर्थं जगतो गुरु इति कौर्म्मे ॥ २० ॥

जीवकर्त्तृत्वपक्षः श्रुतिप्राप्तो ऽ विस्तराद्विराक्रियते। जीवकर्त्तृत्वपक्षे हितकरणमहितकरणञ्च न स्यात् ॥ २१ ॥

न च ब्रह्मणः श्रमचिन्तादिदोषप्राप्तिः अधिकशक्तिमत्त्वात् श्रोता मन्ता द्रष्टा देष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामन्तरपुरुषः एष त आत्मा सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीति निर्देशात् ॥ २२ ॥

दृष्टवच्चास्वतन्त्रत्वात् स्वतः कर्तृत्वानुपपत्तिर्जीवस्य। यथा दारुमयीं योषां नरः स्थिरसमाहितः। सङ्कत्य अङ्गमङ्गानि तथा राजन्निमाः प्रजा' इति महाभारते ॥ २३ ॥

जीवेनैव कार्य्योपसंहारदर्शनात्तस्य कर्तृत्वमिति चेन्न यथा गोषु क्षीरं दृश्यमानमपि प्राणादेव जायते। अन्नं रसादिरूपेण प्राणः परिणमयत्यसाविति वचनात् एवं जीवे दृश्यमानोऽपि कार्य्योपसंहारोऽस्वातन्त्र्यात् परकृत एव। य आत्मानमन्तरो यमयति। नाहं कर्त्ता न कर्त्ता त्वं कर्त्ता यस्तु सदा प्रभुरित्यादिः ॥ २४ ॥

देवादिवदपि लोके ॥ २५ ॥

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥२६॥

श्रुतेस्तु शब्दमूलत्वात् ॥ २७ ॥

न च कर्त्तुरीश्वरस्यादृष्टिविरोधः। देवादिवदृश्यत्व-शक्तियोगात् लोकेऽपि पिशाचादीनां तादृशी शक्तिर्दृष्टा किमीश्वरस्य। न युक्तियोगाद्वाक्यानि निराकार्य्याण्यपि क्वचित्। विरोध एव वाक्यानां युक्तयो न तु युक्तय इति ब्रह्मसंहितायाम् ॥ २५ ॥

अयञ्च दोषो जीवकर्तृत्वपक्षे एकेनाङ्गुलिमात्रेण प्रव-र्त्तमानोऽपि पूर्णप्रवृत्तिः स्यान्न च तद्युज्यते। सामर्थ्यैक-देशदर्शनात्। नाटकदेशेन निरवयवत्वात्। अथ यः स जीवः स नित्योनिरवयवोऽज्ञाता ज्ञाता सुखी दुःखी शरी-रेन्द्रियस्य इति भाल्लवेय श्रुतिः। न चोपाधिकृतोऽशः स एव। अश उपहित इति हिन्वापेक्षत्वात्। न चान्यत् वाक्यं यदि युक्त्या विरुद्धं तत्तदीयकृतमेवेति शब्द-न्तरोक्तेः। २६ ॥

न चेश्वरपक्षेऽयं विरोधः। योऽसौ विरुद्धोऽविरुद्धोऽ-नुरागवाननुरागवान् इन्द्रोऽनिन्द्रः प्रवृत्तिरप्रवृत्तिः स परः परमात्मेति पैङ्ग्यादिश्रुतेरेव शब्दमूलत्वान्न युक्ति-विरोधः। यद्वाक्योक्तं न तद्युक्तिविरोधं शक्नुयात् क्वचित्। विरोधे वाक्ययोः क्वापि किञ्चित् साहाय्यकारण-मिति पुरुषोत्तमतन्त्रे ॥ २७ ॥

आत्मनि चैवं विचित्राश्च हि ॥ २८ ॥

स्वपक्षदोषाच्च ॥ २९ ॥

सर्वोपेता च तद्दर्शनात् ॥ ३० ॥

विकरणत्वान्नेति चेत्तदुक्तम् ॥ ३१ ॥

परमात्मनो विचित्राः शक्तयः सन्ति न चान्येषाम्। विचित्रशक्तिः पुरुषः पुराणो न चान्येषां शक्तयस्तादृशाः स्युः। एको वशी सर्वभूतान्तरात्मा सर्वान् देवानेक एवानुविष्ट इति श्वेताश्वतरश्रुतिः ॥ २८ ॥

ये दोषा इतरत्रापि ते गुणाः परमे मताः न दोषः परमे कश्चिद् गुणा एव निरन्तरा इति वचनात् जीवपक्ष एव दोषः न परमात्मपक्षे। अथ यः स दोषः स्वात्मनः स जनः स जनिः सजीवो यः सनिर्दोषो निष्कलः सगुणः परमात्मेति कात्यायन श्रुतिः ॥ २९ ॥

सर्वं युक्ता शक्तिभिर्देवता सा परेति यां प्राहुरजस्रशक्तिम्। नित्यानन्दा नित्यरूपा च मुक्ता जरा च या शाश्वतात्मे तिच या वदन्तीति चतुर्वेदशिखायाम्। अतो न केवलं विचित्रशक्तिः किन्तु सर्वशक्तिरेव ॥ ३० ॥

न च करणाभावादनुपपत्तिरिति युक्तम्। अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति विश्वं न हि तस्य वेत्ता तमाहुराद्यं पुरुषं महान्तम्। न तस्य कार्यं करणञ्च विद्यते न तत् समश्चाप्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते। स्वाभाविकी

न प्रयोजनवत्त्वात् ॥ ३२ ॥

लोकवत्तु लीलाकैवल्यम् ॥ ३३ ॥

वैषम्य नैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति ॥३४

न कर्मविभागादिति चेन्नाऽनादित्वात् ॥३५॥

ज्ञानबलक्रिया चेत्यादिश्रुतिभ्यः। सर्वोपेतावेति सामान्य परिहारेऽपि विशेष युक्त्यर्थं पुनराशङ्का ॥ ३१ ॥

यत् प्रयोजनार्थं सृजत्यादिस्तदूनत्वादपूर्णता इत्यत आह अथैष एव परम आनन्द इत्यादिना कृतकृत्यत्वा न्न प्रयोजनाय सृष्टिः ॥ ३२ ॥

किन्तु यथा लोके मत्तस्य सुखोद्रेकादेव नृत्यगानादि लीला न तु प्रयोजनापेक्षया। एवमेवेश्वरस्य नारायण संहितायाञ्च। सृष्ट्यादिकं हरिर्नैव प्रयोजनमपेक्षतु कुरुते केवलानन्दं यथा मत्तस्य नर्त्तनम्। पूर्णानन्दस्य तस्येह प्रयोजनमतिः कुतः। मुक्ता अप्याप्तकामाः स्युः किमुता-स्याखिलात्मन इति देवस्यैव स्वभावोऽयमाप्तकामस्य का स्पृहेति श्रुतिः। ३३ ॥

सर्वकर्तृत्वे वैषम्य नैर्घृण्ये तस्येत्यतो वक्ति कर्मापेक्षया फलदातृत्वान्न तस्य नैर्घृण्ये पुण्येन पुण्यं लोकं नयति पापेन पापं इत्यादि श्रुतिः ॥ ३४ ॥

यदपेक्षयासौ फलं ददाति न तत् कर्म एष ह्येव साधु कर्म कारयति तथा यमेभ्यो लोकेभ्य उन्निनीषते। एष उ एवा साधु कर्मकारयति तं यमधो निनीषत इति श्रुतेः।

उपपद्यते चाप्युपलभ्यते च ॥ ३६ ॥
सर्वधर्म्मोपपत्तेश्च ॥ ३७ ॥

इति श्रीमत् कृष्णद्वैपायन-कृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थ भगवत्पादविरचिते द्वितीयाध्यायस्य प्रथमः पादः समाप्तः ।

कर्म्मणोऽपि तन्निमित्तत्वादिति चेन्न तस्यापि पूर्वकर्म्मकारणमित्यनादित्वात् कर्म्मणः । भविष्यपुराणे च । पुण्यपापादिकं विष्णुः कारयेत् पूर्वकर्म्मणः । अनादित्वात् कर्म्मणश्च न विरोधः कथञ्चनेति ॥ ३५ ॥

न च कर्म्मापेक्षत्वे नेश्वरस्य अस्वातन्त्र्यम् । द्रव्यं कर्म्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः सन्ति न सन्ति यदुपेक्षयेत्यादिना कर्म्मादीनां सत्त्वस्याऽपि तदधीनत्वात् न च पुनर्वैषम्याद्यापातेन दोषः । तादृश वैषम्यादेरुपलभ्यमानत्वात् । स कारयेत् पुण्य मथाऽपि पापं न तावता दोषमपि क्वचित् स्यात् । ईशो यतो वा गुणदोष सत्वे स्वयं परोऽनादिरादिः प्रजानामित्यादि चतुर्वेदशिखायाम् ॥ ३६ ॥

अवशिष्टैरुपसंहरति । गुणाः श्रुताः विरुद्धाश्च देवे अन्यश्रुता श्चैवमनैवात्मधर्माः चिन्त्यावेद्या चिन्त्याश्च तथैव

रचनानुपपत्तेश्चानुमानम् ॥ १ ॥

प्रवृत्तेश्च ॥ २ ॥

पयोऽम्बुवच्चेत्तत्रापि ॥ ३ ॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ ४ ॥

हि दोषाः श्रुताश्चनाचोहि तथा प्रतीता इति सर्वगुणोपपत्तिश्रुतेः ॥ ३० ॥

इति श्रीकृष्णद्वैपायनकृते ब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थ भगवत् पादविरचिते
द्वितीयाध्यायस्य प्रथमः पादः समाप्तः।

इतरेषां चानुपलब्धेरिति सामान्यतो निराकरणं समन्वयानां कृतं विशेषतो निराकरोत्यस्मिन पादे अचेतन प्रवृत्तिमतं प्रथमतो निराकरोति। अचेतनस्य स्वतः प्रवृत्त्यनुपपत्तेर्नानुमानपरिकल्पितं प्रधानं जगत् कर्तृ च शब्देन-प्रमाणाभावं दर्शयति ॥ १ ॥

चेतनस्य स्वतः प्रवृत्तिदर्शनाच्च ॥ २ ॥

पयोऽम्बुवदचेतनस्यापि प्रवृत्ति र्दृश्यत इति न युक्ता एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्यायां दिश मनु एतेन इरावपयोमण्ड भवतीत्यादि तत्रापि ईश्वर निमित्त प्रवृत्ति श्रुते ॥ ३ ॥

न ऋतेत्वा क्रियते किञ्च नार इति तद्व्यतिरेकेण एक

अन्यत्राभावाच्च न तृणादिवत् ॥ ५ ॥

अभ्युपगमेऽप्यर्थाभावात् ॥ ६ ॥

पुरुषाश्मवदिति चेत् तथापि ॥ ७ ॥

स्यापि कर्मणानवस्थिते रनपेक्षितमेवाचेतन वादिमतम् ॥ ४ ॥

सेश्वरसांख्यमतं निराकरोति । यथा पृथिव्या एव पर्जन्यानुगृहीतं तृणादिकमुत्पद्यते । एवं प्रधानादीश्वरानुगृहीतं जगदित्यतो ब्रवीति । यच्च किञ्चिज्जगत् सर्वं दृश्यतेऽदृश्यतेऽपि वा । अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थित इति । ब्रह्मणे वेदमाविरासीद् ब्रह्मणि स्थितं ब्रह्मण्येव लयमभ्येति ब्रह्मैवाधस्तात् ब्रह्मोपरिष्टाद्ब्रह्म मध्यतो ब्रह्म सर्वतो ब्रह्मैवेदं सर्वमित्यादिश्रुतिभ्योऽन्यजगतोभावात्तृणादीनां पर्जन्यवन्नानुग्राहकत्वमात्रमीश्वरस्य । स एव भूयो निजवीर्यनोदितां स्वजीवमायां प्रकृतिंसिसृक्षतीम् । अनामरूपात्म निरूपनामनो विधित्समानोऽनुससार शास्त्रिकृदिति भागवते । द्रव्यं कर्म्म च कालश्चेत्यादि च । च शब्देन प्रकृतिसत्वादि प्रदातृत्वं चाङ्गीक्रियते ॥ ५ ॥

लोकायतिकपक्षं निराकरोति । यस्य धर्माधर्मौ न स्तस्तत् सिद्धान्ते किं प्रयोजनं अतः स व्याहते रैयोपेक्ष्यः ॥ ६ ॥

पुरुषोपसर्ज्जना प्रकृतिकर्तृवादं निराकरोति यथा

अङ्गित्वानुपपत्तेश्च ॥ ८ ॥
अन्यथानुमितौ च ज्ञशक्ति वियोगात् ॥ ९ ॥
विप्रतिषेधाच्चासमञ्जसम् ॥ १० ॥
महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ११ ॥
उभयथापि न कर्मातस्तदभावः ॥ १२ ॥

चेतनसम्बन्धाच्चेतनमेव शरीर मस्मादिकमादाय गच्छति। एवमचेतनापि प्रकृतिः पुरुषसम्बन्धात् प्रवर्त्तत इति चेत् न नकृतेत्वाक्रियत किञ्च नारे इति तत्रापि तथात्वे दृष्टान्ताभावात् ॥ ७ ॥

शरीरप्रवृत्तौ पुरुषस्याङ्गित्वात्। अङ्गमङ्गी समादाय यथाकार्य्यं करोत्यसावित्यङ्गित्वव्यवहारोऽनुपपन्नः ॥ ८ ॥

प्रकृत्युपसर्ज्जन पुरुषकर्त्तृवादमपाकरोति शरीरसम्बन्धात् पुरुषः प्रवर्त्तत इत्यङ्गीकारेऽपि स्वतन्त्रस्या सामर्थ्याच्छरीरसम्बन्ध एवायत्तः ॥ ९ ॥

सकलश्रुतियुक्तिविरुद्धत्वाच्चानीश्वरमतमसमञ्जसम्। श्रुतयः स्मृतयश्चैव युक्तयश्चेश्वरं परम्। वदन्ति तद्विरुद्धं यो वदेत् सद्वि नराधम इति पाद्मे ॥ १० ॥

परमाण्वारम्भवादमपाकरोति। महत्त्वाद्दीर्घत्वाच्च यथा कार्य्यमुत्पद्यतेएवं ह्रस्वत्वात् पारिमाण्डल्याच्च कार्य्यमुत्पद्यते। वायम्दादन्यार्थं तयोरपि न स्यात्। विशेषकारणाभावात् ईश्वरेच्छया नित्यत्वे तदभावेऽपि परमाणुकर्म्माभावाच्चेदानीमपि स्यात्। अनित्वेलतत्कारणाभावात्।

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ १३ ॥
नित्यमेव च भावात् ॥ १४ ॥
रूपादिमत्त्वाच्च विपर्य्ययो दर्शनात् ॥ १५ ॥
उभयथा च दोषात् ॥ १६ ॥
अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १७ ॥

यत परमाणुचेष्टाभावात् तत् कार्य्याभाव'। वैदिकेश्वरस्य तु वेदेनैव सर्वशक्तित्वोक्तेः सर्वमुपपद्यते। अतएव काले विशेषाङ्गीकृतेः ॥ ११ ॥ १२ ॥

कार्य्यकारणादीनां समवायसम्बन्धाङ्गीकारात्तस्य भिन्नत्वसाम्यात् समवायान्तरापेक्षयानवस्थितिः न च तत् प्रमाणं प्रथमसम्बन्धासिद्धौ च तदसिद्धिः। स्वनिर्वाहकत्वे समवाय एव न स्यात् ॥ १३ ॥

नित्यत्वाच्च परमाणूनां समवायस्य च तस्यैव जनित्वाङ्गीकारान्नित्यमेव च कार्य्यं स्यात् अन्यथा न कदाचित् ॥ १४ ॥

रूपादिमत्त्वाच्च परमाणूनां अनित्यत्व तथादृष्टत्वात् लोके ॥ १५ ॥

नित्यत्वे परमाणूनां तद्वत् सर्वं नित्यं स्यात् विशेष प्रमाणाभावात्। अनित्यत्वे कारणाभावात्तदुत्पत्त्य भाव' ॥ १६ ॥

श्रुतिस्मृत्यपरिगृहीतत्वाच्चातिशयेनानपेक्षता। आन्वीक्षिकी तर्कविद्यामनुरक्तो निरर्थकामिति मोक्षधर्मे ॥ १७ ॥

समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ १८ ॥
इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमि-
त्तत्वात् ॥ १९ ॥
उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥
असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥२१॥
प्रतिसंख्याऽप्रतिसंख्या निरोधाप्राप्तिरविच्छेदात्
॥ २२ ॥

परमाणुपुञ्जवादिमतं निराकरोति। समुदायस्यैक हेतुत्वं न युज्यते उभयहेतुकेऽप्यन्योऽन्यापेक्षत्वात्तदप्राप्तिः। अन्यथा सर्वदा समुदायः स्वतं स्यात् ॥ १८ ॥

सर्वदा विद्यमानोऽपि समुदायः परस्परापेक्षया व्यवह्रियत इति चेत् न एव कार्यमुत्पाद्य तस्य विनष्टत्वात् परस्परप्रत्यय । तदपेक्षया व्यवहार इति न युज्यते। कारणे सति कार्यं भवत्येव इति हि तस्य नियमः ॥ १९ ॥

कार्योत्पत्तावेव कारणस्य नाशाच्च न विशेषकार्योत्पत्तिः ॥ २० ॥

कारणे विनष्टे कार्यमुत्पद्यते चेत्तत् कार्यमिति प्रतिज्ञाहानि । तत्काले कारणमस्ति चेत् विनाशकारणाभावायौगपद्य सर्वकार्याणाम् ॥ २१ ॥

कारणे सति कार्यं भवत्येवेति नियमान्निःसन्तानः स सन्तानस्य विनाशो न युज्यते ॥ २२ ॥

उभयथा च दोषात् ॥ २३ ॥

आकाशे चाविशेषात् ॥ २४ ॥

अनुस्मृतेश्च ॥ २५ ॥

नासतोऽदृष्टत्वात् ॥ २६ ॥

उदासीनानामपि चैवं सिद्धिः ॥ २७ ॥

नाभाव उपलब्धेः ॥ २८ ॥

कारणे सति कार्य्यं भवत्येवेति नियमे सर्वदा कार्य्याभावात्र कार्य्यकारणविशेषः अनियमे कार्य्यानुत्पत्तिः ॥ २३ ॥

दीपादिषु विशेषदर्शनात्, क्षणिकत्वे नान्यत्रापि क्षणिकत्वमनुमीयते चेदाकाशादिष्वपि विशेषदर्शनादन्यत्रापि तदनुमीयते ॥ २४ ॥

तदेवेदमिति प्रत्यभिज्ञानाच्च प्रत्यभिज्ञाया भ्रान्तित्वे विशेषदर्शनस्यापि भ्रान्तित्वम् ॥ २५ ॥

शून्यवादमपाकरोति अदृष्टत्वादसतः कारणत्वं न युज्यते। असतः कारणत्वे उदासीनानां हेयोपादेयबुद्धिवर्ज्जितानां खपुष्पादीनामपि सकाशात् कार्य्यसिद्धिः च स्यात्र चेदन्यत्रापि ॥ २६ ॥

न स्यात् अविशेषात् ॥ २७ ॥

न च जगदेव शून्यमिति वाच्यं दृष्टत्वात् ॥ २८ ॥

वैधर्म्याच्च न स्वप्नादिवत् ॥ २९ ॥
न भावोऽनुपलब्धेः ॥ ३० ॥
क्षणिकत्वाच्च ॥ ३१ ॥
नैकस्मिन्नसम्भवात् ॥ ३३ ॥
एवञ्चात्माऽकार्त्स्न्यम् ॥ ३४ ॥
न च पर्य्यायादप्यविरोधोविकारादिभ्यः ॥३५॥

न च दृष्टस्यापि स्वप्नादिवदभावः तस्योत्तरकाले स्वप्नोऽयं नायं सर्पइत्याद्यनुभावात्। न च एतादृशं प्रमाणमस्ति ॥ २९ ॥

विज्ञानवादमपाकरोति न विज्ञानमात्रं जगत्तथाभावानुभवात् ॥ ३० ॥

ज्ञानं क्षणिकमर्थानाञ्च स्थायित्वमुक्तम्। अतोऽनैक्यम् ॥ ३१ ॥

प्रमाणाभावात् सर्वश्रुतिस्मृतियुक्तिविरुद्धत्वाच्च नैते पक्षा ग्राह्याः ॥ ३२ ॥

सदसद्वादमतं दूषयति। सत् स्यादसत् स्यात् सदसत् स्यादन्योन्यञ्च स्यादित्येतन्नैकस्मिन् युज्यते। अदृष्टत्वेनासम्भवात् ॥ ३३ ॥

जीवस्य शरीरपरिमितत्वाङ्गीकारे पश्वादिशरीरस्थस्य हस्त्यादिशरीरेऽकार्त्स्न्यं स्यात् ॥ ३४ ॥

तत्तच्छरीरस्थस्य तत्तत्परिमाणत्वमिति न मन्तव्यं विकारित्वादनित्यत्वप्रसक्तेः ॥ ३५ ॥

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ ३६ ॥

पत्युरसामञ्जस्यात् ॥ ३७ ॥

सम्बन्धानुपपत्तेश्च ॥ ३८ ॥

अधिष्ठानानुपपत्तेश्च ॥ ३९ ॥

करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥

परिमाणाभावे स्वरूपाभावप्राप्तान्त्यपरिमाणस्थिते-स्तदर्थत्वेन शरीरस्थितेरुभयनित्यत्वादविशेषेण सर्वशरीर-नित्यत्वं स्यात् ॥ ३६ ॥

पाशुपतपक्षमपाकरोति य कामयेत तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवाउ अस्य देवस्य मीढ मीवायाविर्णाः रंशस्य प्रभृतेर्हविर्भिः । विदेहिरुद्रो रुद्रियं महित्व यासिष्ट वर्त्तिरश्विनाविरावत् एकोह वै नारायण आसीन्न ब्रह्मा नेशान इत्यादि श्रुतेः । पारतन्त्र्येण सामञ्जस्यात् स पशु-पतिरीश्वरो जगत्कर्त्ता ॥ ३७ ॥

अशरीरत्वात्तस्य जगता सम्बन्धो न युज्यते कर्तृत्वेन कृतपुरुषवत् ॥ ३८ ॥

पृथिव्या अधिष्ठाने स्थितो हि कुलालादि कार्यं करोति न चास्य तदस्ति ॥ ३९ ॥

इदमेव जगत्तस्य करणवदधिष्ठानादिरूप नित्यस्यापि कस्यचिद्भावाद्युज्यते इति चेन्न भोगादि प्राप्तेः । उत्पत्तिविनाशौ सुखदुःखभोगाय प्राप्यन्ते तद्गताः ॥ ४० ॥

अन्तवत्त्वमसर्वज्ञता वा ॥ ४१ ॥

उत्पत्त्यसम्भवात् ॥ ४२ ॥

न च कर्त्तुः करणम् ॥ ४३ ॥

विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥

देहवत्त्वेऽन्तवत्त्वमन्यथा ज्ञानभावः। शरीरिण एवहि ज्ञानोत्पत्तिर्दृष्टा। विष्णोस्तु श्रुत्यैव सर्वे विरोधाः परिहृताः। यदात्मको भगवांस्तदात्मिका व्यक्तिः। किमात्मको भगवान् ज्ञानात्मकः परः ऐश्वर्य्यात्मकः शक्त्यात्मक इति। बुद्धिमनोऽङ्गप्रत्यङ्गवत्तां भगवतो लक्षयामहे बुद्धिमान् मनोवान् अङ्गप्रत्यङ्गवानिति। सदेहः सुखगन्धश्च ज्ञानभासत्पराक्रमः। ज्ञानाज्ञानः सुखी मुख्यः स विष्णुः परमोऽक्षर इत्यादिकया ॥ ४१ ॥

शक्तिपक्षं दूषयति न हि पुरुषाननुगृहीतस्तोऽभ्य उत्पत्तिर्दृश्यते ॥ ४२ ॥

यदि पुरुषोऽङ्गीक्रियेत तस्यापि करणाभावादनुपपत्तिः ॥ ४३ ॥

यदि विज्ञानादिकरणं तस्याङ्गीक्रियते तदा तत एव सर्व्वाद्युपपत्तेरीश्वरवादान्तर्भावात् ॥ ४४ ॥

विप्रतिषेधाच्च ॥ ४५ ॥

इति श्रीमत् कृष्णद्वैपायनकृतब्रह्मसूत्र-
भाष्ये श्रीमदानन्दतीर्थ भगवत्
पाद विरचिते द्वितीया-
ध्यायस्य द्वितीयः पादः
समाप्तः।

न वियदश्रुतेः ॥ १ ॥

अस्ति तु ॥ २ ॥

सकलश्रुत्यादिविरुद्धत्वाच्चासमञ्जसम् ॥ ४५ ॥

इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये
श्रीमदानन्दतीर्थभगवत्पूज्यपाद-
विरचिते द्वितीयाध्यायस्य
द्वितीयपादः समाप्तः।

जीवपरमात्माधिभूताधिदैवेषु श्रुतीनां परस्परविरोध-मपाकरोत्यनेन पादेन। न वियदुत्पत्तिमत् तथा श्रुतेः ॥ १ ॥

अस्त्येवोत्पत्तिश्रुतिः। आत्मन आकाशः सम्भूत इत्यादि ॥ २ ॥

गौण्यसम्भवात् ॥ ३ ॥

शब्दाच्च ॥ ४ ॥

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥

प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥

अनादिर्वा अयमाकाशः शून्यो लौकिकः इत्यादि श्रुतिर्गौणी। अन्यथोत्पत्तिश्रुतिबाहुल्यासम्भवात् ॥ ३ ॥

अथ हैतावनित्यानि पुरुषः प्रकृतिरात्मा काल इत्यथ यान्यनित्यानि प्राणः श्रद्धाभूतानि भौतिकानीति यानि ह्येवा उत्पत्तिमन्ति तान्यनित्यानि यानि ह्येवा अनुत्पत्तिमन्ति तानि नित्यानि नह्येतानि कदाचनोत्पद्यन्ते न वा विलीयन्ते इति पुरुषः प्रकृतिरात्मा काल इति। अथैतान्युत्पत्तिमन्ति चानुत्पत्तिमन्ति च प्राणः श्रद्धाकाश इति भाल्लवेयश्रुतेश्च भागशो ह्युत्पद्यन्ते इति ॥ ४ ॥

स्यादेवैकस्य उत्पत्तिमत्त्वमनुत्पत्तिमत्त्वं च गौणमुख्यत्वापेक्षया यथा ब्रह्मशब्दः। अथ कस्मादुच्यते परं ब्रह्मेति बृंहति बृंहयति चेति श्रुतेः। परे ब्रह्मणि मुख्योऽपि गौणत्वेन विरञ्च्यादिष्वपि वर्त्तते। अत एवा ब्रह्मत्वं च तेषाम्। एवमत्राप्यनुत्पत्तिमच्छब्दः ॥ ५ ॥

ब्रह्मणोऽन्यस्य नित्यत्वे इदं सर्वमसृजतेति प्रतिज्ञाहानिः। आकाशस्यापि सर्वत्वाद्व्यतिरेकात्। आकाशा इदमेक एवाग्र आसीत् सदेव सोम्येदमग्र आसीत्

यावद्विकारन्तु विभागो लोकवत् ॥ ७ ॥

एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥

एकमेवा द्वितीयं इदं वा अग्रे नैव किञ्चनासीदित्यादि श्रुतिभ्यः ॥ ६ ॥

विभक्तत्वाच्च विकारित्वं युक्तम्। विकारिण एव हि लोके विभक्ता दृश्यन्ते। एको विभक्तः परमः पुरुषो विष्णुरुच्यते। प्रकृतिः पुरुषः कालस्त्रय एते विभागतः। चतुर्थस्तु महान् प्रोक्तः पञ्चमाहंकृतिर्मता। तद्विभागे न जायन्ते आकाशाद्याः पृथक् पृथक्। योविभागोविकारः स सोऽविकारः परो हरिः। अविभागात् परानन्तो नित्योऽनित्यो गुणात्मकः। विभागोह्यल्पशक्तिः स्याच्च तद्धि जनार्दन इति बृहत्संहितायाम्। ७।

अथ नित्यानित्याय तेजोबन्नान्याकाश इति तान्यनित्यानि वायुर्वाव नित्या वायुना हि सर्वाणि भूतानि नेनीयन्ते। अथ चेतनाचेतनाय तेजोबन्नान्याकाश इति तान्यचेतनानि वायुर्वाव चेतनो वायुना हि सर्वाणि भूतानि विजायन्ते। कुविदं गमनसावे इधासं पुरा देवा अनवद्या स आसन्ते वायवे मनवे बाधितया वा सयन्नूषसं सूर्येण स वा एष देवतानादिर्योऽयं पवन इति। यस्य नादि न मध्यं नान्तो नोदयो ननिम्लोच इत्यादि श्रुतिभ्यो वायोरपि अनुत्पत्तिरिति। अतोऽब्रवीत् एतेन मुख्यामुख्यानुपपत्तिसमवचनेन विभक्तत्वाच्च वायुनुत्पत्तिश्रुतिरपि

असम्भवस्तु सतोऽनुपपत्तेः॥ ८ ॥

व्याख्याता। नित्यः परमनित्यश्च तथा नित्यः परस्तथा। चतुर्द्धैतज्जगत् सर्वं परानित्यन्तु पार्थिवम्। अनित्यानि तु भूतानि नित्यो वायुरदाहृतः। परन्तु नित्यः पुरुषः प्रकृतिः काल एव च। एतच्चतुष्टयं विष्णुः स्वयं नित्यः परात्परः। प्रतिव्यूहा व्यूहा चासावतोऽत्य च जनार्द्दनः। घारस्त्यनिग्र देवो नित्यानन्दैकलक्षण इति कौर्म्मे ॥ ८ ॥

असद्वा इदमग्र आसीत् ततो वै सदजायत असतः सदजायतेत्यादिश्रुतिभ्यः सतोऽप्युत्पत्तिः श्रूयत इति चेन्न अनुपपत्तिरेव सतः तुशब्देनोक्तशङ्कामपाकरोति, न ह्यसतः सदुत्पद्यते अदृष्टत्वादनुपपत्तेः। तद्वा एतत् ब्रह्माहुर्बृंहति बृंहयति चेति तद्वाव तदसदाहुर्न ह्यसादयति कथन। तद्वा एतत् परमाहुः परतो हि तदुदीच्यत इति श्रुतेः। असच्छब्दो ब्रह्मवाचो देवानां पूर्वे युगे असतः सदजायते इति ब्रह्म वा असद्वा प्राणः प्राणोवाव महान् सह आसीत्तिजोवव इत्याचक्षत इति पैङ्गिश्रुतिः। त्व देवसत्तया गुणकर्म्मयोनो रेत स्वजायां कविरादधेऽजः। ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन्। करवाम किन्तु इति भागवते। अजायमानो बहुधा विजायत इति च प्रत्यक्षत्व हरेर्जन्म न विकारः कथञ्चन। पुरुषः प्रकृतिः कालो महानित्यादिषु क्रमात्। विकार एव जननं पुरुषे तद्विशेषणम्। परतन्त्रविशेषो हि विकार इति कीर्त्तित इति पाद्मे। अविकारोऽपि भगवान् सर्वशक्ति-

तेजोऽतस्तथाह्याह॥ १०॥

आपः॥ ११॥

पृथिव्यधिकाररूपशब्दान्तरेभ्यः॥ १२॥

त्वद्धेतुतः। विकारहेतुकं सर्वं कुरुते निर्विकारवान्। शक्तिशक्तिमतोश्चापि न विभेदः कथञ्चन।—इति अविभिन्नापि सेच्छादिभेदैरपि विभाव्यत इति भागवतंतन्त्रे॥ ९॥

वायोरग्निरित्यादेर्नान्यत उत्पत्तिर्ग्राह्या अतएव परात्तदपि जायते। तत्तेजोऽसृजतेति ह्याह कारणत्वेनाप्युक्तोऽप्यमुख्यतयान्येषामपि ग्रन्थोक्तत्वात् पुनरुक्तिः उभय कारणत्व-निवृत्त्यर्थम्॥ १०॥

ब्रह्म वेदमग्र आसीत्तदपोऽसृजत तदिदं सर्वमितिश्रुतेरग्नेराप इत्युक्तेऽपि ब्रह्मण एव वादिसृष्टिः। एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीत्यादि च कर्त्ता सर्वस्य वै विष्णुरेक एव न संशयः। इतरेषान्तु सत्वाद्यायत एव तदाज्ञयेति च भविष्यपुराणे। वामने च—तत्र तत्र स्थितो विष्णुस्तत्तच्छक्तो प्रबोधयन्। एक एव महाशक्तिः कुरुते सर्वमञ्जसेति चर्मात् खेदादिदृष्टेः पुनः प्रतिषेधः॥ ११॥

ता अप ऐक्षन्त बह्वः स्याम: प्रजायेमहीति ता अन्नमसृजन्तेति अन्नोऽन्नसृष्टिः श्रूयते। अन्नः पृथिवीति क्वचित् पृथिवीसृष्टिः अतो विरुद्धत्वात् प्रामाण्यमित्यतो वक्ति

तदभिध्यानादेव तु तल्लिङ्गात् सः ॥ १२ ॥

पृथिवी तत्रान्न शब्देनोच्यते भूताधिकारत्वात् । ...कात् सा प्रचुरा पृथ्वी पृथिवी नान्नस्य तथा विशेषः । आपश्च पृथिवी चान्नं पृथिवी वा अन्नं तां अपोऽन्नमसृजन्त पृथिवी वा अन्नमित्यादि शब्दान्तराच्च । आदिवच्चाद्युक्तिः । अपौरुषेयत्वेनादौ यस्य वाक्यस्य नाप्रामाण्यमित्यादि । कौर्म्मे च— विरोधो वाक्ययोर्यत्र नाप्रामाण्यं तदिष्यते । यथा विरुद्धता न स्यात् यथार्थः कल्प्य एतयोरिति । रक्तोऽग्निरुदकं शुक्लं कृष्णैव पृथिवी स्वत. । नाभिपद्माभि सम्बन्धात् पीता सेत्यभिधीयते । चवरक्ताभिसम्बन्धाद्रक्तोदकवद्दुत्वतः । शुक्लत्वमित्येवमेव वर्णान्तरगतिर्भवेत् । विष्णुवीर्य्याभियोगाच्च पीतत्वं भुव इष्यते । पूर्णवीर्य्यं हि भगवाननादिः पुरुषोत्तम इति व्योमसंहितायाम् ॥ १२ ॥

प्राणानां यन्थिरसि रुद्रोमाविशान्तकः तेनान्ने नाप्यायस्वेत्यादिनाऽन्यः संहर्त्ता प्रतीयत इति । अतो ब्रूते । तस्याभिध्यानाद् योजनात् तत्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरिति सम्बन्धत्रयस्य तदभिध्याननिमित्तत्वलिङ्गात् तत् कर्त्तृत्वं प्रतीयते किमु सादिजगतः इत्येतस्मादेव संहारकर्त्ता विष्णुरिति प्रतीयते । किमु यमप्येति भुवनं साम्पराये स नो हरिष्टतमिहायुषे तु देव श इदं सर्वं विलापयति स हरिः परः परमात्मेत्यादि श्रुतिभ्यः । इत्येव शब्दः । स्रष्टाः पाता च संहर्त्ता स एको हरिरीश्वरः । स्रष्टृत्वादिकमन्येषां दारुयोषावदुच्यते । एकदेशक्रिया

विपर्य्ययेणतु क्रमोऽत उपपद्यते च ॥ १४ ॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति-चेन्नाविशेषात् ॥ १५ ॥

चाच न तु सर्वात्मनेरितम् । सृष्ट्यादिकं समस्तं तु विष्णोरेव यताश्ववेदिति स्कान्दे । निमित्तमात्र मीशस्य विश्वसर्गनिरोधयोः । हिरण्यगर्भः शर्वश्च कालाख्योरूपि-णस्तथेति भागवते । स ब्रह्मणा विसृजति स रुद्रेण विलापयति सोऽनुत्पत्तिरलयः एक एव हरिः परः परा-नन्द इति च महोपनिषदि ॥ १३ ॥

अतएव होदं पराक्रमादुत्पद्यते क्रमाद् विलीयते नासा वृदेति नास्तमेतोति भाल्लवेयश्रुतौ क्रमाश्रयः प्रती-यते । अचरात् परमादेव सर्वमुत्पद्यते क्रमात् । व्युत्-क्रमाद्विलयश्चैव तस्मिन्नेव परात्मनोतिचतुर्वेदशिखायाम् । व्युत्क्रमाश्रयः प्रतीयते । अत आह । क्रमवचनमपि विप-रीतक्रमापेक्षया । कर्त्ता प्रानादिकस्यास्य हन्ता भूम्या-दिकस्य च । यः क्रमाद् व्युत्क्रमाच्चैव स हरिः पर उच्यते इति । अतएव भाल्लवेयश्रुतिवचनात् । अनुरूपक्रमः सृष्टौ प्रतिरूपो लये क्रमः । इति क्रमेण भगवान् सृष्टि-संहारकृद् विभुरिति च पाद्मे । पूर्वेषां पूर्वेषां सामर्थ्या-धिक्यादुत्पद्यते च । वामने च । पूर्वं पूर्वं यतो विष्णोः सन्निधानं क्रमाधिकम् । सामर्थ्याधिक्यमेतेषां पश्चादेव लय-स्तथा । व्याप्तियाप्यधिका तेषा मत एव न संशयइति ॥ १४

प्राणात्मानौ मनश्च विज्ञानं यच्छेद्वाङ्मनसी प्राज्ञ-

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्त-
द्भावभावित्वात् ॥ १६ ॥
नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥

स्वदुयच्छेन्मनसी प्राज्ञ आत्मनीति लिङ्गादिज्ञान-मनसी अन्तरा विपरीतक्रम इति चेन्न विशेष-प्रमाणाभावात् ॥ १५ ॥

मनसश्च विज्ञानमिति व्यपदेशश्चराचरेष्वालोचनादि-ज्ञानं भवतीति भागापेक्षया स्यात् । न विज्ञानत्वापे-क्षया । स्कान्दे च । परादव्यक्तमुत्पन्नमव्यक्तात्तु महां-स्तथा । विज्ञानतत्त्वं महतः समुत्पन्नं चतुर्मुखात् । विज्ञानतत्त्वात्तु मनो मनस्तत्त्वाच्च खादिकम् । एवं वाह्या परा सृष्टिरन्तस्तद्वाक्यपेक्षया । विपरीतक्रमोज्ञेयो यस्मादन्ते हरेर्गिरिरिति ॥ १६ ॥

सइदं सर्वं विलाप्यात्मस्तमसि निलीनस्तद्विलाप्य-व्युत्तिष्ठते य इदं सर्वं विसृजति विज्ञापयति प्रख्यापयति आच्छादयति प्रकाशयति विमोचयति एक एवेति श्रुतेः । परमात्मापि न विलीयते । अश्रुतत्वात्तु तद्ब्रह्मलयस्य निलीनशब्देनापि हि तत्वमुच्यते तच्छेनान्व पिहितं यदासीदिति श्रुतेः । स एतस्मिंस्तमसि निलीनः प्रकृतिं पुरुषं कालं चानुपश्यति नैवं पश्यति कश्चनेति पैङ्गिश्रुतिः । नित्यो नित्यानां चेतनश्चेतनानां सनित्यो निर्गुणो विभुः । परः परमात्मा नित्यो विभुः कारणं लोकसाक्षी परगुणैः सर्वदृक् शाश्वतश्चेत्यादि श्रुतिभ्यो नित्यत्वाच्च ।

-श्रोऽतएव॥१८॥

उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥

स्वात्मना चोत्तरयोः ॥ २०॥

नित्यो नित्यानामिति जीवस्यापि नित्यत्वमुक्तं सर्वेच वात्मनो व्युच्चरन्ति इत्युत्पत्तिरुच्यते अतो विरोध इति अत आह जीवोऽप्यत एव परमेश्वरादुत्पद्यते अन्यादेव ते वाव ते चिदात्मानोऽविनष्टाः परं ज्योतिर्निविशन्ति अविनष्टा एवोत्पद्यन्ते न विनश्यन्ति कदाचनेति कात्यायनश्रुतिः। नित्यस्यापि हि जीवस्योपाध्यपेक्षया उत्पत्तिर्युज्यते। उत्पद्यन्ते चिदात्मानो नित्यानित्याः परात्मनः। उपाध्यपेक्षया तेषामुत्पत्तिरपि गीयत इति च व्योमसंहितायाम्। १७॥

व्याप्ताह्यात्मानश्चेतनानिर्गुणाश्च सर्वात्मानः सर्वरूपा अनन्ता इति कात्यायनश्रुतौ व्याप्तत्वं प्रतीयते। अणुर्ह्येषु आत्माय वा एते सि नोतपुण्य चा पुण्य--चेति गौपवनश्रुतावणुत्वमित्यतो विरोध इति। अतो ब्रवीति हेतूनां सकाशादणुरेव सोऽस्माच्छरीरादुत्क्रम्याम् लोकमभिगच्छत्यमपादिम लोकमभिगच्छति स गर्भो भवति स प्रसूयते स कर्म कुरुत इति पौष्यायणश्रुतिः। १८॥

तत्र स्वातन्त्र्यप्रतीतेः। एकः जन्तुरेक एव प्रलीयते एकोऽनुभुङ्क्ते सुकृत मेक मि स्वयमेवेत्यतो वक्ति स एतेनैव ५। गर्भमावि

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २१॥

स्वशब्दोन्मानाभ्याञ्च ॥ २२ ॥

अविरोधश्चन्दनवत् ॥ २३ ॥

शन्ति परेण कर्म्म कुरुते परेण नीयते परेणोन्नीयते तं वाव तमभिवदन्ति स्थापेति एष ह्यानन्दमादत्त एष ह्येनं जीवमभिजीवयत्येष उत्क्रमयत्येष आगमयतीत्युत्तरवाक्यात् परमात्मनैवोत्क्रान्त्यादयः ॥ १९ । २० ।

व्याप्ता ह्यात्मानश्चेतना निर्गुणाश्चेति व्याप्तिश्रुतेर्नाणुर्जीव इति चेन्न स आत्मेद सजति स द्विधेदं विभत्यन्तर्वेहिष स बहुधेदमन प्रविश्यात्मनोऽभिनयति स आत्मा स आत्मन. स ईशः स विष्णुः स परः परो वरीयानिति परमात्माधिकारत्वात्। एकशब्देहिं शब्दैश्च बहुशब्देश केशवः। एक एवोच्यते वेदैस्तावता नास्य भिन्नतेति भविष्यत्पुराणे तदयं प्राणोऽधि तिष्ठति तदुत्क्रमणेन तेन यातमित्यादि च ॥ २१ ।

एष ह्यात्मा ह्यणुतो मानशक्तेस्तथाप्यसौ। प्रमिति याति वेदैः पूर्णोऽचिन्त्यः सर्वेवेदैकयोनिः। सर्वाधीशः सर्ववित् सर्वकर्त्तेति वाक्यशेष आत्मशब्दोन्मानाभ्यां च आत्मा मेयः परं ब्रह्म परानन्दादिकाभिधा। वदन्ति विष्णुमेवैकं नान्यथा सङ्गति क्वचिदिति कौर्म्मे ॥ २२ ॥

अणोरपि जीवस्य सर्वशरीरव्याप्तिर्युज्यते यथा

अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥२४॥

गुणाद्वालोकवत् ॥ २५ ॥

व्यतिरेको गन्धवत् ॥ २६ ॥

हरिचन्दनविप्रुष एकदेशपतितायाः सर्वशरीरव्याप्तिः । अणुमात्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति । यथा व्याप्य शरीराणि हरिचन्दनविप्रुष इति ब्रह्माण्डपुराणे ॥ २३ ॥

सम्यगसम्यगवस्थान विशेषाद् युज्यते हरिचन्दनस्येति चेन्न हृदि ह्येष आत्मेति जीवस्यापि तथाभ्युपगमात् ॥२४॥

यथा लोकस्य प्रकाशगुणेन व्याप्ति र्ज्योतीरूपेणाव्याप्तिः एवं चिद्रूपेणाव्याप्ति रिति वा । स्कान्देच—असम्यक् सम्यगितिवद्भवस्थाभेदस्तु सुराव्याप्ति व्याप्तियता स्वरूपचिद् गुणेनैव नान्यथा । चिद्गुणस्य स्वरूपत्वा त्तद्व्याप्तिश्चे ति युज्यते । शक्तियोगात् सुराणाञ्च विविधा तु व्यवस्थिति रिति च ॥ २५ ॥

स नित्यो निरवयवः पुण्ययुक् पापयुक् च स इमं लोकमनुप्रावर्त्तते स विमुच्यते स एकधा, न सप्तधा, न दशधेति शौपवनश्रुता वेकस्या बहुत्वं प्रलीयते । स पञ्चधा सप्तधा दशधा भवति शतधा सहस्रधा गच्छति स विमुच्यत इति पाराशर्य्यायणश्रुतौ बहुरूपत्वञ्च प्रतीयते अतो विरोधं परिहरति । यथा पृथग् गच्छति एवं अंशिनो जीवादंशाः पृथग् गच्छन्ति । अथैक एव स न गन्धवदा-

तथा च दर्शयति ॥ २७ ॥

पृथगुपदेशात् ॥ २८ ॥

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥३० ॥

तिरिष्यते अथैको तथा भवति । अथ बह्वी भवति त यथा यथेश्वर. प्रकुरुते तथा तथा भवति सोऽचिन्त्य परमो गरीयानिति शाण्डिल्यश्रुतिः । अचिन्त्यश्चैष भगवाँव एकोऽवयवर्जितः। आत्मानं बहुधा कृत्वा क्रीडते योगसम्पदेति पद्मे । २६ । । २७ ॥

तत्त्वमस्यह ब्रह्मास्मीत्यादिषु जीवस्य परेणा भेदः प्रतीयते । नित्यो नित्याना चेतन श्चेतनानां द्वा सुपर्णेत्यादिषु भेद. । अत उच्यते भिन्नोऽचिन्त्यः परमो जीवसङ्घात् पूर्णः परोजीवसङ्घोह्यपूर्णः । यतस्त्वसौ नित्यमुक्तोह्ययञ्च बन्धान्मोचन्ततएवाभिवाञ्छेदिति सोपपत्तिकौपिक श्रुतेर्भिन्नएव जीवः । २८ ॥

ज्ञानानन्दादिब्रह्मगुणा एवास्य यतः सारः स्वरूप मतो भेदव्यपदेश यथा सर्वगुणात्मकत्वात् सर्वात्मकत्वं ब्रह्मण उच्यते । सर्वं खल्विदं ब्रह्मेति । भविष्य पुराणे च—भिन्ना जीवा परो भिन्न स्तथापि ज्ञानरूपतः । प्रोच्यन्ते ब्रह्म रूपेण वेदवादेषु सर्वग इति ॥ २९ ॥

जीवस्याप्युत्क्रान्तिरुक्ता अतस्तस्य सोऽनादिना पुण्येन पापेन चानुबद्धः परेण निर्मुक्त आनन्त्याय कल्पत इत्यनादिकर्मसम्बन्ध आनन्त्याव्याप्तिय न युज्यत, इत्यत आह ।

पुंस्त्वादिवत्तस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥

नित्योपलब्ध्यनुपलब्धि प्रसङ्गोऽन्यतरनियमो-वाऽन्यथा ॥ ३२ ॥

यावत् परमात्मा तिष्ठति अनादिनन्तत्वेन एवं जीवोऽपि नित्यः परोनित्या जीवा उत्पद्यन्ते म्रियन्ते च विमुच्यन्ते न चेति अग्निवेश्यश्रुतिः। आत्मा नित्यः सुख दुःखे च-नित्ये जीवोऽनित्यो धातुरस्य त्वनित्य इति। महाभारते ॥ ३० ॥

विज्ञानात्मासह देवैश्च सर्वैः स आनन्दः सबलः स ओजः स परेयास्' लोकं नीयते स विमुच्यते जीवस्य ज्ञानानन्दादिरूपत्व सूच्यते स दुःखादिमुक्त आनन्दो भवति सोऽज्ञानादिमुक्तो ज्ञानी भवति सोऽबलादिमुक्तो बलो भवति स नित्यो निरातङ्कोऽवतिष्ठत इति पैङ्गि श्रुता वानन्दादि रूपत्वं प्रतीयते अत आह यथा बालस्य सदैव पुंस्त्वयौवनेऽभिव्यज्यते। एव सतामेवानन्दादीनां व्यक्त्य-पेक्षया तदुक्तिः। बलमानन्द ओजश्च सज्ञानमनाकुलम्। स्वरूपाण्येव जीवस्य व्यज्यते परमादिभोरिति गौपवन श्रुतिः ॥ ३१ ॥

व्यक्त्यनङ्गीकारे देवानां नित्योपलब्धिरानन्दादीनां असुराणां नित्योऽनुपलब्धिर्मनुष्याणां नित्यं उपलब्ध्यनुपलब्धी प्रसज्येते नित्यानन्दो नित्यज्ञानी नित्यबलः परमात्मा नैव नसुराः एवमनैवञ्च मनुष्या इति अग्निवेश्य श्रुतिः। भविष्यत्पुराणे च—नित्यानन्दज्ञानबला देवा

कर्त्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥

विहारोपदेशात् ॥ ३४ ॥

उपादानात् ॥ ३५ ॥

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥३६॥

उपलब्धिवदनियमः ॥ ३७ ॥

नैव तु दानवाः । -दुःखोपलब्धिमात्रास्ते मानुषास्तूभयात्मकाः । तेषां यदन्यथा दृष्टं, तदुपाधिकृतं मतम् । विज्ञानेनात्मयोग्येन निजरूपे व्यवस्थितिः । सम्यग्ज्ञानन्तु देवानां मनुष्याणां विमिश्रितम् । विपरीतन्तु दैत्यानां ज्ञानस्यैव व्यवस्थिति रिति ॥ ३२ ॥

"ईश्वरस्यैव कर्त्तृत्वमुक्तं,"यत्कर्म कुरुते तदभिसम्पद्य इति जीवस्योपलक्षणं अत आह जीवस्य कर्त्तृत्वाभावे शास्त्रस्य प्रयोजकत्वप्राप्तेः जीवोऽपि कर्त्ता ॥ ३३ ॥

स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वेत्यादिना मोक्षेऽपि ॥ ३४ ॥

साधनाद्युपादानप्रतीतेश्च ॥ ३५ ॥

आत्मानमेव लोकमुपासीतेति क्रियायां व्यपदेशाच्च अन्यथा तेनैव लोकमिति व्यपदेशः स्यात् ॥ ३६ ॥

तर्हि कथमीश्वरस्यैव "कर्त्तृत्वमिति अतो वक्ति यथाज्ञाने दृष्टं ज्ञास्यामीत्यनियमः प्रतीयते एवं कर्मण्यपि जीवस्य य आत्मानं मन्तरोयमयतीति च श्रुतिः । कुतः ॥ ३७ ॥

शक्तिविपर्य्ययात् ३८ ॥

समाध्यभावाच्च ॥ ३९ ॥

यथा च तक्षोभयथा ॥ ४० ॥

परात्तु तच्छ्रुतेः ॥ ४१ ॥

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४२ ॥

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ ४३ ॥

अशक्तित्वात् जीवस्य ॥ ३८ ॥

समाधानाभावाच्च ॥ ३९ ॥

स्वातन्त्र्यं प्रतीयते अत आह यथा च तक्ष्णः कारयितृ नियन्तृत्वं कर्तृत्वं च विद्यते एवं जीवस्यापि ॥ ४० ॥

सा च कर्तृत्वशक्तित्वाद् जीवस्यापरा परादेव । कर्तृत्वं कारणत्वञ्च स्वभावश्चेतना धृतिः । यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षयेति पैङ्गिश्रुतिः ॥ ४१ ॥

ततः प्रयोजनकत्वं शास्त्रस्य नापद्येत कृतप्रयत्नापेक्षत्वात् प्रेरकत्वस्यादिशब्देन वैषम्यादिपूर्वकर्मप्रयत्नस्य संस्कारस्याप्यपेक्षात् । ईश्वरः कारयेत् सर्वं तच्चेश्वरकृतं स्वयम् । अनादित्वाददोषश्च पूर्णशक्तित्वतो हरेरिति भविष्यत्पुराणे । एतदेवं न चाप्येवमेतदस्ति च नास्ति चेति मोक्षधर्मे ॥ ४२ ॥

अंश एव हीमे जीवा यांशी हि परमेश्वरः । स्वयमंशो-

मन्त्रवर्णाच ॥ ४४ ॥

अपि च स्मर्य्यते ॥ ४५ ॥

दिदं सर्वं कारयत्यचलो हरिरिति गौपवनश्रुतावंशत्व जीवस्योपलभ्यते । नैवांशो न सम्बन्धो नापेचो जीवः परस्य तथापि तु यथायोगं फलदः प्रभुरेकराट् । न नियम्यः स कस्यापि स सर्वस्य नियामक इति भाल्लवेयश्रुतौ । अतो ब्रवीति । मां रचतु विभुर्नित्यं पुत्रोऽहं परमात्मनः । अवरः परेण पितरं यो ह्यस्यानुवेद पर एतावरेण यस्तद्वेद स पितुः पिता सत् यस्त्वाविजानात् स पितुः पिता सत् द्वा सुपर्णा सयुजा सखायेत्यादिना व्यपदेशादंशो जीवः । तथा च पाराशर्य्यायणश्रुतिः । अंशो ह्येष परस्य योऽयं पुमानुत्पद्यते च म्रियते च नानाह्येव व्यपदिशति पितेति पुत्रे ति भ्रातेति च सखेति चेति । अन्यः परोऽन्यो जीवो नासावस्य कुतश्चन नायं तस्यापि न कश्चनेत्यन्यथा च काप्यायणश्रुति । ब्रह्म दाशा ब्रह्म कितवा ब्रह्मै वेमे दश इत्यभेदेनाप्येकेऽधीयते । तथा चाग्निवेश्मश्रुतिः । अंशो-ह्येष परस्य भिन्न ह्येनमधीयिरे इति । वाराहे च । पुत्र-भ्रातृसखित्वेन स्वामित्वेन यतो हरि । बहुधा गीयते वेदैर्जीवोंऽशस्तस्य तेन तु । यतोभेदेन चास्यायमभेदेन च गीयते । अतश्चांशत्वमुद्दिष्टं भेदाभेदं न मुख्यत इति ॥४३॥

पादोऽस्य विश्वाभूतानि ॥ ४४ ॥

ममैवांशो जीवलोके जीवभूत सनातनः । मनःषष्ठा-नीन्द्रियाणि प्रकृतिस्थानि कर्षतोति ॥ ४५ ॥

प्रकाशादिवन्नैवं परः ॥४६॥

स्मरन्ति च ॥४७॥

अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॥४८॥

अनंशत्वश्रुतेर्गतिरियाह। अंशत्वेऽपि न मत्स्यादिरूपो पर एवंविधः। यथा तेजोंऽशस्यैव कालाग्नेः खद्योतस्य च नैकप्रकारता। यथा जलांशस्यामृतसमुद्रस्य मूत्रादेश्च। यथा पृथिव्यंशस्य मेरोर्विष्ठादेश्च अभिमानिदेवतापि चैवैतत्॥४६॥

एते स्वांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्। अतः परं यदव्यक्तमव्यूढगुणबृंहितम्। अदृष्टाश्रुतवस्तुत्वात् स जीवो यः पुनर्भवः। स्वांशश्चाथो विभिन्नांश इति द्वेधांश इष्यते। अंशिनो यत्तु सामर्थ्यं यत् स्वरूपं यथास्थितिः। तदेव नाणुमात्रोऽपि भेदः स्वांशांशिनोः क्वचित्। विभिन्नांशोऽल्पशक्तिः स्यात् किञ्चित् सादृश्यमात्रयुगिति वाराहे। न तत्समोऽस्त्यभ्यधिकः कुतोऽन्य इति च॥४७॥

परानुज्ञया प्रकृतिः परतो बन्धनिवृत्तिश्च जीवस्य प्रतीयत्वेऽपि देहसम्बन्धात्। य आत्मानमन्तरो यमयति तमेवं विद्वानमृत इह भवतीत्यादि। न तु परस्य वासुदेवः सङ्कर्षणः प्रद्युम्नोऽनिरुद्धोऽहं मत्स्यः कूर्मो वराहो नृसिंहो वामनो रामः रामः कृष्णो बुद्धः कल्किरहं शतधाहं सहस्रधाहममितोऽहमनन्तो नैवैते जायन्ते नैतेषामज्ञानबन्धो

असन्ततेश्चाव्यतिकरः ॥ ४६ ॥

न मुक्तिः सर्व एव ह्येते पूर्णा अजरा अमृताः परमाः परानन्द इति चतुर्वेदशिखायाम्। युज्यते च ज्योतिरादिवत् यथादित्यो वियद्गतस्तत्प्रकाशश्चैकप्रकारः। मुक्ता कृष्णं कनीनिकेति तदंशस्याप्यणो देहसम्बन्धात्र तादृशो व्यक्तिः तदनुग्राह्यत्व तेनैवावृत्तिपरिहारश्च। यथा वाद्यामृतजलस्य भूतलस्यामृतसमुद्रस्य चैकत्वं तदंशस्यापि श्लेषणस्तदनुग्राह्यत्वं तेनैव विरोधनिवृत्तिश्च। मोक्षधर्मे च—यत् किञ्चिदिह लोकेऽस्मिन् देहबद्ध विशांपते। सर्वं पञ्चभिराविष्ट भूतैरो रघुद्विजः। ईश्वरो हि महद्भूत प्रभुर्नारायणो विराट्। भूतान्तरात्मा विज्ञेयः स गुणो निर्गुणोऽपि च। भूतप्रलयमव्यक्त शुश्रूषु नृपसत्तमेति। वाराहे च—अंशाय देहयोग्यत्वाद् जीवा बन्धादिसंयुताः। अनुग्राह्याश्चेश्वरेण न तु मत्स्यादिको हरिः। अदेहबन्धयोग्यत्वाद्यथा सूर्यप्रभाश्चिणो। यथा मृतसमुद्रस्य श्लेषादेव विरूपता। अनुग्राह्यत्वमन्यस्य तेनैवावृत्ति रोधनमिति ।४८।

अपूर्णशक्तित्वाच्च जीवस्य न मत्स्यादिसाम्यम्। तथा च चतुर्वेदशिखायां—तस्य ह वा एतस्य परमस्य त्रीणि रूपाणि कृष्णो रामः कपिल इति तस्य ह वा एतस्य परमस्य पञ्च रूपाणि दश रूपाणि तानि ह वा एतानि सर्वाणि पूर्णानि सर्वाण्यमितानि सर्वाण्यमंमितान्यथा वराः सर्व एवा पूर्णाः सर्व एव वद्धन्ते यान्ति मुच्यन्ते च केचनेति ॥ ४९ ।

आभास एव च ॥ ५० ॥

अदृष्टानियमात् ॥ ५१ ॥

अभिसन्ध्यादिष्वपि चैवम् ॥ ५२ ॥

प्रदेशादिति चेन्नान्तर्भावात् ॥ ५३ ॥

इति श्रीमत् कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पाद विरचिते द्वितीयाध्यायस्य तृतीय पादः समाप्तः ।

रूपं रूपं प्रतिरूपो बभूवेति प्रतिबिम्बत्वाच्च न साम्यम् । वाराहे च । द्विरूपांशको तस्य परमस्य हरेर्विभोः । प्रतिबिम्बांशकश्चाथ स्वरूपांशक एव च । प्रतिबिम्बांशका जीवाः प्रादुर्भावाः परे स्मृताः । प्रतिबिम्बोऽस्त्वल्पसाम्यं स्वरूपाण्येतराणि तु इति । सोपाधिरनुपाधिश्च प्रतिबिम्बो द्विधेष्यते । जीव ईशस्यानुपाधि रिन्द्रचापो यथा रवेरिति पैङ्गिश्रुतिः । यथैषा पुरुषेच्छाया एतस्मिन्ने तदाततमिति च श्रुतिः ॥ ५० ॥

अस्य प्रतिबिम्बानां मिथो वैचित्र्यकारणमाह—अनादिविद्याकर्मादिवैचित्र्याद्वैचित्र्यम् ॥ ५१ ॥

इच्छाद्वेषसुखदुःखादिवैचित्र्यञ्चादृष्टादेव । च शब्देन प्रतिक्षणं वैचित्र्यम् ॥ ५२ ॥

न स्वर्गभूम्यादिप्रदेश वैचित्र्याद् वैचित्र्यं तत्रापि रथ्य दृष्टापेक्षत्वादेकदेशस्थिता नामेव वैचित्र्यदर्शनाच्च ॥ ५३ ॥

तथा प्राणाः ॥ १

गौण्यसम्भवात् ॥ २ ॥

प्रतिज्ञानुपरोधाच्च ॥ ३ ॥

इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदा-
नन्दतीर्थभगवत्पूज्यपादविरचिते
द्वितीयाध्यायस्य तृतीय-
पादः समाप्तः

युक्तिसहितश्रुतिविरोधं श्रुतीनामपाकरोत्यनेनपा-देन। प्राणा एवेदमग्र आसंस्तेभ्यो भूतानि जज्ञिरे। तेभ्यो-ऽण्डमण्डस्यान्तस्त्विमे लोकाः। अथ प्राणा एवानादयः प्राणा नित्या इति कापायणश्रुतौ प्राणानामनुत्पत्तिः श्रूयते। नोपादान ह्यैन्द्रियाणा सतोऽनुत्पत्तिरिष्यते। उपादानकृता सृष्टिः सर्वलोकेषु चादृता। इति भविष्यत्पुराणे एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति चात उच्यते तथा कालादय. परमात्मन उत्पद्यन्ते तथा प्राणा अपि ॥ १ ॥

अनादिश्रुतिर्गौणानादित्वापेक्षया मुख्यासम्भवात् ॥ नित्यान्येतानि सौक्ष्म्येण ह्यैन्द्रियाणि तु सर्वशः। तेषां भूतैरुपचय. सृष्टिकाले विधीयते परेण साम्य सम्प्राप्ति कस्य स्यान्मुख्यनित्यतेति हि भविष्यपुराणे ॥ २ ॥

इदं सर्वमसृजतेति ॥ ३ ॥

तत्प्राक्श्रुतेश्च ॥ ४ ॥
तत्पूर्वकत्वाद्वाचः ॥ ५ ॥
सप्तगतेर्विशेषितत्वाच्च ॥ ६ ॥

द्विधा ह्येवेन्द्रियाणि नित्यानि चानित्यानि च तत्र नित्यं मनोऽनादित्वात्त्वमनाः पुमान्स्थितश्च नित्यान्यन्यानीति गौपवनश्रुतौ मनसोऽनुत्पत्तिः सयुक्तिका श्रूयते अत आह मनः सर्वेन्द्रियाणि चेति पूर्वोक्तत्वादनुत्पत्तिर्मनसो युज्यते । पूर्वं मनः समुत्पन्नं ततोऽन्येषां समुद्भवः । तदनुत्पत्तिवचनमल्पोपचयकारणादिति वायुप्रोक्तवचनं च शब्देन गृह्यतेम् ॥ ४ ॥

नित्यया नित्यया स्तौमि परमात्मानमच्युतमिति वाग्वाऽनित्या न ह्येषोत्पद्यते यस्या हि स्तुतिरयतिष्ठते इति सयुक्तिकं पौष्यायणश्रुतौ वाचोऽनुत्पत्तिरुच्यते अतोऽब्रवीत् तस्मान्मन एव पूर्वरूपं वागुत्तररूपमिति मनःपूर्वकत्वा द्वाचो नानुत्पत्तिः । वगिन्द्रियस्य नित्यत्वश्रुतिसन्निधियोग्यता । उत्पत्तिर्मनसो यस्मान्न नित्यत्वं कुतस्त्वनेति वायुप्रोक्तिः ॥ ५ ॥

सप्त प्राणाः प्रभवन्ति तस्मादिति श्रुतिः सप्तैव मारुताः बाह्ये प्राणाः सप्त तथात्मनि । अधिदेवे तथाध्यात्मेऽ संख्यासाम्यविदो विदुरिति च स्कान्दे । द्वादश वा एते प्राणा द्वादशमासा द्वादशादित्या द्वादशराशयो द्वादशग्रहा इति कौण्डिन्यश्रुतौ द्वादशप्राणा दृश्यन्ते । अतो वक्ति—ज्ञानेन्द्रियाणि वया सप्तत्व गुहाशयां निहिताः सप्त

हस्तादयस्तु स्थितेऽतो नैवम् ॥ ७ ॥

अणवश्च ॥ ८ ॥

श्रेष्ठश्च ॥ ९ ॥

सप्तेति विशेषणात् सप्त प्राणाः कर्मेन्द्रियः एव प्राणा द्वादशकं शरीरे नित्यसंस्थितमिति भविष्यत्पुराणवचन च प्रमाणात् ॥ ६ ॥

हस्तादीनां कर्मविषयत्वात् सह पाठः। संसारस्थिति-हेतुत्वात् स्थित कर्मविदो विदुः । तस्मादुत्क्रान्तिहेतुत्वात् प्राणं गतिविशेषोच्यत इति वायुप्रोक्तिः ॥ ७ ॥

दिवीव चक्षुराततमिति व्याप्तिः प्रतीयते दूरस्थवस्तुदर्श-नादियुक्तिश्च । चक्षुभि पश्यत्यणुभिः शृणोति प्राणाणुभि-श्चव प्राणैर्हीतद्भवतीति कौण्डिन्यश्रुति । प्रतीयत्ति— तद्यथा ह्यणुनश्चक्षुष प्रकाशो व्याततः एव वीणावा पुरुषस्य प्रकाशोव्याततोऽणुर्ह्येष भवतीति शाण्डिल्य-श्रुति ॥ ८ ॥

नेष प्राण उदेति नास्तमेति एकाक एष मध्ये स्थाता अथैनमाहुर्मध्यम इति मुख्यप्राणस्यानुत्पत्तिः श्रूयते । शत् मासिर्येत् परित्याग उत्पत्तिर्मरणन्तथा । सर्वेषामिति-श्चैव कथ प्राणस्य युज्यते इति च युक्तिर्युक्तिः । आत्मन एष प्राणो जायत इति च । अत आह । श्रेष्ठेन ह वा एष पुरुषोऽवतिष्ठते स्थूलत्वेनोदेतीति श्रेष्ठस्य स्थूलत्व उक्तमित. हृष्टोऽन्यत स्थूलोऽथेन शाप' ।, चाद्दिर्नादि-रितीति गौपवनश्रुति ॥ ९ ॥

न वायुक्रिये पृथगुपदेशात् ॥ १० ॥

चक्षुरादिवत्तु तत्सह शिष्ट्यादिभ्यः ॥ ११ ॥

चेष्टायां वाह्यवायौ च मुख्यप्राणे च गीयते। प्राणशब्द-स्त्रिषु ह्येषु मुख्ये मुख्यः प्रकीर्त्तित इति वायुक्रिययोरपि व्यपदेशादुत्पत्तिश्रुतिस्तयोर्न स्यात्। स प्राणमसृजत खं वायुर्ज्योतिरापस्तपो मन्त्राः कर्मेति पृथगुपदेशात्। भूतानि चेष्टा मन्त्राद्य मुख्यप्राणादिदं जगत्। मुख्यप्राणः परात्मा च न परः कारणान्वित इति वायुप्रोक्तिः। १०॥

प्राणादिदमाविरासीत प्राणोधत्ते प्राणोन्नयमभ्युपैति न प्राणः किञ्चिदाश्रित इत्यग्निवेश्मश्रुतौ। यदाश्रयादस्य चेष्टा सोऽन्यं कथमुपाश्रयेत्। यथा प्राणस्तथा राजासर्वस्यैकाश्रयो भवेदिति च युक्तिर्भारते। प्राणस्यैतद्वशे सर्वं प्राणः परवशे स्थित। न परः किञ्चिदाश्रित्य वर्त्तते परमो यत इति पैङ्गिश्रुतिः। अत आह चक्षुरादिवन्मुख्य-प्राणोऽपि परमात्मवश एव। सर्वं ह्येवैतत् परमेऽवतिष्ठते प्राणश्च प्राणिनश्च स ह्येव एवैतान्वयत्युन्नयति वशीकरोति इतिगौपवनश्रुतौ चक्षुरादिभिः सह तद्वशत्वेनैव शास-नात्। सर्वकर्त्तापि सन् प्राणः परमाधारतः स्थितः। कथमेवान्यथा स स्याद् यतो नैवेश्वरद्वयम्। अवान्तरेश्वर-त्वेन तस्येश्वरवचो भवेत्। अतो मध्यमतामाहुस्तस्य वेदेषु वेदिनः। अनन्येश्वरतां प्राणे तदन्येश्वरवर्ज्जनात्। यतो विशेषवाक्येन चोयते समता वचः। नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति दृष्ट इत्यादिवचनयुक्तय चादिशब्देनोक्ताः। ११॥

अकरणत्वाच्च न दोषस्तथाहि दर्शयति ॥ १२ ॥

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ १३ ॥

अणुश्च ॥ १४ ॥

इतरेषां प्राणानां करणत्वान्मुख्यस्याकरणत्वाच्च तस्मात्त्येभ्यः अनुत्तमत्वं युज्यते माण्डव्यश्रुतिश्च। तानि ह वा एतानि सर्वाणि करणानि अथ प्राण एवा कारणस्तस्मात्मुख्यस्तस्मान्मुख्य इत्याचक्षत इति ॥ १२ ॥

सर्वे वा एते मुख्यदासाः। प्राणोऽपानो व्यान उदानः समान इति। अथ प्राणो वाव सम्राडिति कौण्डिन्यश्रुतिः। प्राणापानादयः सर्वे मुख्यदासा यतोऽनिशम्। अतस्तदाज्ञया नित्यं स्वानि कर्माणि कुर्वत इति युक्तिर्वायुप्रोक्तेः। मुख्यस्यैव स्वरूपाणि प्राणाद्याः पञ्चवायवः। स एव प्राणिनां देहे पञ्चधा वर्त्ततेऽनिशमिति गौपवनश्रुतिः। अतोवक्ति — अथ पञ्चवृत्त्ये तत् प्रवर्त्तते प्राणो वा पञ्चवृत्तिः प्राणोऽपानोव्यानः उदानः समान इति तेभ्यो वा एतेभ्यः पञ्च दासाः प्रजायन्ते प्राणाद्वाव प्राणोऽपानादपानो व्याना द्यान उपादानादुदानः समानादेव समानो यथाह वै मनः पञ्चधा व्यपदिश्यते मनो वुद्धिरहङ्कार चित्तं चेतनेति तेभ्यो वा एतेभ्यः पञ्च दासाः प्रजायन्ते मनसो वाव मनोवुद्धेर्वुद्धिरहङ्कारादहङ्कारश्चित्ताच्चित्तं चेतनाया एव चेतनैवमितीति ॥ १३ ॥

प्राण एवाधस्तात् प्राण उपरिष्टात् प्राणो मध्यतः प्राणः सर्वतः प्राण एवेदं सर्वमिति प्राणस्य व्याप्तिः प्रतीयते।

ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ १५ ॥
प्राणवता शब्दात् ॥ १६ ॥

यत' सर्वं जगद्व्याप्य तिष्ठति प्राण एव तु। अतो धृतं जगत् सर्वमन्यथा केन धार्यत इति युक्तिं वायुप्रोक्तेः। अणुनैतत् सृज्यतेऽणुनैतद्धार्यतेऽणौ लयमभ्युपैति वा प्राणो अणुः प्राणो ह्येतद्भवतीति सौनायणश्रुतिः। अत आह स वा एष प्राणोऽणुर्महान् नामान्तर्बाह्यणुर्वेह्निर्महान् अणोर्वा ईशितव्येम ईश ह्यसौ सर्वस्येशितव्यश्च परस्ये ति कौण्डिन्यश्रुतिः ॥ १४ ॥

करणत्वं प्राणानामुक्तं जीवस्य करणान्याहुः प्राणानि तस्य सर्वशः। यस्मात्तद्वशगा एते दृश्यन्ते सर्वदेहिषु इति सौनायणश्रुतौ च युक्तिकं जीवकरणत्वं प्रतीयते ब्रह्मणो वा एतानि करणानि चक्षुः श्रोत्रं मनो वागिति तदेतैः कारयतीति च कामायणश्रुतौ अत आह यज्ज्योतिराद्यधिष्ठानं ब्रह्म तदेवैतैः करणैः प्रवर्त्तयति यः प्राणे तिष्ठन्नित्यादि तदामननात् ॥ १५ ॥

कथं जीवकरणत्वश्रुतिरित्यतो वक्ति—जीवेनैव करणैः कारयति परमात्मा अतो न विरोधः। एष ह्यनेनात्मना चक्षुषा दर्शयति श्रोत्रेण श्रावयति मनसा मानयति बुद्ध्या बोधयति तस्मादेतमाहुः ख्यतिरख्यातिरितीति भाल्लवेयश्रुतिः। कारणैः कारणं ब्रह्मपक्षपापेक्षयाखिलम्। श्रोत्रादिभिः कारयति करणानीत्यतो विदुः। न जीवापेक्षया मुख्यं कारयेत् परमेश्वरः। केवलात्मेच्छया तस्मान्मुख्यत्वं तस्य नियतमिति वाराहे ॥ १६ ॥

तस्य च नित्यत्वात् ॥ १७ ॥
त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥१८॥
भेदश्रुतेः ॥ १९ ॥

अनादिनित्यत्वाच्च जीवकरणसम्बन्धस्य युज्यते तत् करणत्वमिति श्रुतिः। अथाविद्योगिनि करणैर्वाव न वियुज्यते देहेनैव वियुज्यते इत्येतद्वाव करणानां करणत्वं यद्वाव न वियुज्यत इति गौपवनश्रुतिः। चशब्दः करण-सम्बन्धग्राही ॥ १७ ॥

अथेन्द्रियाणि प्राणा वा इन्द्रियाणि प्राणा हीदं द्रवन्तीति सयुक्तिका सौत्रायणश्रुति । सामान्येन प्राणानामिन्द्रियत्वं वक्ति द्वादशैवेन्द्रियाण्याहुर्मनो बुद्धी तु द्वादश इति च कापायणश्रुतिः। अत' कस्येन्द्रियत्व निवार्यत इत्यतो वक्ति मुख्यप्राण ऋते त एवेन्द्रियाणि द्वादशैवेन्द्रियाण्याहु प्राणो मुख्यस्त्वनिन्द्रिय इववतां ह्येन्द्रियाणां तु नियन्ता प्राण एकराडिति पौत्रायणश्रुति.। श्रोत्रादीनि पञ्चैव तथा वागादिपञ्चकम्। मनोबुद्धिसहायानि द्वादशैवेन्द्रियाणि तु। विषयद्रवणात्तेषामिन्द्रियत्व मुदाहृतम्। तेषा नियामकः प्राणः स्थित एवा खिलप्रभुरिति बृहत्संहितायाम् ॥ १८ ॥

स्थित एव हीद मुख्यप्राणः करोति कारयति चलति चालयति धत्ते धारयति प्रभु वा एनमाहुरथेन्द्रियाणि तु स्थितानि न कुर्वन्ति न कारयन्ति न चलन्ति न चाल-

वैलक्षण्याच्च ॥ २० ॥

संज्ञामूर्त्तिक्लृप्तिस्तु त्रिवृत् कुर्वत उपदे-
शात् ॥ २१ ॥

यन्ति न दृधते न धापयन्ति तानि एतान्यबलानि तस्मा-
दाहुरिन्द्रियाणि कारणानीति पौत्रायणश्रुतेः ॥ १९ ॥

पुरुषापेक्षया प्रवृत्तिरिन्द्रियाणां दृश्यते न मुख्यस्य-
प्राणाग्नय एवैतस्मिन् पुरे जाग्रतीति च श्रुतिः ॥ २० ॥

विरचो वा इद विरेचयति विदधाति ब्रह्मा वै विरच-
एतस्मादीमे रूपनामनीति गौपवनश्रुतिः। यस्माद्धरि-
श्चयेत् सर्वं विरश्चस्तेन भण्यते। एकैव कर्त्ता जगतो ब्रह्मैव
च चतुर्मुख इति युक्तिर्ब्राह्मे। अथ कस्मादुच्यते परम इति
परा ह्येते नामरूपे व्याक्रियेते तस्मादेनमाहुः परम इति
अथ कस्मादुच्यते ब्रह्मेति बृहत्त्वादबृंहणत्वाच्चेत्यग्निवेश्य-
श्रुतिः। अत आह—नामरूपक्लृप्तिः परमादेव सर्वाणि-
विचिन्त्य धीरो नामानि कृत्वाभिवदन्यदास्ते इति श्रुतेः।
त्रिवृत् कुर्वत इति हेतुगर्भः त्रिवृत्करणापेक्षत्वान्नाम-
रूपयोः सर्वनाम्नां च रूपाणां व्यवहारेषु केशवः। एक एव
यतः स्रष्टा ब्रह्माद्यास्तदवान्तरा इति पाद्मे। त्रिवृत् क्रिया
यतो विष्णो रूपञ्च तदपेक्षया। रूपापेक्षं तथा नाम
व्यवहारस्तदात्मकः। अतो नाम्नश्च रूपस्य व्यवहारस्य
वैकराट्। हरिरेव यतः कर्त्ता पितातो भगवान् प्रभुरिति
च ब्रह्माण्डे ॥ २१ ॥

मांसादिभौमं यथाशब्दमितरयोश्च ॥ २२ ॥

वैशेष्यात्तु तद्वादस्तद्वादः ॥ २३ ॥

इति श्रीमत् कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादविरचिते द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः।

अन्नं शोढमुत्पद्यते आपो वाव मांसमस्थि च भवन्त्यापः शरीरमाप एवेदं सर्वमिति कौण्डिन्यश्रुतिः। अन्नमयं तु यतो मांसमतस्तृतिश्च मांसत इति च भारुते। पृथिवीशरीरमग्ने ति आकाश आत्मे ति च श्रुतो ब्रवीति यत् कठिनं सा पृथिवी यद् द्रवं तदापो यदुष्णं तत्तेज इति श्रुतेर्मांसादेव भौमं न सर्वशरीरं अप्तेजसोश्च कार्यं यथाशब्दमङ्गीकर्त्तव्यम्। यदा वायो विमिश्रं मिश्राद्दैरतद्भवतीति मिश्राणि हि भूतानि तस्मादेवैव माचचते च भूतानीति च कापायणश्रुतिः। पञ्चभूतात्मकं सर्वं तद्ध्येवविवचना। एकभूतात्मकेन व्यवहारस्तु वैदिकः। भौममित्येव काठिन्याच्छ्लोक्राटौटकमित्यपि। तेनिष्टाद्रा तैजसञ्च यथास्थूं वचनं श्रुतिरिति वायुर्मोक्तिः। २२।

कथन्तर्हि विशेषवचनमित्यत आह भूतानां विशेषसंयोगादेव विशेषव्यवहारः। पार्थिवानां शरीराणामर्द्धेन पृथिवी स्मृता। इतरेऽर्द्धत्रिभागिन्य आपस्तेजस्तु भागतः। इति सामान्यतो ज्ञेयो भेदश्च प्रतिपूरुषम्।

अथ तृतीयोऽध्यायः ।

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥

शरीराणामहं तेन चदाहृतमिति च ब्रह्मसंहितायाम् । सर्वाध्यायार्थावधारणार्थोऽध्यायन्ते द्विरुक्तिः । गारुडे च । अध्यायान्ते द्विरुक्तिः स्याद् दैवे वा वैदिकेऽपि वा । विचारो यत्र सन्येत पूर्वोक्तस्यावधारणे । अनुक्तानां प्रमाणानां स्वीकारश्च कृतो भवेत् । विनिश्चया चेतरान् मार्गान् संपूर्णफलता तथेति । २३ ॥

इति श्रीमत् कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादविरचिते द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः ।

साधनविचारोऽयमध्यायः । वैराग्यार्थं गत्यादिनिरूपणप्रथमपादे भूतबन्धो हि बन्धः । भूतबन्धस्तु संसारो मुक्तिस्तेभ्यो विमोचनमिति च वाराहे । तत्र मरणे भवति भूतानां विनिवृत्तिस्तु मरण समुदाहृतम् । भूतानां संप्रयोगस्तु जनिरित्येव पण्डितैरिति महाभारते । अतः किं साधनैरित्यत आह शरीरान्तरप्रतिपत्तौ भूतपरिष्वक्त एव गच्छति वेत्यथा पञ्चम्यामाहुता वाप पुरुष वचसो भवन्ति इति तु पञ्चम्यामाहुता वापः पुरुष वचसो भवन्तीति प्रश्नप्रतिहाराभ्याम् । १ ।

त्यात्मकत्वात्तु भूयस्त्वात् ॥ २ ॥

प्राणगतेश्च ॥ ३ ॥

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥

अपशब्द आत्मात्मकत्वाद् युज्यते। भूयस्त्वाचापां तापापनोदो भूयस्त्वमम्भसो ह्येतयस्त्रिमा इति च भागवते ॥ २ ॥

यत्र वाव भूतानि तत्र करणानि नित्यानि ह वाव एतानि भूतानि करणानि च नैतानि कदाचिद्वियुज्यन्ते न च विनीयन्त इति च भाल्लवेयश्रुतेः। प्रमाणगतेर्भूतान्यपि सन्तीति सिद्धम् ॥ ३ ॥

यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वाचं प्राण इत्यादि श्रुतेर्न प्राणानां जीवेन सह गतिरिति चेत्—न, भागतोऽग्न्यादिप्राप्तेः। पुरुषस्य मृतौ ब्रह्मन् प्राणा भागत एव तु। अधिदैवं प्राप्नुवन्ति भागतोऽनुव्रजन्ति तम्। पुनः शरीरसंप्राप्तौ तमेवानुविशन्ति चेति ब्राह्मे। ब्रह्माण्डे च। मृतिकाले जहत्येनं प्राणा भूतानि पञ्च च। भागतो भागतस्त्वेन मनुगच्छन्ति सर्वश इति ॥ ४ ॥

तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वतीति प्रथमाग्नौ श्रूयते न भूतानि जुह्वतीति अतो नेति चेत्—न, ता एव प्रसुता आपः श्रद्धारूपेण हूयन्त इति तु पञ्चम्यामाहुता वापः पुरुषवचसो भवन्तीत्युपसंहारोपपत्तेः ॥ ५ ॥

अश्रुतत्वादिति, चेन्नेष्टादिकारिणां प्रतीतेः ॥६॥
भाक्तं वाऽनात्मवित्त्वात्तथाहि, दर्शयति ॥ ७ ॥
कृतात्ययेऽनुशयवान् दृष्ट स्मृतिभ्यां ॥ ८ ॥

अस्त्वादिर्गतिः प्रत्यक्षतः श्रूयतेऽतः गत्यन्तरश्रवणम युक्तमिति चेन्न अथैतमं यजमानं किं न जहाति भूतान्येव भूतैरवगच्छति भूतैर्भुङ्क्ते भूतैरुत्पद्यते भूतैश्चरति भूतैर्विचरतीति काठकस्य श्रुतौ प्रतीयते ॥ ६ ॥

अपाम सोमममृता अभूमेत्यादिश्रुतिविरोध इत्यतो वक्ति। भाक्तमतस्तदमृतत्वं नान्यः पन्था अयनाय विद्यत इति श्रुतेरात्मविद एव हि मुख्यं वा मन्दात् पारम्पर्येणात्मविदपेक्षया वा। तथा हि श्रुतिः— स एनमविदितो न भुनक्ति यथा वेदो वा ननूक्तोऽन्यद्वा कर्माकृतम्। यदि ह वा अथ नैवं विन्महत्पुण्यं कर्म कुरुते तद्धास्यान्ततः क्षीयत एव। आत्मानमेव। लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते तस्माद्ध्येवात्मनो यद्यत् कर्म क्रियते तत्तत् सृजतेऽमृतो वाव सोमपो भवति यावदिन्द्रो यावन्मनुर्यावदादित्यः कर्मणा प्राणमातनोति ज्ञानेनामृतो भवति अथामृतानि कर्माणि यत एनममृतत्वं नयन्तीति च ॥ ७ ॥

कृतस्य कर्मणो भोगे न चयान्मुक्तिरित्यत आह ततः क्षीणेमं लोकमायाति पुनः कर्म कुरुते पुनर्गच्छति पुनरागच्छतीति श्रुतेः। भुक्त्वैवानुशयवानिमां प्राप्य भुवं पुनः। कर्म कृत्वा पुनर्गच्छेत् पुनरायाति नित्यशः।

यथेतमनेवं च ॥ ९ ॥

चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॥ १० ॥

आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ ११ ॥

आचतुर्दशमादर्वात् कर्माणि नियमेन तु । दशावराणां देहानां कारणानि करोत्ययम् । अतः कर्मक्षयान्मुक्तिः कुत एव सा [illegible] ॥ ८ ॥

शेषवानेवायाति यथैतमेव गच्छति यथैत मा गच्छति स भुङ्क्ते स कर्म कुरुते स परिवर्त्तत इति गतिप्रकारेणागतिः प्रतीयते । अतो ब्रूते धूमादभ्रमस्मादाकाशमाकाशाच्चान्द्रलोक यथेतमाकाशमाकाशाद्वायुर्वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति इति काषायणश्रुते. यथा गतमन्यथा च ॥ ९ ॥

तद् य इह रमणीयचरणो रमणीयां योनिमापद्यन्ते कपूयचरणाः कपूयामिति श्रुतेश्चरणफलमेव गमनागमनं न यज्ञादिकृतम् । आचार इति समोक्तकर्माङ्गत्वेन श्रविदः । अश्रविदस्त्वनाचारचरणं तूभयं मतमिति चेन्न यज्ञाद्युपलक्षणार्थाचरणादिश्रुतिरिति कार्ष्णाजिनिर्मन्यते ॥ १० ॥

तर्हि रमणीयाः कपूया इत्येव स्याच्चरणशब्दस्यानर्थक्यमिति चेन्न । यज्ञाद्युपलक्षणार्थां चरणादिरिति चरण

सुकृतदुष्कृते एवेति तु बादरिः ॥ १२ ॥

अनिष्टादिकारिणामपि च श्रुतम् ॥ १३ ॥

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गति-
दर्शनात् ॥ १४ ॥

स्मरन्ति च ॥ १५ ॥

पिचत्वाद्गमयीयत्वादिस्तदज्ञापनार्थत्वेनोपपत्तेः ॥ ११ ॥

धर्मं चरत माधर्मं [illegible] त्यागात् सुकृतदुष्कृते एव चरणा शब्दोक्ते इति बादरिर्मन्यते। तुशब्दात् स्वसिद्धान्तोऽपि स एवेति सूचयति। तुशब्दस्तु विशेषे स्यात् स्वसिद्धान्तेऽवधारणे इति च नामसङ्गोदधौ ॥ १२ ॥

पुण्यकृतामेव गमनागमने नेतरेषामित्यत आह। तद्य इह शुभकृतो ये वा अशुभकृतस्ते शुभमनुभूयावर्त्तन्ते पुनः कर्म्म कुर्वन्ति पुनर्गच्छन्तीति भाल्लवेयश्रुतौ ॥ १३ ॥

संयमनमनुभूय केषाञ्चिदारोहः केषाञ्चिदवरोहः। तुशब्दोऽवधारणे सर्वे वा एते शुभकृतः संयमनं प्रपतन्ति। तत्र ह ये परद्विषो गुरुद्विषः श्रुतिद्विषस्तदवमन्तारः शठा मूर्खा इति ते वै ततोऽवरुह्य तमसि प्रपतन्ति नैव ते उत्तिष्ठन्तेऽपि कर्हिचित् ये ध्रुवा एतदित्याहु.। अथ येऽन्ये ब्रह्मद्विषस्तेनाः सुरापास्ते वै तदनुभूयेमं लोकमनुव्रजन्तीति कौठरव्यश्रुतेः ॥ १४ ॥

गच्छन्ति पापिनः सर्वे नरकं वात्र संशयः। तत्र भुक्त्वा पतन्त्येव ये द्विषन्ति जनार्दनम्। महातमसि मग्नानां न

अपि च सप्त ॥ १६ ॥

तत्रापि च यद्व्यापारादविरोधः ॥ १७ ॥

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १८ ॥

तेषामुत्थितिः क्वचित । इतरेषान्तु पापानां व्युत्थानं विद्यतेऽपि च सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् । इति सर्वत्र नियमः पद्मकष्टे तु तन् सदेत्यादि ॥ १५ ॥

रौरवोऽथ महांश्चैव वह्निर्वैतरणी तथा । कुम्भीपाक इति प्रोक्तान्यनित्यनरकाणि च । तामिस्रान्धतामिस्रौ द्वौ नित्यौ संप्रकीर्त्तितौ । इति सप्त प्रधानानि बलीयस्तूत्तरोत्तरम् । एतानि क्रमशो गत्वैवारोहोऽथावरोहणमिति च भारते ॥ १६ ॥

ईश्वरस्य नरकायुक्तेः सर्वं विसृजति सर्वं विलापयति सर्वं रमयति सर्वं प्रवर्त्तयत्यन्तरस्मिन्निविष्ट इति कौषारवश्रुतिविरोधः इत्यतो वक्ति । च शब्दाद् दुःखानुभवेन स सर्गे स भूमौ स नरके सोऽन्धे तमसि प्रहसितक्रटैक एवानुविष्टो नासौ दुःखभोगोश्वर प्रभुत्वात् सर्वं पश्यति सर्वं कारयति नासौ दुःखभुग् य एव वेदेति पौत्रायणश्रुतेरविरोधः । नरकेऽपि वसन्नीशो नासौ दुःखभुगुच्यते । नीचोच्चतैव दुःखादेर्भोग इत्यभिधीयते । नासौ नीचोच्चतां याति पश्यत्येव प्रभुत्वत इति भागवततन्त्रे ॥ १७ ॥

अथैतयोः पथोर्नैकतरेण च तानीमानि क्षुद्राण्यसकृदावर्त्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्

न तृतीये तथोपलब्धेः १९ ॥
स्मर्य्यतेऽपि च लोके ॥ २० ॥
दर्शनाच्च ॥ २१ ॥

तृतीय स्थानमिति गति स्वातन्त्र्य भूतानां प्रतीयत इत्यत आह। विद्याकर्मापेक्षयैवैतद्वचनं तयोरपि प्रकृतत्वात् विद्यापथः कर्मपथो द्वौ पन्थानौ प्रकीर्त्तितौ। तद्वर्जित स्त्रिधा याति तिर्य्यग् वा नरकं तम इति च भागवते ॥ १८ ॥

यत्र दुःखं सुखं तत्र सर्वदापि प्रतीयते। अपि नीचगतौ किञ्चित् किमु मानुषदेहिन इति वचनात्महातमःस्वपि सुखप्राप्तिरित्यत आह। अथाविद्वान् कर्मा वाग्गच्छति त्रिधा ह वार्वाग् गतिस्तिर्य्यग् यातनातम इति हे याव सुखानुवृत्ते न तमः सुखानुवृत्तं केवलं ह्येवात्र दुःखं भगवतीति श्रुतेर्न तृतीयायां गतौ सुखम् ॥ १९ ॥

तिर्य्यक्षु नरके चैव सुखलेशो विधीयते। नान्धे तमसि मग्नानां सुखलेशोऽपि कश्चनेति भविष्यत् पर्वणि लोकसिद्धश्चैतत्। च शब्दाल्लोकसिद्धिरपि स्मार्त्तत्वाद्ध। अतिप्रिये यथा राज्ञा न दुःखं सहते क्वचित्। अत्यप्रिये सुखमपि तथैव परमेश्वरः — इति च ब्राह्मे। २०।

नारायणप्रसादेन समिद्धज्ञानचक्षुषा। अत्यन्तदुःखसंलीनान्निःशेषसुखवर्जितान्। नित्यमेव तथा भूतान् विमिश्रांश्च गणान् बहून्। निरस्ताशेषदुःखांश्च नित्यानन्दैकभागिनः। अपश्यद् विविधान् ब्रह्मा साक्षादेव चतुर्मुख इति दर्शनवचनाच्च पाद्मे ॥ २१ ॥

तृतीयशब्दादविरोधः संयोकस्य ॥२२॥
स्वाभाव्यापत्तिरुपपत्तेः ॥ २३ ॥
नातिचिरेण विशेषात् ॥ २४ ॥

तृतीये तृतीयतमसः श्रवणादेव शब्दानुसारात् संयोकलमोक्षप्राप्तिः ॥ २२ ॥

महातमस्त्रिधा प्रोक्तमूर्ध्वं मध्यं तथाधरम्। श्रवणेनैव मूर्च्छादिरधरस्य यतो भवेत्। तस्मात्र विस्तरेणैतत् कथ्यते राजसत्तमेति कौर्म्मे।

धूमो भूत्वाभ्रं भवतीत्याद्यन्यभावः श्रूयते स कथमित्यतो—ब्रवीति धूमादिषु प्रविष्टस्य तद्गतौ गतिः स्थितौ स्थितिरित्यादिरेव तद्भावापत्तिः। न ह्यन्यस्यान्यभावो युज्यते न च तत्पदप्राप्तिः। गारुडे च। धूमादिभावप्राप्तिश्च तद्गतौ गतिरेव च। स्थितौ स्थितिप्रवेशश्च लघुत्वादिस्तथैव च। न ह्यन्यस्यान्यथाभावो न च तत् पदमिष्यते। विद्यागम्यं पदं यस्मान्न तत् प्राप्यं हि कर्म्मणा। एकदेशस्वभावेन वागभेदापि युज्यते। यथा जीवः परं ब्रह्म ब्रह्मेद जगदित्यपोति ॥ २३ ॥

बहुस्थानगमनात् कल्पान्तमेव स्यादित्यत आह—तद्य इह रमणीयचरणा अभ्याशो रमणीयां योनिमापद्यन्त इति विशेषान्नातिचिरेण स्वर्गाल्लोकादवाक्प्राप्तो वत्सरात् पूर्वमेव तु। मातुः शरीरमाप्नोति पर्यटन् यत्र तत्र च इति नारदीये ॥ २४ ॥

अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २५ ॥
अशुद्धमिति चेन्न शब्दात् ॥ २६ ॥
रेतःसिग्योगोऽथ ॥ २७ ॥

त इह व्रीहियवा ओषधिवनस्पतयस्तिला माषा इति जायन्त इति श्रवणादनर्थफलत्वं यज्ञादेरिति। अतो वक्ति। अन्याधिष्ठिते व्रीह्यादिशरीरे प्रवेशः न तु भोगोऽस्य धूमो भूत्वाऽभ्रं भवतीत्यादिपूर्वोक्तिवत्। सोऽवामतः स्थावरान् प्रविशत्यभोगेनैव व्रजन् स्थूलशरीरमिति स्थूलाच्छरीराद्भोगाननुभुक्त इत्यभिलापात् कौठारवश्रुतौ स्वर्गादवागता देही व्रीह्यादीतरदेहगः। अभुञ्जंस्तु क्रमेणैव देहमाप्नोति कालत इति वाराहे ॥ २५ ॥

हिंसारूपत्वात् पापस्यापि सम्भवाद्दुःखं च भवत्विति चेन्न शब्दविहितत्वात्। हिंसा त्ववैदिकी या तु तयानर्थौ ध्रुवं भवेत्। वेदोक्तया हिंसया तु नैवानर्थः कथञ्चनेति वाराहे ॥ २६ ॥

स्वर्गादवागतश्चापि मातुरेवोदरं व्रजेदिति वचनाद्य एव श्रद्धो भवति यो वा रेतः सिञ्चति तमेवानुप्रविशतीति श्रुतिः कथमित्यत आह—ततो रेतःसिचाऽसवान् प्रविशत्यथ मातरमथ प्रसूयते स कर्म कुरुत इति कौठरश्रुतेः। पितरमेव प्रथमतो विशति मातुः प्राप्ति पश्चादपि भाव्यत्वात्॥ २७॥

योनेः शरीरम् ॥ २८ ॥

इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रे तृतीयाध्यायस्य प्रथमः पादः ।

देहं गर्भस्थित क्वापि । प्रविशेत् स्वमतो गत इति वचनात् पश्चादेव प्रविशतीत्यत आह । पितुः शरीरान्मातृयोनिमनुप्रविश्य ततं एव शरीरं प्राप्नोति दिवः स्थाणून् गच्छति, स्थाणुभ्य' पितरं, पितुर्मातरं, मातुः शरीरं, शरीरेण जायत इति समितं अथासम्मितं स्थाणुभ्यो जायते पितुर्मातुरन्तरे वा गर्भेवावच्छिदेति पौष्यायणश्रुतेः । स्थावराणि दिव प्रोक्ताः स्थावरेभ्यश्च पूरुषम् । पुरुषात् स्त्रियमापन्नस्ततो देहं यथाक्रमम् । देहेन जायते जन्तुरिति सामान्यतो जनिः । विशेषजननं चापि प्रोच्यमानं निबोध मे । स्थाणुष्वथापि पुरुषे प्रमदायामथापि वा । गर्भे वा बहिरेवाथ क्वचित् स्थानान्तरेषु चेति ब्राह्मे । २८ ।

इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये
श्रीमदानन्दतीर्थभगवत्पूज्यपादविरचिते
तृतीयाध्यायस्य प्रथमः पादः समाप्तः

अथ द्वितीयः पादः।

सन्ध्ये सृष्टिराह हि ॥ १ ॥
निर्म्मातारञ्चैके पुत्रादयश्च ॥ २ ॥
मायामात्रन्तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३
सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥

भक्तिरस्मिन् पादे उच्यते। भक्त्यर्थं भगवन्महिमोक्तिः। न स्वप्नोऽपि तं विना प्रतीयते न तत्र रथा रथयोगा न पन्थानो भवन्त्यथो रथान् रथयोगान् पथः सृजत इत्यादि-श्रुतेः। १।

य एष सुप्तेषु जागर्त्ति कामं कामं पुरुषो निर्म्मिमाण इति च। एतस्माद्धि वै पुत्रो जायते एतस्मात् भ्रातैतस्माद् भार्य्या यदेनं पुरुषमेव स्वप्नेनाभिहन्तीति गौपवनश्रु-तिश्च। २।

केन साधनेन इत्यत आह—अनादिमनोगतांश्च संस्कारान् स्वेच्छामात्रेण दर्शयति, नान्येन साधनेन सम्य-गनभिव्यक्तस्वरूपत्वात्। ब्राह्मे च। मनोगतांस्तु संस्का-रान् स्वेच्छया परमेश्वरः। प्रदर्शयति जीवाय स स्वप्न इति गीयते। यदन्यथात्वं जागर्त्वं सा भ्रान्तिस्तत्र तत् कृता। अनभिव्यक्तरूपत्वान्नान्यसाधनजं भवेदिति। ३।

साधनान्तराभावेऽपि भावाभावसूचकत्वेनेश्वरो दर्श-यति—यदा कर्म्मसु काम्येषु स्त्रियं स्वप्नेऽभि पश्यति। समृद्धिं तत्र जानीयात् तस्मिन् स्वप्न निदर्शने इति श्रुतेः।

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्ध-
विपर्ययौ ॥ ५ ॥
देहयोगाद्वा सोऽपि ॥ ६ ॥
तदभावो नाड़ीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥
अतः प्रबोधोऽस्मात् ॥ ८ ॥
स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ६ ॥

हिशब्ददर्शनाच्च। यद्यपि ब्रह्मणो भूयादेवता ह्युपभोऽपि वा स्वप्नस्याप्यथवा राजा तत्तथैव भविष्यतील्याचचते च स्वप्नविदो व्यासादयः ॥ ४ ॥

बन्धमोचप्रदत्वात् स एव स्वप्नतिरस्कर्त्ता। स्वप्नादिबुद्धिकर्त्ता च तिरस्कर्त्ता स एव तु। तदिच्छया यतो ह्यस्य बन्धमोचौ प्रतिष्ठिताविति च कौर्मे ॥ ५ ॥

देहयोगेन वासौ जाग्रदपि तत एव जागरिते स्थापयति म स्वप्ने स प्रभुरुपाराट् स एकोबहुधा भवतीति कौठरव्य देहयोगेन वासौ जाग्रदपि तत एव श्रुतेः ॥ ६ ॥

जाग्रत्स्वप्नाभावः सुषुप्तिर्नाडीस्थे परमात्मनि। आसु तदा नाडीषु सुप्तो भवति सता सौम्य तदा सम्पन्नो भवतीति श्रुतेः ॥ ७ ॥

यतस्तस्मिन् सुप्तिः एष एव सुप्तं प्रबोधयति एष तस्माज्जीव उत्तिष्ठत्येष प्रमातैष परम इति कौण्डिन्यश्रुतिः ॥८॥

न च केषाञ्चित् स्वप्नादिकर्त्ता न तु सर्वेषामिति एष ह्येव साधु कर्म कारयतीति कर्मण्यवधारणात्। प्रदर्शकस्तु

मुग्धेऽर्द्धसम्पत्तिः परिशेषात् ॥ १० ॥
न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥११॥
न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

सर्वेषां स्वप्नादेरेक एव तु । परमः पुरुषो विष्णुस्ततोऽन्यो नास्ति कश्चनेत्यनुसारस्मृतेश्च । एष स्वप्नान् दर्शयति एष प्रबोधयति एष एव परावानन्द इति च श्रुतिः । आत्मानमेव लोकमुपासीतेति च विधिः ॥ ८ ॥

मृत्यवस्थायां परमेश्वरेऽर्द्धप्राप्तिर्जीवस्य हृदयस्थात् परात्मनो बाह्यस्थो जाग्रदेषति । समीपस्थस्तथा स्वप्नं स्वपित्यस्मिन्नयं व्रजन् । यत एवं त्रयोऽवस्था मोक्षमुपरिशेषतः । अर्द्धमाप्तिरितिज्ञेयो दुःखमात्रप्रतिस्मृतेरिति च वाराहे । सोऽपि ततएवेतीति सिद्धम् । मूर्च्छाप्रबोधनश्चैव यत एव प्रवर्त्तते । स ईशः परमो ज्ञेयः परमानन्दलक्षण इति च कौर्मे ॥ १० ॥

स्थानापेक्षया परमात्मनोऽपि भेदादनुग्राह्यानुग्राहकभाव इति अत आह । स्थानापेक्षयापि परमात्मनो न भिन्नं रूपम् । सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षत इति श्रुतिः । एकरूपः परो विष्णुः सर्वत्रापि न संशयः । ऐश्वर्याद्रूपमेकञ्च सूर्य्यवद्बहुधेयत इति मात्स्ये प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि विधूत भेदमोह इति च भागवते ॥ ११ ॥

कार्य्यकारणवद्धी ता विश्वे ते विश्वतैजसौ । प्राज्ञः

अपि चैवमेके ॥ १३॥

अरूपवदेव हि तत् प्रधानत्वात् ॥ १४ ॥

प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥

कारणवदस्तु द्वौ तत्तयोर्न सिद्ध्यत इति भेदवचनान्नेति चेन्न एष त आत्मान्तर्याम्यमृत अयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वं अयं वै हरयोऽयं वै दश च सहस्राणि बहुनि चानन्तानि च तदेतद् ब्रह्म पूर्वं परमनन्तरमबाह्यं अयमात्मा ब्रह्म सर्वानुभूतिरनुशासनमिति प्रत्येकमभेदवचनात् ॥ १२ ॥

एवमभेदेनैव चशब्दा दनन्तरूपत्वं चैकशाखिनः पठन्ति। अमात्रोऽनन्तमात्र अद्वैतस्योपशमः शिव.। ओंकारो विदितो येन स मुनिर्नेतरो जन इति। अभेदेऽपि भेदव्यपदेश' स्थानभेदादैश्वर्ययोगाच्च युज्यते ब्रह्मतर्के च। बद्धो बन्धादिसाचित्वाच्चिदोच्चित्रेषु संस्थिते। निर्दोषाद्यरूपोऽपि कथ्यते परमेश्वर इति ॥ १३ ॥

रूपवत्वादनित्यत्वमिति। अतो वक्ति। प्रकृत्यादिप्रवर्त्तकत्वेन तदुत्तरत्वान्नैव रूपवद् ब्रह्मादिशब्दात्स्थूलमनणिवत्यादिश्रुतेश्च। भौतिकानीह रूपाणि भूतेभ्योऽसौ परा यतः। अरूपवानतः प्रोक्तः क तदव्यक्ततः पर इति मात्स्ये ॥ १४ ॥

यदा पश्य. पश्यते रुक्म वर्णं कर्त्तारमीशं पुरुषं ब्रह्मयानि श्यामाच्छबलं प्रपद्ये सुवर्णज्योतिरित्यादिश्रुतेनाच्च

आह च तन्मात्रम् ॥ १६ ॥
दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥
अतएव चोपमा सूर्य्यकादिवत् ॥ १८ ॥
अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥

न वैयर्थ्यं विलक्षणरूपत्वात् यथा चक्षुरादिप्रकाशे विद्यमानेऽपि वैलक्षण्यादप्रकाशादिव्यवहारः ॥ १५ ॥

वैलक्षण्यञ्चोच्यते रूपस्य विज्ञानानन्दमात्रत्वं एकात्मप्रत्ययसारमिति। आनन्दमात्रमजरं पुराणमेकं सन्तं बहुधा दृश्यमानम्। तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषामिति चतुर्वेदशिखायाम् ॥ १६ ॥

दर्शयति चानन्दस्वरूपत्वं तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभातीति। शुद्धस्फटिकसङ्काशं वासुदेवं निरञ्जनम्। चिन्तयीत यतिर्नान्यं ज्ञानरूपात्ततो हरेरिति च मात्स्ये ॥ १७ ॥

यस्मादेवं परमेश्वरस्वरूपाणां मिथो न कश्चिद्भेदः अतः साद्दश्याज्जीवस्यापि तथा स्यादिति न तस्य प्रतिबिम्बत्वमुक्तं चशब्देनाभेदं दर्शयति। रूपं रूपं प्रतिरूपो बभूव। बहवः सूर्य्यकायवत् सूर्य्यस्य सदृशा जले। एवमेवात्मका लोके परात्मसदृशा मता इत्यादि। अतएव भिन्नत्वतदधीनत्वतत्साद्दश्यैरेव सूर्य्यकाद्युपमानोपाध्यधीनत्वादिना ॥ १८ ॥

नित्यसिद्धत्वात् साद्दश्यस्य नित्यानन्दज्ञानादेर्न भक्ति-

ह्रदिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्॥२०
दर्शनाच्च॥२१॥
प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च
भूयः॥२२॥

ध्यानादिना प्रयोजनमिति। अतो ब्रवीति। अम्बुवत्खेडेन ग्रहण ज्ञानं भक्तिं विना न तत् सादृश्य सम्यग् विभज्यते यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनु स्वामिति हि श्रुतिः। सदृशत्वादुद्दिभक्तिसु खेडपूर्वाभिधीयते। तथैव व्यज्यते सम्यग् जीवरूप सुखात्मकमिति पाद्मे॥१९॥

तस्य च भक्तिज्ञानादेर्ह्रद्धिह्रासभाक्त्व विद्यते ब्रह्मादीनामुत्तमानां भक्त्यादेरन्तर्भावात्। एवं भक्त्यादिविशेषाङ्गीकारादेवेश्वरस्य ब्रह्मादीनन्यान् प्रति च सामञ्जस्यं भवति। साधनस्योत्तमत्वेन साध्यस्योत्तममाप्नुयु.। ब्रह्मादय क्रमेणैव यथानन्द श्रुतौ श्रुता। इति च नाम्ने॥२०॥

कुत। अथात आनन्दस्य मीमांसा भवतीत्यारभ्य ब्रह्मपर्य्यन्तेषु सुखेषु पुनर्विशेषदर्शनात्। चशब्दात् स्मृतिः। यथा भक्तिविशेषोऽत्र दृश्यते पुरुषोत्तमे। तथा मुक्तिविशेषोऽपि ज्ञानिनां लिङ्ग भेदन इति॥२१॥

सृष्टिसंहारकर्त्तृत्वमेवास्य न पालकत्वं स्वत.सिद्धेरित्यत आह। उक्त सृष्टिसंहार कर्त्तृत्वमात्र प्रतिषिध्य ततोऽधिक ब्रवीति। नैतावदेव नापरो ऽन्यदस्तुभा सदावा

तदव्यक्तमाह हि ॥ २३ ॥
अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २४ ॥
प्रकाशादिवच्चावैशेष्यम् ॥ २५ ॥

पृथिवीं बिभर्तीति चशब्दात् स्मृतिश्च। सृष्टिञ्च पालनञ्चैव संहार नियम तथा। एक एव करोत्येषः सर्वस्य जगतो हरिरिति ब्रह्माण्डे। २२।

परमात्मा परोक्षं च तत् प्रसादादेव न जीवशक्त्येति यत्तु मुच्यते अव्यक्तमेव तद् ब्रह्म यतः अरूपमघरं ब्रह्म सदा व्यक्तं च निष्कलम्। यज् ज्ञात्वा मुच्यते जन्तुरानन्दश्चाचयी भवेदिति कौठरव्य श्रुतिः। २३।

आराधनेऽप्यव्यक्तमेव ध्यानप्रत्यक्षेणैतरेयामितिस्कन्दस्व-लिङ्गाद्दनुमानेन न तमाराधयित्वापि कश्चिद् व्यक्तीकरिष्यति। नित्यो व्यक्तो यतो देवः परमात्मा सनातन इति च ब्रह्मवैवर्त्ते। २४।

नत्वव्यक्तरूपेण तथैव तिष्ठति। व्यक्तं किञ्चिद्रूपं गृहीत्वा दृश्यते। यथाग्न्यादयस्तन्मात्रा रूपेण दृष्ट्वा अपि स्थूलरूपेण दृश्यन्त एवमिति चेन्न अग्न्यादिवत् स्थूलसूक्ष्मत्वविशेषाभावात्। नासौ सूक्ष्मो न स्थूलः पर एव स भविष्यति तस्मादाहुः परम इतीति सांख्यश्रुतिः स्थूलसूक्ष्मविशेषो न कश्चित् परमेश्वरे। सर्वैश्चैकप्रकारोऽसौ सर्वरूपैश्च जायत इति च गारुडे। अव्यक्तव्यक्तभावो च न कश्चित् परमेश्वरे। सर्वत्राव्यक्तरूपोऽयं यत एव जनार्दन इति कौर्म्मे। २५।

प्रकाशश्च कर्मण्यभ्यासात् ॥ २६ ॥
अतोऽनन्तेन तथाहि लिङ्गम् ॥ २७ ॥
उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २८ ॥
प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २९ ॥
पूर्ववद्‌ वा ॥ ३० ॥

तर्हिं किं यत्नेनेत्यत आह विषयभूते तस्मिन्नेव अवणा-द्यभावात् प्रकाशश्च भवति। आत्मा वारे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्य इति श्रुतेः ॥ २६ ॥

नित्याव्यक्तस्य कथं प्रकाश इत्यत उच्यते उभयत्र प्रमा-णाभावात् तत् प्रसादादेव प्रकाशो भवति। तस्याभिधा-नाद्‌ योजनात्तत्त्वभावाद्‌ भूयश्चान्ते विश्वमायानिवृत्तिरिति लिङ्गात्। युज्यते गतस्यानन्तशक्तित्वात् नित्याव्यक्तोऽपि भगवानीक्ष्यते निजशक्तितः। तमृते परमात्मानं कः पश्ये-तामृत प्रभुमिति नारायणाध्यात्मे ॥ २७ ॥

स्वरूपेणानन्दादिना कथमानन्दत्वादिरित्यत उच्यते। आनन्दं ब्रह्मणो विद्वान्। अयेष एव परमात्मानन्द इत्यु-भयव्यपदेशात् अहिकुण्डलवदेव युज्यते यथाहि कुण्डली कुण्डलश्च तुशब्दात् केवलस्तुलिगम्यत्वं प्रदर्शयति ॥ २८ ॥

यथादित्यस्य प्रकाशत्वं प्रकाशित्वञ्च। एवं वा दृष्टा-न्तास्तेजोरूपत्वाद्‌ ब्रह्मणः यथैकः कालः पूर्वं इत्यवच्छेद-कोऽवच्छेद्यश्च भवति अतिसूक्ष्मत्वापेक्षयैव दृष्टान्तः स्थूलम-तीनां च प्रदर्शनार्थं अहि कुण्डल दृष्टान्तः। प्रमाणवत्

प्रतिषेधाच्च ॥ ३१ ॥

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥ ३२ ॥

सामान्यात्तु ॥ ३३ ॥

बुद्ध्यर्थः पादवत् ॥ ३४ ॥

कावलहा यथाक्षे प्रयनादिकं ब्रह्मयवेवमुक्तानामानन्दाऽभिन्न एव तु इति नारायणाध्यात्मे । आनन्देन स्वभिन्नेन व्यवहारः प्रकाशवत् । कालवद्वा यथा कालः स्वावच्छेदेन तां व्रजेदिति ब्राह्मे ॥ २९ ॥ ३० ॥

एकमेवाद्वितीयं नेह नानास्ति किञ्चनेति भेदस्य ॥३१॥

नचानन्दादित्वाल्लोकानन्दादिवत् एष सेतुर्विधृतिरेष आनन्दः परस्यैष नित्यो महिमा ब्राह्मणस्येति सेतुत्वम् उच्यते यतो वाचो निवर्त्तन्त इत्युन्मानत्वम् । एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति सम्बन्धः । अन्यजन्मानन्तु जीवानामन्यज्ज्ञानं परस्य च । नित्यानन्दाव्ययं पूर्णं परं ज्ञानं विधीयत इति भेदः । अतो लौकिकत्वात् परमेव ब्रह्मानन्दादिकम् ॥ ३२ ॥

दर्शनादेव चान्यानन्दादीनाम् । अदृष्टमव्यवहार्यं व्यपदेशः सुखं ज्ञानमोजो बलमिति ब्रह्मणः,तस्माद् ब्रह्मेत्याचक्षते इति कौण्डिण्य श्रुतिः ॥ ३३ ॥

अप्रसिद्धस्य कथमानन्द इत्यादि व्यपदेश इत्यतो वक्तिलोकेशरसम्बन्धज्ञापनार्थमप्रसिद्धोऽपि पादो यथा पादशब्देन व्यपदिश्यते पादोऽस्य विश्वा भूतानीति,तथा अलौकिको-

स्थानविशेषात् प्रकाशादिवत् ॥ ३५ ॥

उपपत्तेश्च ॥ ३६ ॥

तथान्यप्रतिषेधात् ॥ ३७ ॥

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३८ ॥

ऽपि ज्ञानादिस्वच्छन्देरेव भण्यते। ज्ञापनार्थाय लोकस्य यथा राजेव देवराडिति पाद्मे ॥ ३४ ॥

परानन्दमात्रत्वं कथं ब्रह्मादानन्दादीनां विशेष इत्यत उच्यते यथादित्यस्य दर्पणादिस्थानविशेषात् प्रतिबिम्बविशेषः एवं मानुषादेरपि ब्रह्मादिगुणवैशेष्यादानन्दः परमस्य च। प्रतिबिम्बत्वमायाति मध्योच्चादिविशेषत इति च वाराहे ॥ ३५ ॥

ऐश्वर्यात् परमाद्विष्णोर्भक्त्यादीनामनादितः। ब्रह्मादीनां सुपपन्ना ह्यानन्दादेर्विचित्रतेति पाद्मे ॥ ३६ ॥

ध्यानकाले यच्चित्ते दृश्यते तदेव ब्रह्म रूपम्। अतः कथमव्यक्ततेत्यत आह यथा जीवानन्दादेरन्यद् ब्रह्म तथोपास्या क्रतादपि। यन्मनसा न मनुते येनाहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति प्रतिषेधात्। पश्यन्ति परमं ब्रह्म चित्ते यत्प्रतिबिम्बितं ब्रह्मैव प्रतिबिम्बोऽयं यतस्तेषां फलप्रदम्। तदुपासनञ्च भवति प्रतिमोपासनं यथा। दृश्यते त्वपरोक्षेण ज्ञानेनैव परं पदम्। उपासनात्त परोक्षं गमयेत्तत् प्रसादत इति च ब्रह्म तर्के ॥३७॥

देशकालान्तरेऽन्यतोऽपि सन्ध्यादिक्रिया युक्तेत्यतो ब्रूते।

फलमत उपपत्तेः ॥ ३८ ॥

श्रुतत्वाच्च ॥ ४० ॥

धर्मं जैमिनिरतएव ॥ ४१ ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४२ ॥

इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रे
तृतीयाध्यायस्य द्वितीयः
पादः समाप्तः ।

सर्वदेशकालवस्त्वादिष्वनेनैव रूप्यादिकं प्रवर्त्तते । एष सर्वगत एष ईश्वर एषोऽचिन्त्य एष परम इति भाल्लवेय श्रुतिः । सर्वमेतस्मात् सर्वदा सर्ववस्तुषु । स्वरूपभूतया नित्य-शक्त्यामायाख्यया यतः । अतो मायामयं विष्णुं प्रवदन्ति सनातनमिति चतुर्वेदशाखायाम् । आदित्यष्टादन्यत्र प्रमाणाभावाच्च । ३८ ॥

कर्मापेचत्वात् फलदानस्य तदेव ददातीति न भाव्यम् । कुतः अत एवेश्वरात् फलं भवति । न ह्यचेतनस्य स्वतःप्रवृत्तिर्युज्यते । ३९ ॥

विज्ञानमानन्दं ब्रह्मरातिर्दातुः परायणमिति ॥ ४० ॥

यतः फलं तदेव कर्मेश्वराद्भवति । एष ह्येव साधु कर्म कारयतीति श्रुतेरिति जैमिनिः ॥ ४१ ॥

परस्य कर्मणश्चोभयोः फलकारत्वेऽपि न कर्म परप्रवर्त्तकं पर एव कर्मप्रवर्त्तकः पुण्येन पुण्यं लोकं नयति

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्॥ १॥

भेदान्नेति चेन्नैकस्यामपि॥ २॥

स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च॥ ३॥

पापेन पाप लोकमिति हेतुव्यपदेशात् द्रव्यं कर्म च कालश्चेति॥ ४२॥

इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रे तृतीयाध्यायस्य द्वितीयः पादः समाप्तः

उपासनास्मिन पादे उच्यते सर्वं परिज्ञानं प्रथमत उच्यते मन्ता निर्णयः। उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिरिति वचनात्। सर्ववेदनिर्णयोत्पाद्यं ज्ञानं ब्रह्म। आत्मेत्येवोपासीतेत्यादि विधीना तदुक्तयुक्तोना चाविशिष्टत्वात्॥ १॥

विज्ञानमानन्दं ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि प्रतिशाखं मुक्तिभेदान्नैकाधिकारिविषया। सर्वशाखा इति चेत् न। एकस्यामपि शाखायामात्मेत्येवोपासीत स्व ब्रह्मेत्यादिनिर्देशनात्॥ २॥

स्वाध्यायोऽध्येतव्य इति सामान्यविधेः। हिशब्दाद्वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मनेति स्मृतेः। एव

सलिलवच्च तन्नियमः ॥ ४ ॥

दर्शयति च ॥ ५ ॥

उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च ।। ६ ।।

वेदोक्तमार्गेण कर्म कुर्वीत नित्यशः। आनन्दो हि फलं यस्माच्छाखाभेदो ह्यशक्तिजः। सर्वकर्म हृतीयस्मादशक्ताः सर्वजन्तवः। शाखाभेदं कर्मभेदं व्यासस्तस्मादचीक्लृपत्। इति समाचारे सर्वेषामधिकाराच्च ॥ ३ ॥

यथा सर्वं सलिलं समुद्रं गच्छति एवं सर्वाणि वचनानि ब्रह्मज्ञानायैवेति नियमः। आग्नेये च. यथा नदीनां सलिलं यस्य सागरगं भवेत्। एवं सर्वाणि वाक्यानि पुंशक्त्या ब्रह्मवित्तय इति ॥ ४ ॥

सर्वैश्च वेदैः परमो हि देवो जिज्ञास्यासौ नाल्पवेदैः प्रसिद्धेरत्। तस्मादेन सर्ववेदानधीत्य विचार्य च ज्ञातुमिच्छेम्मुमुक्षुरिति चतुर्वेदशिखायाम्। सर्वान् वेदान् सेतिहासान् सपुराणान् सयुक्तिकान् स पञ्चरात्रात् विज्ञाय विष्णुर्ज्ञेयो न चान्यथेति ब्रह्मतर्के ॥ ५ ॥

सर्ववेदैः स यो नोपास्योऽशक्यत्वादित्यत आह। सर्ववेदोक्तान् गुणान् दोषाभवांश्चोपसंहृत्यैव परमात्मोपास्यः। उपास्य एकः परतः परो यो वेदैश्च सर्वैः सहचेतिहासैः। सपञ्चरात्रैः सपुराणैश्च देवः सर्वैर्गुणैस्तत्र तत्र प्रतीतेरिति हि भाल्लवेय श्रुतिः। आग्नेये च। विधिशेषाणि कर्माणि सर्ववेदोदितान्यपि। यथा कर्माणि सर्वैश्च सर्वाण्येवा-

थात्वं शब्दादिति चेन्नाविशेषात्॥ ७॥
प्रकरणभेदात् परोवरीयस्त्वादिवत्॥ ८॥
ातश्चेत्तदुक्तमस्ति तु तदपि॥ ६॥

ात:। एवं सर्वगुणान् सर्वदोषाभावाय यत्नत:। योज-
व भगवानुपास्यो नान्यथा कश्चिदिति समानविषये-
ंहार:। न तु सोऽरोदीदित्यादीनां गुणैरेव स
शो नैव दोषै: कथञ्चन। गुणैरपि न तूपास्यो ये
ाविरोधिन: इति तत्तन्त्रे॥ ६॥
श्रात्मेत्येवोपासीतेति शब्दादुपसंहारस्यान्यथात्वमिति
। एते गुणोपास्या इति विशेषवचनाभावात्। सर्वे-
ेक एवेशिताऽसावुपासितव्यो न तु दोषै: कदाचि-
। विशेष वचनाच्च भावात्मेवेत्यवधारणं मनात्म निष्ठ-
म्॥ ७॥
प्रकरणभेदान्नवोपसंहार: कार्य:। परो वरीय सत्वा-
। तावतेव ह्युक्तम्॥ ८॥
सर्वविद्या उक्ता सोऽहं नाम विदैवाग्नि नामविदिति
ात् सर्वस्य ब्रह्म नामत्वात्तदुपसंहार: कार्य:। नान-
सर्वविद्यानां गुणानामुपसंहृति:। कार्य्यं च ब्रह्मवि
ात कार्य्या विचारणा। इति ब्रह्म तर्क: इति चेत्
न्। उक्तोऽप्युपसंहार: तत् प्रमाणमप्यस्त्येव नाम वाग्न
ाप्रप: सर्वविद्यास्वग्न्यादेक: सर्वगुणैर्विचिन्त्य इति
उन्यश्रुतौ॥ ६॥

व्याप्तेश्च समञ्जसम् ॥ १० ॥

सर्वाभेदादन्यत्रे मे ॥ ११ ॥

आनन्दादयः प्रधानस्य ॥ १२ ॥

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥१३॥

इतरे त्वर्थसामान्यात् ॥ १४ ॥

आध्यानाय प्रयोजनाभावात् ॥ १५ ॥

युज्यते चोपसंहारोऽनुपसंहारश्च योग्यता विशेषात्। गुणैः सर्वैरुपास्योऽसौ ब्रह्मणा परमेश्वरः। अन्यै र्यथाक्रमं चैव मानुषैः कैश्चिदेव तु इति भविष्यत् पर्वणि ॥ १० ॥

सर्वगुणयुक्तत्वे नोपासनादन्यत्रैव फले ब्रह्मादय भवन्ति। सम्पूर्णोपासनाद् ब्रह्मा सम्पूर्णानन्दनाङ्गवेत्। इतरे तु यथा योगं सम्यग्युक्ता भवन्ति हीति पाद्मे ॥११॥

सर्वेषां मुमुक्षूणां कियन्नियमेनोपास्यमित्याह। प्रधानफलस्य मोक्षस्यार्थे आनन्दो ज्ञानं सदात्मा त्वुपास्य एव सच्चिदानन्द आत्मेति ब्रह्मोपासादिनियतः। सर्वेषां मुमुक्षूणां फलसाम्यादपचितेति ब्रह्मतर्के ॥ १२ ॥

फलभेदार्थमुपचयापचयोर्भावात् सर्वेषां प्रियशिरस्त्वादिगुणोपासा प्राप्तिः। नैव सर्वे गुणाः सर्वैरुपास्या मुक्तिभेदतः। विरिञ्चस्यैव यन्मुक्तानन्दस्य सुपूर्णतेति। वाराहे ॥ १३ ॥

इतरे गुणाः फलसाम्यापेक्षयोपसंहर्त्तव्या ॥ १४ ॥

उपसंहारानुपसंहार प्रमाणमाह—आध्यानार्थं चि

आत्मशब्दाच्च ॥ १६ ॥

आत्मगृहीतिरितरवदुत्तरात् ॥ १७ ॥

अन्वयादिति चेत् स्यादवधारणात् ॥ १८ ॥

सर्वे गुणा उच्यन्ते प्रयोजनान्तराभावात्। ज्ञानार्थमथ-ध्यानार्थं गुणानां समुदीरणम्। ज्ञातव्याश्चैव ध्यातव्या गुणाः सर्वेऽप्यतो हरेः। नान्यत् प्रयोजनं चाना-हरानात् ससंस्कृतेरपि। श्रवणाच्चाथ पाठाद्वा क्रियाभिः किञ्चिदिष्यत इति परमसंहितायाम्। गुणाः सर्वेऽपि वेत्तव्या ध्यातव्याश्च न संशयः। नान्यत् प्रयोजनं मुख्यं गुणानां कथने भवेत्। ज्ञानध्यान समायोगाद् गुणानां सर्वशः फलम्। मुख्यं भवेन्न चान्येन फलं मुख्यं कथि-ञ्चिदिति ब्रह्मतन्त्रे ॥ १५ ॥

आत्मेत्येवोपासीतेत्यनुपसंहारे प्रमाणम् ॥ १६ ॥

न चानन्दादयः प्रधानस्येत्युक्तिविरोधः। यतः सत्यं ज्ञानमनन्तं ब्रह्मविज्ञानमानन्दं ब्रह्मेतिवदेवात्मशब्द गृहीतिः। अत्र ह्येते सर्वे एको भवन्तीत्युत्तरात्। आनन्दानुभवत्वाच्च निर्दोषत्वाच्च मस्यते। नित्यत्वाच्च तथात्मेति वेदवादिभिरोश्वर इति ब्रह्मतन्त्रे ॥ १७ ॥

सर्वगुणानामन्वय आत्मशब्दे भवति। आत्मव्याप्ते- 'रात्मशब्दः परमस्य प्रयुज्यते इति वचनादिति चेत् सत्यं स्याच्चैवं आत्मेत्येवेत्यवधारणात् अन्यथा सर्वोपसंहार-वचनविरोधः ॥ १८ ॥

काम्याख्यानादपूर्वम् ॥ १९ ॥

समान एवञ्चाभेदात् ॥ २० ॥

सम्बन्धा देव मन्यत्रापि । २१ ॥

न वा विशेषात् ॥ २२ ॥

दर्शयति च ॥ २३ ॥

सम्भृतिद्युव्याप्त्यपि चातः ॥ २४ ॥

अलौकिकास्तस्य गुणा ह्युपास्याः अलौकिकं मुक्ति-काम्यं यतोऽस्येति काम्याख्यानादन्यत्रादृष्ट एव गुणा उपास्याः ॥ १९ ॥

अपूर्वत्वेऽपि समाननामित्वेोपसंहारः। न तु त्रिवि-क्रमत्वादीनां कादाचित्कानां पृथक्त्वेन। नित्यविक्रान्त्या-दिष्वन्तर्भावात् ॥ २० ॥

परमतो सम्बन्धित्वेन नित्यत्वात् त्रिविक्रमत्वादिष्वप्यु-पसंहार्यत्वं युज्यते। गुणास्त्वे विक्रमादय संहर्त्तव्या न संशयः। विरिञ्चस्यैव नान्येषां स हि सर्वगुणाधिक इति हृद्वत्त्वे ॥ २१ ॥

न वाक्यशब्देन सर्वगुणग्रहीतिः अधिकारि विशे-षात् ॥ २२ ॥

सर्वान् गुणानाजशब्दो ब्रवीति ब्रह्मादीनामितरेषां न चैवेति भाल्लवेयश्रुतिः ॥ २३ ॥

संभृतिद्युव्याप्ती अपि देवादीनामुपसंहर्त्तव्ये ता-

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥२५॥

वेधाद्यर्थभेदात् ॥ २६ ॥

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत्तदुक्तम् ॥ २७ ॥

न्येषां अतएव योग्यताविशेषात् देवादीनामुपास्यास्त्वतिव्याप्त्यादयो गुणाः। आनन्दादयास्तु सर्वेषां अन्यथाऽनर्थकृद्‌भवेदिति च ब्रह्मतर्के ॥ २४ ॥

यस्यां विद्यायां महागुणा उच्यन्ते सोत्तमानां इतरान्येषामिति चेत् न पुरुषसूक्तोक्त विद्यायामपि केषाञ्चिद्गुणाना मनाम्नानात् सर्वतः पौरुषे सूक्ते गुणा विष्णोरुद्धृताः। तत्रापि नैव सर्वेऽपि तस्मात् कार्य्योपसङ्घतिरिति ब्रह्मतर्के ॥ २५ ॥

भिन्धि न विद्धि ऋग्गोहीति फलभेदेन सर्वगः। वत्यादीनां तेष्वयोगात् नाधिकारैकता भवेत्। अयोग्योपासनादीयुरनर्थं वार्थनाशनमिति बृहत्तन्त्रे ॥ २६ ॥

मुक्तस्योपासना कर्त्तव्या न वेति अतो ब्रवीति—नियतस्वाध्यायानन्तर स्वेच्छया कुशाच्छन्दस्तुत्युपगानवदेव मोक्षे उपासनादिब्रह्मविदाप्नोति परमिति मोक्षवाक्यशेषत्वादितरेषां तच्चोक्तम्। एतत् साम गायन्नास्ते इत्यादि ब्रह्मतर्के च। मुक्ता अपि हि कुर्वन्ति स्वेच्छयोपासनं हरेः। नियमानन्तरं विप्राः कुशामेरप्यधीयत

साम्पराये तर्त्तव्याभावात् तथा ह्यन्ये ॥२८॥
छन्दत उभयाविरोधात् ॥२९॥
गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ ३०॥
उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥३१॥

इति । तथा मुक्तैर्विद्यते वीतमोहैरिति च भारते ॥२७॥

स्वेच्छयैवेत्यङ्गीकर्त्तव्यं मुक्तस्य तर्त्तव्यतीर्णत्वात् तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवतीति ह्यन्ये पठन्ति । वायुप्रोक्ते च । स्थितप्रज्ञत्वमापन्ना ये ध्यानेन परमात्मनः । ब्रह्मलोकं गताः सर्वे ब्रह्मणा च परङ्गताः । तीर्णतर्त्तव्यभागाश्च स्वेच्छयोपासते परमिति ॥ २८ ॥

कर्मापि कुर्वन्ति न वेत्याह स्वेच्छया कुर्वन्ति न वा-बन्धप्रत्यवाययोरभावात् ॥ २९ ॥

बन्धप्रत्यवायाभावे हि मोक्षस्यार्थवत्त्वम् । अन्यथा मोक्षत्वमेव न स्यात् । कदाचित् कर्म कुर्वन्ति कदाचिन्नैव कुर्वते । नित्यज्ञानात्मरूपत्वान्नित्यं ध्यायन्ति केशवम् । तीर्णतर्त्तव्यभागा ये प्राप्तानन्दाः परात्मनः । प्रत्यवायस्य बन्धस्याप्यभावात् स्वेच्छया भवेदिति ब्रह्माण्डे ॥ ३० ॥

उपपन्नश्चैवंभावः प्राप्तत्वात्तत्फलस्य यथा लोके विध्यर्थत्वेन विप्रक्रमणादिकं कृत्वा समाप्तकर्मेच्छया करोति न करोति च ॥ ३१ ॥

अनियमः सर्वासामविरोधः शब्दानुमाना-भ्याम् ॥ ३२ ॥

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥३३॥

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौ-पसदवत्तदुक्तम् ॥ ३४ ॥

ग्रामज्ञानानामपि केषाञ्चिन्मुक्तिप्राप्तिः केषाञ्चिन्न यथोपसंहारनियम इति न मन्तव्यम। सर्वे गुणा ब्रह्मणैव ह्युपास्या नान्यैर्देवैः किमु सर्वैर्मनुष्यैरित्युपसंहारविरोधादन्यत्राविरोधात। न हि कश्चिद् ब्रह्मवित् स्मृतिमन् भवति मुक्तो ह्येष भवति तस्मादाहुः स्मृतिर्हेतोति कौण्डिन्यश्रुतेश्च। यथा केषाञ्चिन्मोक्ष एवमन्येषामित्यनुमानाच्च ॥ ३२ ॥

यथा यथाधिकारो विशिष्यते एवमुक्ता वानन्दो विशिष्यते। मनुष्येभ्यो गन्धर्वाणा गन्धर्वेभ्यः ऋषीणामृषिभ्या देवानां देवेभ्यः इन्द्रस्य इन्द्रात् रुद्रस्य रुद्रात् ब्रह्मण एष ह्येव शतानन्द इति चतुर्थवेदशाखायाम्। अध्यात्मे च। ज्ञानश्चोपासनञ्चैव मुक्तावानन्द एव च। यथाधिकार देवानां भवत्येवोत्तरोत्तरमिति ॥ ३३ ॥

न चासमत्वेन विरोधो भवति। ब्रह्मधीत्वाद्दोषाभावसाम्याद्युत्तमेभ्योऽन्येषां भावाच्च। औपसदवत्क्रियावत् उक्तं चतुरश्रुतो नानाविधा ज्ञेयसदा विनुत्ते—

इयदामननात् ॥ ३५ ॥
अन्तराभूतग्रामवत् स्वात्मनः ॥ ३६ ॥
अन्यथाभेदानुपपत्तिरिति चेन्नोपदेशान्तर-
वत् ॥ ३७ ॥
व्यतिहारो विंशिषन्ति हीतरवत् ॥ ३८ ॥

तेषां ब्रह्मधियां विरोधः। दोषाभावाद् गुरोश्चियादि-
भावाल्लोकेऽपि नाशो किमु तेषां विमुक्तिरिति च ॥ ३४ ॥

नामाद्यारभ्य प्राणान्तमुत्तरोत्तरमुत्तमत्वमुक्तं न प्रा-
णात् किञ्चिद्ध उक्तं तथापि पूर्ववत् स्यादिति न
वाच्यम्। प्राणो वाव सर्वेभ्यो भूयान् प्राणाद्भूयान् प्राणो
ह्येव भूयांस्तस्माद्भूयानामेति कौठरव्य श्रुतेः ॥ ३५ ॥

यथा भूतग्राम एकस्मादेक उत्तमोऽस्त्येव। एवं
प्राणादपि परमात्मानमन्तरा विद्यत इति चेन्न। प्राणा-
दुत्तमाभावे प्रमाणमुक्तम्। अन्यत्रोत्तमाभावेन प्रमाणं
दृश्यते चान्यत्रोत्तमत्वम् ॥ ३६ ॥

प्राणस्य सर्वोत्तमत्वे परमात्मनः भेदानुपपत्तिः।
अन्येभ्यः प्राणस्योत्तमत्वं तस्मात् परमात्मनो ह्युप-
दिष्टम् ॥ ३७ ॥

नेति चेन्न। उक्तं प्राणात् परमात्मन उत्तमत्वं पूर्वा-
ध्याहारेण। एष तु वा अतिवदतीति विशिंषन्ति हि
यथेतरेषु विशेषणम्। उत्तमत्वं देवानां मत्स्यादपि हि

सैव हि सत्यादयः ॥ ३९ ॥

कामादितरत्र तत्र चायतनादिभ्यः ॥ ४० ॥

आदरादलोपः ॥ ४१ ॥

मानवात्। तेभ्यः प्राणस्त तस्माच नित्यमुक्तस्य वै हरेरिति च बृहत्तन्त्रे ॥ ३८ ॥

कतिनिष्ठाज्ञानमित्यादीना भेदात् बहव उत्तमा इति चेत् न सत्यादिगुणास्तस्मादेव परदेवता याः स्वरूपभूता' ब्रह्मतर्के च नामादिप्राणपर्यन्तादु यो हि सत्यादिरूपवान् तस्मै नमो भगवते विष्णवे सर्वजिष्णवे इति। सत्याद्या श्रहमान्ता यद्गुणा समुदीरिताः। तस्मै नमो भगवते यस्मादेव विमुच्यते इति। चाध्यात्मे ॥ ३९ ॥

प्रकृतेरपि जन्मादे संसारप्राप्ते किमिति नामादिष्व पाठ इत्यत्रोच्यते। स्वेच्छयेव मूलस्थाने स्थितोऽन्यत्र चावतारान् करोतीश्वरेच्छानुसारेणैव सर्वायतना' सर्वकालाः सर्वावस्थाः सर्वेच्छा' सर्वज्ञानबद्धा बन्धिका सैषा प्रकृतिरितिवत् स श्रुतिः। नामादयस्तु बहुत्वान्मोचकत्वात् परोऽपि च। उभयोरप्यभावेन यथा व्यक्तं न तूदितम। श्रुतौ तथा जीवपरावुच्येते किञ्च नेतरत् नोच्यते तत्तदा तत्त्वद्वयं वै समुदाहृतमिति ब्रह्मतर्के ॥ ४० ॥

अबहुत्वेऽपि भक्तिविशेषादेवोपासनाद्यलोपस्तस्या भवति। यथा श्रीर्नित्यमुक्तापि प्राप्तकामापि सर्वदा। उपास्ते नित्यशो विष्णुमेव भक्तो हरेर्भवेदिति बृहत्तन्त्रे॥ ४

उपस्थितेऽतस्तद्वचनात् ॥ ४२ ॥

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रति-बन्धः फलम् ॥ ४३ ॥

प्रदानवदेव तदुक्तम् ॥ ४४ ॥

लिङ्गभूयस्त्वात्तद्धि वलीयस्तदपि ॥ ४५ ॥

अनादिकाले भगवत्सम्बन्धित्वाद् युज्यते च नित्यमक्तं तस्याः। द्वावेता वनादिनित्या वनादियुक्तौ नित्ययुक्ता वनादिक्रतौ ये हेयं परमो या च प्रकृतिः रमतेऽस्यां परमो रमते ह्यस्मिन् प्रकृतिस्तस्मिन् रमते परमो न स्वस्मिन् प्रकृतिरत एनमाहुः परम इतीति गोपवनश्रुतिवचनात् ॥ ४२ ॥

दर्शनार्थं ह्युपासनं तच्च श्रवणादेरेव भवति। अतः किमर्थमित्यत उच्यते। तन्नियमो वेदार्थनियमश्च ब्रह्मदृष्टेः पृथगेव हि शब्देनात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रुतिं सूचयति। श्रवणादिफलं चाज्ञानविपर्ययादिदर्शनप्रतिबन्धनिवृत्तिः। ब्रह्मतर्के च। श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ। संशयश्च पराणुद्य लभते ब्रह्मदर्शनमिति ॥ ४३ ॥

न च श्रवणादिमात्रेण ब्रह्मदृष्टिर्भवति। किन्तु सति कर्त्तव्ये न यथा गुरुदत्तं तथैव भवति आचार्यवान् पुरुषो वेदेति ह्युक्तम् ॥ ४४ ॥

गुरुप्रसादः सुप्रथितो वा वलवानिति निगद्यते।

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत्
॥ ४६ ॥

ऋषभादिभ्यो ब्रह्मविद्यां प्राप्यापि सत्यकामेन भगवांस्त्वेव मे कामे ब्रूयाच्छ्रुतं ह्येवं मे भगवद्दृशेभ्यः आचार्य्याद् ध्येव विद्या विदिता साधिष्ठं प्रापयतीति वचनात्। अत्र हि न किञ्चन विद्यायत्यनुज्ञानात्। उपकोसलवचनाच्च लिङ्गभूयस्त्वाद् गुरुप्रसाद एव बलवान् तर्हि ताव तालमिति न मन्तव्यं श्रोतव्यो मन्तव्य इत्यादिस्तदपि कर्त्तव्यम। वाराहे च। गुरुप्रसादो बलवान् तस्मा-बलमत्तरम्। तथापि श्रवणादिश्च कर्त्तव्यो मोक्षसिद्धये इति। ४५।

न च पूर्वप्राप्त एव गुरुरिति नियमः समप्रानुग्रहकं चेत् पश्चात्तु नः प्रकरोति स्वयमेव तदा विकल्पः स्यान्मानमक्रियावत्। यथोभयोर्ध्यानयोः समयोः। पूर्वस्मादुत्तमो लब्धः स्वयमेव गुरुर्यदि। स्नेहोयादविचारेण विकल्पः समवोर्भवेत्। समप्रानुग्रहाभावात् सत्यकामः स्वक गुरुम्। ऋषभाद्यनुज्ञया चैव प्राप्तस्तस्माच्च युज्यत इति प्रत्तत्त्वे। समप्रानुग्रहं कश्चित् स्वयमेव समो यदि। कुर्य्यात् पुनश्च स्नेहोयादविरोधेन कामतः। ध्यानयोः समयोर्यद्वद्विकल्पः कामतो भवेत्। एवं गुरोर्द्वितीयस्य विकल्पो ग्रहणेऽपि चेति महासंहितायाम। ४६।

अतिदेशाच्च ॥ ४७ ॥

विद्यैव तु निर्धारणात् ॥ ४८ ॥

दर्शनाच्च ॥ ४९ ॥

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ५० ॥

अनुबन्धादिभ्यः ॥ ५१ ॥

ब्रह्मोपास्व ब्रह्मोपचरस्व तच्छृणु हि ते त्वामवतु। यथा ब्रह्मोपचरेर्यथा मामुपचरेर्यान्येऽस्मद्विधाः। ये य- सयतानुपास्व तानुपचरस्व तेभ्यः शृणु हि ते त्वामवन्त्विति पौष्यायणश्रुतावतिदेशाच्च ॥ ४७ ॥

न च कर्मणैव हि संसिद्धिमास्थिता जनकादय इत्यादि नान्यन्मोक्षसाधनम्।

तमेवं विदित्वातिमृत्युमेति नान्यः पन्था विद्यते अय- नायेति निर्द्धारणाद्विद्ययैव मोक्षः ॥ ४८ ॥

न केवलं विद्यया किन्त्वपरोक्षज्ञानेनैव च सर्वान् परो मायया य मिमीते दृष्ट्वैव तं मुच्यते नापरेणेति कौशिकश्रुतेः ॥ ४९ ॥

सावधारणा बलवती श्रुतिः। इन्द्रोऽश्वमेधान् शत- मिष्ट्वापि राजा ब्रह्माणमीड्यं तमुवाचोपसन्न. न कर्मभिर्न धनेनैव चान्यैः पश्येत् सुखं तेन तत्त्वं ब्रवीहीति च बल- वल्लिङ्गम्। नास्त्यकृतः कृतेनेत्युपपत्तिश्च कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते। तस्मात् कर्म न कुर्वन्ति यतयः

भक्त्यान्तरदृष्टयकत्ववत् दृष्टञ्च तदुक्तम् ॥ ५२ ॥

न सामान्यादप्युपलब्धेर्म्मुक्तुवन्न हि लोकापत्तिः ॥ ५३ ॥

पारदर्शिन इति युक्तिमद्भगवद्वचनम्। अतो न प्रमाणान्तरबाधः कर्मण्येवेत्ययोगव्यवच्छेदः ॥ ५० ॥ ५१ ॥

न केवल श्रवणादिभिर्गुरुप्रसादेन च ब्रह्मदर्शनं किन्तु भक्त्यादिभिश्च। सर्वलक्षणसम्पन्नः सर्वतो विष्णुतत्परः। यद्गुरुः सुप्रसन्नः सन् दद्यात्तन्नान्यथा भवेत्। तथाप्यनादिसिद्धभक्त्यादिगुणयोगतः। लभेद् गुरुप्रसादञ्च तस्मादेव च तद्भवेदिति। भक्तिर्विष्णौ गुरौ चैव गुरोर्नित्यप्रसन्नताम्। दद्याच्छमदमादिञ्च तेन चैते गुणाः पुनः। तैः सर्वैर्दर्शनं विष्णोः श्रवणादिकृतं भवेदिति च नारायणतन्त्रे। उपासनाभेदेन दर्शनभेदः। तथोक्तं कमठश्रुतौ। अन्तर्दृष्टयो बहिर्दृष्टयोऽवतारदृष्टयः सर्वदृष्टय इति देवावाव सर्वदृष्टयस्तेषु चोत्तरोत्तर मा ब्रह्मणोऽन्येषु यथायोगं यथा ह्याचार्य्या आचक्षत इति। अध्यात्मे च दृष्टेव ह्यवताराणा मुच्यन्ते केचिद्दृष्टसा। दर्शनेनान्तरस्थानां देवाः सर्वत्र दर्शनात्। तेषां विशेषनाचार्य्यो वेत्ति सर्वज्ञताद्धत इति ॥ ५२ ॥

न सामान्यदर्शनमात्रेण मुक्तिः यथा मृत्युमात्रात् हि लोकापत्तिमात्रमुक्तिसामान्यदर्शनाल्लोका मुक्तिर्योग्यात्मदर्शनादिति नारायणतन्त्रे। मुच्यते नात्र सन्देहो दृष्ट्वा

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥५४॥
एक आत्मनः शरीरे भावात् ॥ ५५ ॥
व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥५६॥
अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५७॥

तु स्वात्मयोग्यैवेति च दर्शनेनात्मयोग्येन मुक्तिर्नान्येन केन चिदिति चाध्यात्मे भक्तिरेवैनं नयति दर्शयति भक्तिवशः पुरुषो भक्तिरेव भूयसीति माठरश्रुतेः । न परमात्मनो दर्शनमिति चेत् न, तस्यैष आत्मा विवृणुते तनूं स्वामिति श्रुतेः । कथं तर्ह्येषा श्रुतिः ॥ ५३ ॥

परमात्मैव भक्त्या दर्शनं प्राप्य मुक्तिं ददातीति प्रधानसाधनत्वात् भक्तिः कारणत्वेनोच्यते । मायावैभवे च भक्तिस्थः परमो विष्णुस्तयैवैनं वशे नयेत् । तथैव दर्शनं यातः प्रदद्यान्मुक्तिमेतया । स्नेहानुबन्धोयस्तस्मिन् बहुमानपुरःसरः । भक्तिरित्युच्यते सैव कारणं परमो गतिरिति । सर्वप्रदाना ब्रह्मणि प्रवृत्तेश्च ॥ ५४ ॥

जीवांशानां पृथगुत्पत्तेर्नानादियोग्यतापेक्षेति न मन्तव्यम् । कुतः ? अंशांशिनोरैकत्वमेव । अंशिकर्मनिर्मितशरीर एवांशस्य भावात् ॥ ५५ ॥

ज्ञानादिभेदे विद्यमानेऽपि न अंशांशिनो पृथग्भाव एव तदुपासनादिभोगादंशस्य । परमसंहितायाञ्च । अंशिनस्तु पृथग्जाता अंशास्तस्यैव कर्मणा । पुनरैक्यं प्रपद्यन्ते नात्र कार्य्या विचारणेति ॥ ५६ ॥

अप्राधान्यदेवता च यद्युपासनादिप्रतिशाखं प्रतिवेदं च

मन्त्रादिवद्वाऽविरोधः ॥ ५८ ॥

भूम्नः क्रतुवत् ज्यायस्त्वं तथा हि दर्शयति ॥ ५९ ॥

नानाशब्दादिभेदात् ॥ ६० ॥

विकल्पोऽविशिष्टफलत्वात् ॥ ६१ ॥

नोपसंह्रियते। हिरण्यत्वात्, समत्वाद्वोत्तमत्वाद्वा नाङ्गदेवाद्युपासनम्। उपसंहार्य्यमित्याहुर्वेदसिद्धान्तवेदिन इति ब्रह्मतर्कवचनात् ॥ ५७ ॥

सर्वदेवतामन्त्रा यथा योज्यन्त एवमविरोधो वा। उपासनाङ्गदेवानां परमाङ्गतया भवेत। उपसंहृतिविशेषे तु फलानामन्यथा न तु। पुरुषाणां विशेषाद्वा यथायोगं भविष्यतीति बृहत्तन्त्रे ॥ ५८ ॥

सर्वगुणेषु भूम्नः गुणस्य ज्यायस्त्वं क्रतुवत् सर्वत्र सद्भावात् दीक्षाप्रापणीयोदनीये सवनत्रयात्मकः क्रतुः। भूमैव देवः परमो ह्युपास्यो नैवाभूमा फलमेषां विधत्ते। तस्माद्भूमा गुणतो वै विशिष्टो यथाक्रतुः कर्म्म मध्ये विशिष्ट इति गौपवनश्रुतिः ॥ ५९ ॥

शब्दोऽनुगा तथैवाम्यो योग्यताभेदतः सदा। ब्रह्मादीनामेकमर्थं बहुधा दर्शयन्ति हि। अतः पूर्णत्वमोक्षस्य ज्ञानिवेषां प्रदृश्यते। अतः फलस्य नानात्व नानैवोपासनं यत इति ब्रह्मतर्के। अतो भूमत्वमपि नानैवोपास्यते ॥ ६० ॥

स्वयोग्योपासनान्तर समाप्यापि कस्यचिदुपासनं

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्व-भावात् ॥ ६२ ॥

अङ्गेषु यथाश्रयभावः ॥ ६३ ॥

शिष्टेश्च ॥ ६४ ॥

समाहारात् ॥ ६५ ॥

विकल्पनं भवति विशिष्टफलापेक्षया। मुक्त्यर्थमात्मयोग्यं हि कार्य्यमेव ह्युपासनम। नृसिंहादिकमन्यच्च दुरितस्य निवृत्तये। उपासते यथायोगं न वा फलविभेदत इति ब्रह्मतर्के। ६१॥

यस्य यस्य हि यः कामस्तस्य तस्य ह्युपासनम्। तादृशानां गुणानाञ्च समाहारं प्रकल्पयेत्। अकामत्वान्मुमुक्षूणां न वा तेषामुपासनम्। तुष्ट्यर्थमीश्वरस्यैव न चोपासा विरुध्यतीति बृहत्तन्त्रे॥ ६२॥

अङ्गदेवतानां यथा परमेश्वराङ्गाश्रयत्वं चक्षुषोः सूर्योऽजायतेत्यादिना तथा भावना कर्त्तव्या यस्मिन् यस्मिन् यो हि चाङ्गे निविष्टः परस्य चिन्त्यः तथा तथैवेति पौत्रायण श्रुतेः॥ ६३॥

अङ्गैः परात् ये हि देवाः विसृष्टास्तत्तद्गुणान् परमे संहरेत तांश्चापि तत्रैव विचिन्त्य देवान् स्वान् ममुक्षुः परमं व्रजेतेति कात्यायनश्रुतौ॥ ६४॥

समाहारवचनाच्च॥ ६५॥

गुणसाधारण्यश्रुतेश्च ॥ ६६ ॥

न वा तत् सहभावाश्रुतेः ६७ ॥

दर्शनाच्च ॥ ६८ ॥

इति श्रीकृष्णद्वैपायनकृत ब्रह्मसूत्रे तृतीयाध्यायस्य तृतीयः पादः समाप्तः।

पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥

साधारण्यात् सर्वगुणाः परस्य समाहार्य्यास्तत्त्वदर्शी मुमुक्षोरिति माण्डव्यश्रुतेश्च ॥ ६६ ॥

न चाङ्गदेवेतोपसंहारः कार्य्यः उपसंहारस्य सहाश्रव-णात् ॥ ६७ ॥

सत्यं ज्ञानं परमानन्दरूप आत्मेत्येवं नित्यदोपासनं स्यात्। नान्यत् किञ्चित् समुपासीत धीरः सद्वैर्गुणैर्देव गुणा उपासत इति कमठश्रुतौ ॥ ६८ ॥

इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रे तृतीयाध्यायस्य तृतीयः पादः समाप्तः।

ज्ञानसामर्थ्यमस्मिन् पादे-उच्यते यद्दर्शनार्थमुपासनोक्तौ तस्माच्च दर्शनात् सर्वपुरुषार्थप्राप्तिरिति बादरायणो मन्यते य यं लोकं मनसा संविभाति विशुद्धसत्वः कामयते

शेषत्वात् पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॥ २ ॥

आचारदर्शनात् ॥ ३ ॥

तच्छ्रुतेः ॥ ४ ॥

समन्वारम्भणात् ॥ ५ ॥

तद्वतो विधानात् ॥ ६ ॥

नियमाच्च ॥ ७ ॥

यांश्च कामान् तं तं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद् भूतिकाम इति शब्दादस्यैव मोक्षसाधनत्वम् ॥१॥

ज्ञानस्य स्वर्गादिषु तत्साधनकर्मशेषत्वेन सर्गं धनाद्देहतो वै गृहाच्च प्राप्स्यन्ति धीरा न त्वधीराः कुतश्चिदिति जैमिनिः ॥ २ ॥

ज्ञानिनामेव देवादीनामाचारदर्शनात् ॥ ३ ॥

यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति शेषत्वश्रुतेः ॥ ४ ॥

कर्मैव देहं दैविकं मानुषं वाप्यन्वारभेतापरास्तत्र हेतुः। भोगांस्तदीयांश्च यथा विभागं ददाति कर्मैव शुभाशुभं यदिति माठरश्रुतेश्च। संश्चेः प्राधान्यं दर्शयति ॥५॥

ज्ञानी च कर्माणि महोदितानि कुर्यादकामः सततमवेक्षक इति कमठश्रुतौ ज्ञानवतो विधानात् ॥ ६ ॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे इति ॥ ७ ॥

अधिकोपदेशात्तु वादरायणस्यैवं तद्दर्शनात्॥८॥
तुल्यन्तु दर्शनम्॥९॥
असार्वत्रिकी॥१०॥

ज्ञानादेव स्वर्गो ज्ञानादेवापवर्गो ज्ञानादेव सर्वे कामाः सम्पद्यन्ते स यथा यथा कर्म कुरुते तथा तथा-धिको भवतीति कौठरव्यश्रुतेः। युधिष्ठिरादीनां राजसूययागादिना फलाधिक्यदर्शनाच्चेति वादरायणमतम्। ८।

"राजसूयादिकृतावक्रतौ च सममेव तेषां विज्ञानम्। विज्ञानमेतत् सर्वेषां मुनीनां ब्रह्मदर्शनात्। स्यादेव मोक्षो नान्यस्मादिति तत्रापि चिन्तना। स्वर्गादय. कर्मणैव नान्येनेत्यपरे विदु। ज्ञानेनाधिक्यमित्याहुर्जैमिन्याद्याश्च केचन। अदृष्टमेव ज्ञानेन दृष्टं नैवोपलभ्यते। इति केचिद्विद. प्राहुर्व्यासशिष्या इमेऽखिलाः। यस्मादात्मगतं सर्वं सत्यमेव ततोऽखिलम्। यथाकामस्त्वनन्तोऽपि व्यासो ह्यस्याधिकस्तथा। प्राद्याऽपि हि सत्येन तथैवैषां मतानि तु। स्वयन्तु भगवान् व्यासो व्याप्तज्ञानमहाद्युमान्। अनन्ताकाशवत् पश्यन् निखिलं पुरुषोत्तमः। ज्ञानेनैवाप्यते सर्वं कर्मणा चाधिकं भवत्। इति प्राह महायोगी पुमर्थानां विनिर्णये इति भविष्यत्पर्वणि। ज्ञानिनामपि देवानां विशेष. कर्मभिर्भवेत्। चीर्णे कृते वा ज्ञानस्य न विशेषोऽस्ति कर्मणीति ब्रह्मतर्के॥९॥

सर्वेषां पुरुषार्थापेक्षित्वाज्ज्ञानाधिकारित्वात आह न सर्वेषामधिकारः॥१०॥

विभागः शतवत् ॥ ११ ॥

अध्ययनमात्रवतः ॥ १२ ॥

नाविशेषात ॥ १३ ॥

स्तुतयेऽनुमतिर्वा ॥ १४ ॥

न कोटयो हि देवानां तेषां मध्ये शतस्य तु। सोमा धिकारी वेदोक्तो ब्रह्मणोऽपि शताधिके। यथा तथैव संख्येया प्रजास्तासु कियान् जनः। ज्ञानाधिकारी स प्रोक्तो विष्णु-पादैकसंश्रय इति वचनात् सुखापेचासाम्येऽपि विभाग इष्यतेऽधिकारार्थम्॥ ११॥

कस्याधिकार इत्यत आह। अवैष्णवस्य वेदेऽपि ह्यधि-कारो न विद्यते। गुरुभक्ति विहीनस्य शमादिरहितस्य च। न च वर्णवरस्यापि तस्मादध्ययनान्वितः। ब्रह्मज्ञाने तु वेदोक्ते ह्यधिकारी सतां मत इति ब्रह्मतर्के। पठेद्दे दानथार्थानधीयीताथ विचार्य्य ब्रह्म विन्देदिति च कौषा-यण श्रुतिः॥ १२।

न सामान्ये नाधिकारो देवादीनाम्। अथ पुमर्थं सा-धनान्यर्थो धर्मज्ञानमित्युत्तरोत्तर तत्राधिकारिणो मनुष्या स्तपयो देवा इत्युत्तरोत्तरमिति कौण्डिन्यश्रुतिः। १३॥

अथ मुनिरमौनञ्च मौनं निर्विद्याथ ब्राह्मणः। स ब्राह्मणः केन स्यात् येन स्यात् तेनेदृश एवेति ज्ञानिनो यथेष्टाचरणं विधीयत इत्यत आह। न विधिर्ज्ञानिनस्तु-तयेऽनुमतिमात्रं वा युच्यते च। १४।

कामचारेण चैके ॥ १५ ॥

उपमर्दञ्च ॥ १६ ॥

ऊर्ध्वरेतःसु च शब्देहि ॥ १७ ॥

परामर्शं जैमिनिरचोदना चापवदति हि ॥१८॥

कामचाराः काममक्षाः कामवादाः कामिनैवेमं लोकमनुसञ्चाय परात् परमीयुरनारम्भणमिति च के पठन्ति ॥ १५ ॥

ओमित्युच्चार्यान्तरिममात्मानमभिपश्योपमृद्य पुण्यं च पापं च काममाचरन्तो न ब्रह्मानुव्रजन्तीति चतुर श्रुतौ ॥ १६ ॥

न तावत् कामचाराणां ज्ञानेऽधिकारः । य इमं परमं गुह्यमूर्ध्वरेतःसु भाषयेत् न तथा विद्यते भूयान् यं प्राप्यान्योऽपि भूयसे इति माठरश्रुतेः ॥ १७ ॥

प्रातरुत्थायाथ सन्ध्यामुपासीतेमां सन्ध्यामुपासते ब्रह्मैव तदुपासतेऽथ देवान्न मे जुहुयाद्दानावर्त्तयीत नान्यत् किञ्चिदाचरेन्न सुरां पिबेत् । न पलाण्डुं भक्षयीत न भ्रूणं चरेत् न विस्मरेतात्मानं सोमं पिबेत् हुतशेषेण वर्त्तयेदित्युक्ताचार परामर्शेन विधिवन्ध्यवर्जितत्वेन कामत एव तस्य चरणं कामचार इति जैमिनिर्मन्यते । न च निषिद्धं कर्म कर्त्तव्यमेवेति चोदना । ब्राह्मणो न च इत्यस्य इत्याद्यपवादश्च ॥ १८ ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

विधिर्वा धारणवत् ॥ २० ॥

स्तुतिमात्रमुपादानादिति चेत् नापूर्वत्वात् ॥ २१ ॥

भावशब्दाच्च ॥ २२ ॥

अनुष्ठेयानां मध्यत एव कामतश्चरणं ज्ञानतो निवृत्तिरिति बादरायणो मन्यते केन स्याद् येन स्यात्तेनेदृश एवेति साम्यश्रुतेः। यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न विद्यत इति भगवद्वचनाच्च ॥ १९ ॥

केन स्याद् येन स्यादिति विधिर्वा। यथा वेदधारणं त्रैवर्णिकानां विहितं नान्येषाम्। एवं स्वमतानुसारिणी प्रवृत्तिर्ज्ञानिनां विहिता। न तत्राधर्मशङ्का कार्य्या नान्येषामिति वा। स्वेच्छयैव प्रवृत्तिस्तु ब्रह्मणो विधिनोदिता। नाशस्तं तन्मतं क्वापि विष्णुः प्रत्यक्षचोदना। इतरेषां न विहिता स्वेच्छाप्रवृत्तिः कथञ्चनेति हि ब्राह्मे ॥ २० ॥

स्तुतिमात्रमेव स्वेच्छाचरणं न विधिः। तैरपि सामान्यविधि स्वीकारादिति चेत्। नापूर्वत्वात् परवशत्वात्। सर्वविध्यतिक्रमेण स्तुतिमात्रविशत्वं परब्रह्मण एव हि। विधीनां विषयस्त्वन्ये ब्रह्मणः स्वेच्छया कृतौ। परस्य ब्रह्मणो ह्येवं सर्वविध्यतिदूरत इति हि ब्रह्मतर्के। २१॥

यदा विधानपरे विधिर्भावे प्रजायते। ब्रह्मणः परमस्यैव सर्वविध्यतिदूरत इति हि चतुरश्रुतौ ॥ २२ ॥

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥
तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥
अतएव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥
सर्वापेक्षा च यज्ञादि श्रुतेरश्ववत् । २६ ॥
शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ २७ ॥

केन स्यात् येन स्यात्तेनादृय स्थिरत्वनिवृत्त्यर्था इति चेन्न येषाञ्च याव ज्ञानिनो विधिनियताः, अनियताः, स्वेच्छानियता, इति विधिनियतामनुष्या अनियता हि देवा ब्रह्मैव स्वेच्छानियतमिति गोपवनश्रुतौ विशेषितत्वात् ॥ २३ ॥

एव सति विधिवाक्याना स्वेच्छाश्रुतिवाक्यानाञ्च सम्बन्धो भवति ॥ २४ ॥

अतएव ज्ञानस्य मोक्षदानेनाग्निहोत्राद्यपेक्षा ब्रह्मतर्के च । येषा ज्ञान समुत्पन्न तेषां मोक्षो विनिश्चितः । शुभकर्मभिराधिक्य विपरीते विपर्य्यय । स्वेच्छानवृत्ते भवेद् ब्रह्मणः प्रायशस्तथा । देवानामपि सर्वेषा विशेषादुत्तरोत्तरमिति ॥ २५ ॥

सर्वधर्मापेक्षा च ज्ञानस्यात्पत्तौ विविदिषन्ति न यज्ञेन दानेन तपसाऽनाशकेनेति श्रुतेः । यथा गतिनिष्पत्त्यर्थमश्वादयो ऽपेक्षन्ते । न विनिष्पन्नगतेर्ग्रामादिप्राप्तौ ॥ २६ ॥

यद्यपि ज्ञानेनैव मोक्षो नियतस्तथापि ज्ञानी शमद-

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८।
अबाधाच्च ॥ २९ ॥
अपि च स्मर्य्यते ॥ ३० ॥
शब्दश्चातोऽकामकारे ॥ ३१ ॥

माद्युपेतः स्यात्। आचार्य्याद्विद्यामवाप्य तमात्मानमभिपश्य शान्तो भवेद्दान्तो भवेदनुकूलो भवेदाचार्य्यं परिचरेत् परिचरेदाचार्य्यमिति माठरश्रुतौ ज्ञानिनोऽपि तद्विधेः। ब्राह्मीं यावत उपनिषदः ब्रूमेति तस्यै व तपोदमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनं यो वा एतमुपनिषद वेदेतिज्ञानाङ्गतया तेषां अवश्यानुष्ठेयत्वात् यस्य ज्ञानं तस्य मोच इति नात्र विचारणा। तस्य शान्त्यादयोऽङ्गानि तस्मात्तेषामनुष्ठितिः। अवश्यं करणीयाश्चान्यथाऽफलं भवेदिति चाग्नेये। तुशब्दः पूर्वफलार्थं सूचयति। २७।

यदि ह वा अप्येवं विद्विखिलं भचयीतैवमेव स भवतीति सर्वान्नानुमितिः प्राणात्ययविषया। न वाऽस्य जीविष्यामीति होवाच कामोन उदपानमिति दर्शनात्। २८।

अन्यायाचरणाभावेन हि ज्ञानस्याबाधनम्। अतो विद्वानपि न्याय्यं वर्त्तेतोत्कर्षसिद्धये इति च ब्रह्मतर्के।२९।

अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः। एतादृशोऽपि नाचारं श्रौतं स्मार्त्तं विवर्ज्जयेदिति शौहरिवंशेषु। ३०।

स यत्र तदेवं मन्वान एवं पश्यन्न कामं चरति चरेन्न

विहितत्वाच्चाश्रमकर्मापि ॥ ३१ ॥

सहकारित्वेन च । ३२ ॥

सर्वथापि तु त एवोभयलिङ्गात् ॥ ३४ ॥

काम भजनीत न काममनुवर्त्ततेति कौण्डिण्य श्रुतौ। ग्रत इत्यल्पफलकत्वं सूचयति न निषिद्धानि वर्त्तेत पूर्णज्ञान फलेच्छयेति पार्श्वे ॥ ३१ ॥

न केवलं निषिद्धाकरणेन पूर्यते कर्त्तव्यञ्च वर्णाश्रम-विहित कर्म। यज्ञतपोममात्मनं कुर्यात् कर्म विचारयन। यदाखान सुनियतमानन्दोत्वार्पमाप्नुयादिति कौठारथश्रुतौ विहितत्वात्। अपिशब्दो वर्णधर्मसमुच्चयार्थ. ॥३२॥

यथा राज्ञः सह कार्य्यं मन्त्री तथा क्रतेऽत्र चितिपः कार्य्यं स्वच्छेत्। एव ज्ञानं कर्म विनापि कार्य्यं सहाय भूत न विचार' कुतचिदिति कामठश्रुतौ सहकारित्वोक्तेश्च। ज्ञानान्मोक्षो भवत्येव सर्वकार्य्यं कृतोऽपि तु। आनन्दो ह्रसते कायाच्छुभ कृत्वा विवर्द्धते इति च ब्रह्माण्डे। सर्वदु खनिवृत्तिस्तु ज्ञानिनो निश्चितैव हि। उपासया कर्मभिश्च भक्त्या चानन्दवित्ततेति बृहत्तन्त्रे। धर्मस्वरूप-चित्तत्वाद् यो यो देवो मनोगतः। स एव धर्मो विज्ञेयो न ह्यते लोकसम्मिता इति च पार्श्वे ॥ ३३ ॥

सर्वप्रकारेणोत् साइऽपि ये ज्ञानयोग्यास्त एव ज्ञानं प्राप्नुवन्ति नान्ये। य आत्मा अपहत पाप्मा विजरो विमृत्यु र्विशोको विजिघत्स् पिपास सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति श्रुत्याचार्य्योपदेशसा-

अनभिभवञ्च दर्शयति ॥ ३५ ॥

अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

अपि च स्मर्य्यते ॥ ३७ ॥

विशेषानुग्रहश्च ॥ ३८ ॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

अथेऽपि विवेचनविपरीतज्ञानमाप दुःखः सम्यग्ज्ञानसिद्ध्यभयविधिलिङ्गात् ॥ ३४ ॥

दैवीमेव सम्पत्तिं देवताभिगच्छन्ति आसुरीमेवासुराः नैतयोरभिभवः कदाचित् स्वभाव एव ह्यवतिष्ठत इति स्वभावानभिभवञ्च दर्शयति ॥ ३५ ॥

सम्यग्ज्ञानविपरीतज्ञानयोरन्तरा स्थितानामपि देवासुरभावयोर्द्राढ्यं दृष्टेः ॥ ३६ ॥

असुरा आसुरेणैव स्वभावेनैव कर्मणा। ज्ञानेन विपरीतेन तमो यान्ति विनिश्चयात्। देवा देवस्वभावेन कर्मणा चाप्यसंशयम्। सम्यग्ज्ञानेन परमां गतिं गच्छन्ति वैष्णवीम्। नानयोरन्यथाभावः कदाचित् क्वापि विद्यते। मानुषा मिश्रमतयो विमिश्रगतयोऽपि चेति स्कान्दे ॥३७॥

शृणु वै वीर उग्रमुग्रं दमायन्नन्यमन्यमति नेति नियमानः। एधमाना(द्वि)ड्विलुभयस्य राजाचोदय विश इन्द्रो मनुष्यानिति विशेषानुग्रहञ्च दर्शयति देवेषु परमेश्वरस्य। असुरान् दमयन् विष्णुः स्वयञ्चाप्यसुरावयन्। पुनः पुनर्मनुष्यांस्तु स्तुता वा वर्त्तयत्य माविति भविष्यत्पर्वणि ॥३८॥

देवभागादसुरभाग एव बहुलः। तस्माच्च जनता-

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥ ४० ॥

न चाधिकारिकमपि पतनानुमानात्तद्योगात्॥४१॥

मियादिति लिङ्गात्। चशब्दात्ततः कनीयस एव देवा ज्यायसा असुरा इति श्रुतेश्च। असुरा बहुला यस्मातस्मान्न जनता मियादिति ब्राह्मे। ३८॥

असुरजातेरेवासुरत्वं देवजातेरेव देवत्वं जैमिनेरपि सिद्धमेव। नासुरा देवीं न देवा आसुरीं न मनुष्या देवीमासुरीञ्च गतिमीयुरात्मीयां जातिमनुभवन्ति इति नियमश्रुतेः। नासुराणां देवरूपं न देवानामासुरं न चोभयं मनुष्याणाम्। यो यद्रूपः स तद्रूपो निसर्गी ह्येष भवतीति तद्रूपत्वश्रुतेः। तं भूतिरिति देवानुसा चक्रिरे ते बभूवुस्तस्मादाद्यैं तर्हिं सुप्तो भूर्भुवस्वरित्येव प्रश्नसित्यभूतिरित्यसुरास्तेह पराबभूवुरिति देवासुराणां भावाभावश्रुतेश्च देवानां भूतिरित्येव मतो विष्णो स्वभावतः। असुराणामभूतित्वे नैतत् नियमताऽन्यथा। देवाः पापाभिभूतत्वात् ब्रह्मादाद्या बभूविरे। अतः सुगतिरेतेषां नान्यथान्यत्वयो भवेदिति चाध्यात्मे॥ ४०॥

न च परमात्मैश्वर्यादिकमाकाङ्क्षा ब्रह्मादीनामपि साकाङ्क्षा किमु परस्येति सूचयितुमपि शब्दः। चशब्दस्तु स्थानार्थिनां पूर्वोक्तादित्य भावान्तरसूचकः। अयोग्यमारोहन् प्रपतनं हि दृश्यते। एवमयोग्यस्य परमात्मैश्वर्यस्य ब्रह्मादिपदस्य वाकाङ्क्षायां पतनमनुमीयते न देव

उपपन्नमपि त्वेके भावमशनवत् तदुक्तम् ॥४२॥
बहिस्तुभयथापि स्मृतेराचाराच्च ॥ ४३ ॥
स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

परमन्विच्छेन कृत एव हरेर्गुणान्। इच्छन् पतति पूर्वस्मादधस्ताद् यत्र नोत्थितिरिति ब्रह्माण्डे। स्वकीयमिच्छमानस्तु राजानाः पातयन्ति हि। एवमेवं सरायाय हरिश्च स्वपदेच्छुकमित्याद्यनुमानरूपवाक्याच्च मायाभिवत्मिसृजत इन्द्रायामानरूपतः अवदय्य रघुनुया इति च श्रुतिः ॥ ४१ ॥

उपदेवपदन्नाकाङ्क्षामित्येके। भावमशनवद्दपि परमेव। तथोक्तमिन्द्रद्युम्न शाखायां यथर्षीन् प्रजापतीवाकाङ्क्षे देवं न गन्धर्वान् विद्याधरान् तृमिच्छानिति ब्रह्मसंहितायाञ्च। न देवानभिकाङ्क्षेत कृत एव हरेर्गुणान्। प्राजापत्यान्वा चार्थाय गान्धर्वादीनपि क्वचित्। ऋष्यादिषु विशेषे तु दोषो नैव विशेषितः इति विशेषदर्शनार्थमिकत्युक्तम् ॥ ४२ ॥

देवर्षीणां गन्धर्वाणां पदाकांक्षः पतेद्ध्रुवम्। अन्यत्र शुभमाकांक्षन्न पतदविरोधत इति श्रुतिः। नानात्मनेव कामानां नाकामः क्व च दृश्यते। अतो विरक्तकामः स्यादकामस्तेन भण्यत इत्याचाराच्च ॥ ४३ ॥

ओं ब्रह्मविदाप्नोति परमित्यादि फलं स्वामिनां देवानामेव भवति। यद्दु किञ्चेमाः प्रजाः शुभमाचरन्ति देवा एव तदाचरन्ति। यद्दु किञ्चेमाः प्रजा विजानते देवा एव

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥४५॥

श्रुतेश्च ॥ ४६ ॥

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४७ ॥

कृत्स्नभावात्तु गृहीणोपसंहारः ॥ ४८ ॥

तद्विजानते। देवानां ह्येतद्भवति स्वामी हि फलमश्नुते। नास्वामी कर्म कुर्वीय इति माध्यन्दिनश्रुतेरित्यार्त्विज्यं मन्यते ॥ ४४ ॥

यत्र यागेषु ऋत्विजामपि फलदर्शनादल्पं फलं प्रजानामपि भवतीत्यौडुलोमिर्मन्यते तदर्थं देवैः क्रियमाणत्वात् ॥ ४५ ॥

तृतीयः स्वपक्षः देवानां श्रावणादिकर्माणि सहकार्यान्तरत्वेन प्रजा विधीयन्ते। यथा प्रजावतो राज्ञः प्रजाः सहकारित्वेन विधीयन्ते। यथा वा आचार्यस्य शिष्याः। दाराश्च च। श्रावणादिदानं देवानां विष्णुना सार्धं चोदितम्। वेदे च तेषां विहितं तत्राचार्यो महत्तरः। विहितः सहकार्यान्तरम् प्रजाः। पाठत्वेन यथा राज्ञी यथा शिष्या गुरोरपि। तस्माच्छुभफलं तासां आचार्याणां महत्तरम्। ततो महत्तरं प्रोक्तं देवानामुत्तरोत्तरमिति ॥ ४६ ॥ ४७ ॥

कुटुम्बी शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधादित्युक्त्वा न च पुनरावर्त्तत इति गृहिणोपसंहारः

मौञ्जवदितरेषामप्युपदेशात्॥ ४९॥

क्रियते तथाऽत्रस्थस्य एवोक्तमत्रमिति न वाच्यम्। यतः कृतकृत्यस्थान देवानपेक्ष्यैवोपसंहारः क्रियते। कृतसा स्त्रोते गृहिणो देवा कृतसो एते यतयोऽथैतेषां न् एवा दायमपयन्ति न वै ते गृहान् विसृजन्त्यरागा अद्वेषा अलोभाः सर्वभोगाः सर्वज्ञाः सर्वकर्तार इति पौढायण श्रुति॥ ४८॥

न चायमहययमिव देवानां देवा एव ब्रह्मचारिणो देवा एव गृहस्था देवा एव वनस्था देवा एव यतयः यथैते मुन एवं सर्ववर्णाः सर्वाश्रमाः सर्वे स्त्रोते कर्म कुर्वन्तीति कौठ रव्यश्रुतौ। यतिवद्दृष्टान्तो नान्येषामप्युपदेशात्॥ ४९॥

एतां विद्यामधीत्य ब्रह्मदर्शीवाव भवति स एत मनुष्येषु विब्रूयात् यथा यथाह वै ब्रूयात् तथा तथाधिकं भवतीति माठरश्रुतौ विद्यादानं श्रूयते। तच्च बहून् स्वीकरणार्थमाविष्कारेणेति न मन्तव्यं अन्यथायुक्तेः आवि ष्कारे योग्यानामपि स्वीकारापत्तिरप्राप्तिः तच्च निषि मानस्तेनेभ्यो ये अभिद्रुहस्यदे निरामिणो रिपवोऽन्ये गाग्दधुरिति येषां नैतद्वद क्विद्ध नैकं ब्रह्मणस्पतेः ब्रूहि तेभ्यः कदाचित् अथो शमेनोपरता मनसा ये धर्मिणो ब्रूहि तेभ्यः सदानः आदेवास्ता मोदन्ते विषयो इति ब्रह्मस्पते न परैः मान्ना विदुरिति। विद्याह वै ब्राह्मण मार्जगाम गोपाय मां शेवधिष्टेऽहमस्मि। अनार्थिकायानृ- जवे शठाय मास्म ब्रूया ऋजवे ब्रूहि नित्यमिति च॥ ४९॥

अनाविष्कुर्वन्नन्वयात् ॥ ५० ॥

ऐहिकमप्यप्रस्तुत प्रतिबन्धे तद्दर्शनात ॥५१॥

एवं मुक्तिफलानियमस्तदवस्थावधृते स्तदवस्थावधृतेः ॥ ५१ ॥

इति श्रीकृष्णद्वैपायन ब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थ भगवत्पादविरचिते तृतीयाध्यायस्य चतुर्थपादः समाप्तः ।

आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति दर्शनार्थं श्रवणादि विधीयते तत्र दर्शनमैहिकमेव प्रारब्धप्रतिबन्धाभावे युत्वात्मानं मतिपूर्वं छ्युपास्य हैव दृष्टिं परमस्य विन्देत् यद्यारब्धं कर्म निबन्धकं स्यात् प्रेत्यैव पश्येद् योगमेव वान्ववेक्ष्येति सोपर्णश्रुतौ दर्शनात् । अनादिजन्मसम्बन्धं निर्मलं पापपञ्जरम् । या वैश्या सेवया शक्यं तावत् कार्यं न संशयः । यावद्दूरे स्थितो गम्या तावद्गन्तव्यमेव हि । इह जन्मान्तरे वापि तावतैव तु दर्शनं । श्रवणं मननञ्चैव निदिध्यासनमेव च । परे गुरौ च या भक्तिः परिचर्यादिका हरेः । एषा सेवेति सम्प्रोक्ता यया तद्दर्शनं भवेदिति च तद्वसंहितायाम् ॥५०॥

एवमेव प्रारब्धः कर्माभावे शरीरपातानन्तरमेव मोचं-साद्भावे जन्मान्तरानित्यनियमः । धर्मो स्वर्गं विधर्मो

अथ चतुर्थोऽध्यायः ।

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

लिङ्गाच्च ॥ २ ॥

नियमेत्येव ब्रह्मसंस्थो, मृतमेत्येव ब्रह्मसंस्थो मृतमेत्ये-वेति ब्रह्मसंस्थस्य मोक्षस्यैवावधारणात् । विद्वानमृत-माप्नोति नात्र कार्या विचारणा । अवशन्दं यदारब्धं कर्म तत्रैव गच्छति । न चेह बहूनि जन्मानि प्राप्यैवान्ते न संशय इति नारायणाध्यात्मे ॥ ५१ ॥

इति श्रीमत्पादपानकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभग-वत्पादविरचिते तृतीयाध्यायस्य चतुर्थः पादः समाप्तः
समाप्तश्च तृतीयोऽध्यायः ।

फलं निगद्य तस्मिन् अध्याये । कर्मणा साध्यं फल-मस्मिन् पादे निश्चयः कार्या सर्वथा भाव्यं साधन प्रथमत उच्यते । प्राचिकलाचाध्यायानां पादानाञ्च न विरोधः । आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निध्यासितव्य इत्यादिना अग्निष्टोमादियष्टैकवारैणैव फलप्राप्तिः किन्त्वा-वृत्तिः कर्त्तव्या स य एषोऽणिमैतदात्म्यमिदं सर्वमित्याद्य-स कृदुपदेशात् ॥ १ ॥

स तपोऽतप्यत पुनरेव वरुणं पितरमुपससारेत्यादा-वर्णनलिङ्गाच्च निश्चयः श्रवणञ्चैव मननं ध्यानमेव वा । कर्त्तव्यमेव पुरुषैर्ब्रह्मदर्शनमिच्छुभिरिति बृहत्तन्त्रे ॥ २ ॥

आत्मेतितूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

न प्रतीकेन हि सः ॥ ४ ॥

ब्रह्म दृष्टिरुत्कर्षात् ॥ ५ ॥

आत्मेत्यु पदेश उपासनञ्च मोक्षार्थिभिः सर्वदा कार्य्य-मेव नान्यं विचिन्तय आत्मान मेवाहं विजानीया मात्मानं ह्युपासि आत्माद्धि ममैष भवतीत्यन्यापगच्छसि आत्मात्वे-वोपास्व आत्मन्येव विजानीहि नान्य किञ्चन विजानता आत्मा ह्येष भवतीति ग्राहयन्ति च। आत्मेत्युपास्न कार्य्यं सर्वैव मुमुक्षुभिः नानात्मेशसमायुक्तोप्येतावन्नैव विस्मरेदिति भविष्यत् पर्वणि। आत्मा विष्णुरिति ध्यान विशेषतः। सर्वपाञ्च मुमुक्षुणा मुपदेशश्च तादृशः। कर्त्तव्यो नास्य नानेन कस्यचिन्मोक्ष इष्यत इति ब्राह्मे ॥ ३।

नाम ब्रह्मेत्युपासीतेत्यादिना शब्दभ्रान्त्या न प्रातीके ब्रह्म दृष्टिः कार्य्या किन्तु तत्स्थत्वेनैवोपासनं कार्य्यं ब्रह्म-तर्के च नामादिप्राणपर्य्यन्तमुभयोः प्रथमात्वतः। ऐक्य-दृष्टिरिति भ्रान्तिरबुधानां भविष्यति। नामादि स्थिति-रेवात्र ब्रह्मणो हि विधीयते। सर्वथा प्रथमा यस्मात् सप्तम्यर्थात् ततो मतेति ॥ ४ ॥

ब्रह्मदृष्टिः सर्वथा कार्य्यैव परमेश्वरे उत्कृष्टत्वात्। ब्रह्मदृष्ट्या सदोपास्यो विष्णुः सर्वैरपि ध्रुवम्। महत्त्ववाचो शब्दोऽयं महत्त्वज्ञानमेव हि। सर्वतः प्रीतिजनकमतस्तत् सर्वथा भवेत्। आत्मेत्येव यदोपास्या तदा ब्रह्मत्वसं-

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

आसीनः सम्भवात् ॥ ७ ॥

ध्यानाच्च ॥ ८ ॥

यता। कार्य्यैव सर्वथा विष्णौ ब्रह्मत्वं न परित्यजेदिति ब्रह्मतर्के ॥ ५ ॥

चक्षोः सूर्य्योऽजायते त्याद्युपासनं च देवानां कार्य्यमेव स्वोत्पत्तिस्थानत्वात् धाम्य त्वात् मुक्तौ तत्र लयस्थापिनि-तत्वाच्चोपपन्नं तेषां तयोपासनम्। नारायणतन्त्रे च। आधिव्याधि निमित्तेन विच्छिन्नमनसोऽपि तु। गुणानां स्मरणं शक्तौ विष्णोर्ब्रह्मत्वमेव तु। मार्त्तव्यं सततं तत्तु न कदाचित् परित्यजेत्। अत सर्वगुणानाञ्च यतोऽन्तर्भाव इष्यते। स्वोत्पत्त्यङ्गञ्च देवानां विष्णोश्चिन्त्यं सदैव तु। तेषां तत्र प्रवेशो हि मुक्तिरित्युच्यते बुधैः। तदाश्रि-ताश्च ते नित्यं ततश्चिन्त्या विशेषत इति ॥ ६ ॥

सर्वदोपासनं कुर्वन्नप्यासीनो विशेषतः। कुर्य्यात्तदा वसन विक्षेपाल्पत्वेन हि सम्भवात ॥ ७ ॥

स्मरणोपासनञ्चैव ध्यानात्मकमिति द्विधा। स्मरण सर्वदा योग्यं ध्यानोपासनमासने। नैरन्तर्य्यं मनोवृत्ति-र्ध्यानमित्युच्यते बुधे। आसीनस्य भवेत् तत्र न शयानस्य निद्रया। स्थितस्य गच्छतो वापि विक्षेपस्यैव सम्भवात्। स्मरणात् परम ज्ञेयं ध्यानं नास्त्यत्र संशयः। इति नारा-यणतन्त्रे। अतो ध्यानत्वाच्च ॥ ८ ॥

अचलत्वञ्चापेक्ष्य ॥ ९ ॥

स्मरन्ति च ॥ १० ॥

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

आप्रायणात् तत्रापि हि दृष्टम् ॥ १२ ॥

अचल चेच्छरीरं स्यात् मनसश्चाप्यचालनम्। चलने तु शरीरस्य चलनं हि मनो भवेदिति ब्रह्माण्डे ॥ ९ ॥

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः। सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् इत्यादि ॥ १० ॥

देशकालावस्थादिषु यत्रैकाग्रता भवति तत्रैव स्यात-व्यम्। तमेव देशं सेवेत तं कालं तमवस्थितम्। तानेव भागान् सेवेत मनो यत्र प्रसीदति। नहि देशादिभिः कश्चिद्विशेषः समुदीरितः। मनःप्रसादनार्थं हि देशका-लादिचिन्तनम्। इति वाराहे ॥ ११ ॥

यावन्मोक्षस्तावदुपासनादिकं कार्य्यं स यो ह वै तद्भ-गवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीतेति श्रुतिः। सर्व-दैनमुपासीत यावद्विमुक्तिः मुक्ता अपि ह्येनमुपासत इति सौपर्णश्रुतिः। श्रवणाद्यावदज्ञानं मतिर्य्यावदयुक्तता। ध्यानञ्च यावद्दोषाः स्यात्तेषां क्वचन बाध्यते। दृष्टतत्त्वस्य च ध्यानं यदा दृष्टिर्न विद्यते। भक्तिस्त्वनन्तकालीना परमे ब्रह्मणि स्फुटा। स्वाविमुक्तेर्विधिर्नित्यं स्वत एव ततः पर-मिति ब्रह्माण्डे ॥ १२ ॥

तदधिगम उत्तर पूर्वाघ्रयोरश्लेषविनाशौ तद्व्यपदेशात ॥ १३ ॥

इतरस्याप्येवमसंश्लेषः पाते तु ॥१४॥

अनारब्ध कार्य्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

अग्निहोत्रादि तु ततकार्य्यायैव तद्दर्शनात ॥१६॥

ब्रह्मदर्शन उत्तराघस्याश्लेषः पूर्वाद् यस्य विनाशय। तद्यथा पुष्कर पलाश आपो न श्लिष्यन्त एवमेवं विदि पाप कर्म्मणेव श्लिष्यते तद्यथैषीका तूलमग्नौ प्रोतं प्रदूयेतैवं हैवास्य सर्वे पाप्मानः प्रदूयन्त इति तद्व्यपदेशात ॥ १३

पुण्यस्याप्येवमश्लेषः। तुशब्दोऽनुत्थानवाची। यथा श्लेषा विनाशय मुक्तस्य तु विकर्षणः। एवं सुकर्म्मण्यापि पततस्तमभिप्लुवमिति चाग्नेये। १४।

अनारब्धकार्य्ये एव पूर्वे पुण्यपापे विनश्यतः। तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्यत इति तदवधेः। तुशब्दः श्रुतिद्योतकः। यदनारब्धपापं स्यात्तद्विनश्यति नियमात्। पश्यतो ब्रह्मनिर्द्वन्द्वं हौनश्च ब्रह्मपश्यत.। छिद्यतो वा भवेत् पुण्य नाशो नास्त्यत्र संशयः। तस्याप्यारब्धकार्यस्य न विनाशोऽस्ति कुत्रचित्। आरब्धयोस्तु नाशः स्यादलयोः पुण्यपापयोरिति नारायणतन्त्रे । १५ ।

अग्निहोत्राद्यपि मोक्षानुभवायैव। तुशब्दाद् ब्रह्मदर्शनवतः स एनमाविदितेन भुनक्ति यथा वेदो वा नष्ट

अतोऽन्यत्रापि ह्येकेषामुभयोः ॥ १७ ॥

यदेव विद्ययेति हि ॥ १८ ॥

भोगेन त्वितरे क्षपयित्वा सम्पद्यते ॥ १९ ॥

इति श्रीमत्कृष्णद्वैपायनकृत ब्रह्मसूत्रभाष्ये
श्रीमदानन्द तीर्थ भगवत् पाद
विरचिते चतुर्थाध्यायस्य
प्रथमः पादः समाप्तः ।



वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

अतएव च सर्वाण्यनु ॥ २ ॥

च । यत्प्रसादं कृतो धर्मो अभिज्ञानवतो महान् । महा नपि कृतो धर्मो ह्यज्ञाना निष्फलो भवेत् इति च भारते ॥ १८ ॥

आरब्धपुण्यपापे भोगेन क्षपयित्वा ब्रह्म संपद्यते । अथेति नियमसूचकः । आरब्धपुण्यापापस्य भोगेन क्षय-यादनुप्राप्त्यैव तमोघोरं ब्रह्म वा नान्यसंशय । ब्रह्मणा शतकालात्तु पूर्वमारब्धसंचयः । नियतेन भवेन्नात्र कार्या काचिद्विचारणा । इति नारायणतन्त्रे । १८ ॥



देवानां मोक्ष उत्क्रान्तिर्यास्मिन् उच्यते । वागभि-मानिन्युमा मनोभिमानिनि रुद्रे विलीयते । वाचो मनो-शब्दत्वदर्शनात् । तस्य यावन्न वाङ्मनसि सम्पद्यत इति शब्दाच्च । उमा वै वाक् समुद्दिष्टा मनो रुद्र उदाहृतः । तदे-तन्मिथुनं ज्ञात्वा न दाम्पत्याद्वि हीयत इति स्कान्दे ॥१॥

अतएव चशब्दात् सर्वाणि दैवतानि यथानुकूलं विलीयन्ते अग्नौ सर्वे देवा विलीयन्ते अग्नि- उमायां उमा रुद्रे विलीयते । एवमन्यानि दे- नुकूलमिति गोपवनश्रुतिः ॥ २ ॥

तन्मनः प्राण उत्तरात् ॥ ३ ॥
सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥
भूतेष्वतः श्रुतेः ॥ ५ ॥
नैकस्मिन् दर्शयतो हि ॥ ६ ॥

मनः प्राण इत्युत्तराद्वचनान्मनोऽभिमानी रुद्रः प्राणे वायौ विलीयते वायोर्वाव रुद्र उदेति वायौ विलीयते तस्मादाहुर्वायुर्देवानां श्रेष्ठ इति कौण्डिन्यश्रुतिः ॥ ३ ॥

स प्राणः परमात्मनि विलीयते सर्वे प्राणमुपगच्छन्ति प्राणं देवा अनुप्राणन्ति प्राणः परमनुप्रायीति तस्मादाहुः प्राणस्य प्राण इति । प्राणः परस्या देवताया भक्ताः सन्तोऽग्निमाविश्य देवाः सर्वेऽपि भुञ्जते । अग्निरिन्द्रं तथेन्द्रश्च वायुमाविश्य सोऽपि तु । आविश्य परमात्मानं भुंक्ते भोगांस्तु बाह्यकान् । नह्यानन्दो निजस्तेषां परेभ्यः कथञ्चन । किमु विष्णोः परानन्दो न ते विष्णाविति श्रुतेः । प्राणस्य तेजसि तमो नामैमात्रमुदाहृतम् । सर्वेषितुश्च सर्वादेस्तस्यान्यत्र लयः कथम् । इत्यादि श्रुतिस्मृतिभ्यः ॥ ४ ॥

भूतेष्वन्येषां देवानां लयः । भूतेषु देवा लीयन्ते भूतानि परेण परं उदेति नास्तमेत्येकल एव मध्ये स्थातेति बृहच्छ्रुतेः ॥ ५ ॥

नैकस्मिन् भूते सर्वेषां देवानां लयः पृथिव्यां नभवो देवाः विलीयन्ते वरुणेऽश्विनावग्नावग्नयो वायाविन्द्रः सोम आदित्यो बृहस्पतिरित्याकाश एव साध्या विलीयन्ते ऋभवः पृथिव्यां वरुण आपोऽग्नयस्तेजसि मरुतो मारुते

समानाचाल्युपक्रमाद मृतत्वं चानुपोष्य ।।७॥
तदपीते: संसारव्यपदेशात् ॥ ८ ॥
सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥
नोपमर्द्दनातः ॥ १० ॥

आकाशे विनायका विलीयन्त इति महोपनिषच्चतुर्वेदशिखायाञ्च दर्शयतः । अतोऽग्नौ सर्वे देवा विलीयन्त इत्यव निर्द्दिष्टानामेव ॥ ६ ॥

देशतः कालतश्च व्याप्त्या समो नापरमः परया यस्याः सा समाना संसारानुपक्रमात् स्वत एवामृतत्व तस्याः बृहच्छ्रुतिश्च द्वो वावस्त्वनुपक्रमो । प्रकृतिश्च परमश्च द्वावेतौ नित्यमुक्तौ नित्यौ च सर्वगतौ एतौ ज्ञात्वा विमुच्यत इति नेतावता साम्यम् ॥ ७ ॥

समावेतौ । प्रकृतिश्च परमश्च नित्यौ सर्वगतौ नित्यमुक्तावसमावेतौ प्रकृतिश्च परमश्च विलीनौ हि प्रकृतौ ससारमेति विलोनः परमेश्वमृतत्वमेतोति सोपर्णश्रुतिः ॥ ८॥

सूक्ष्मत्वं बाधिक ब्रह्मणः प्रकृतेः ज्ञानानन्दैश्वर्यादिप्रमाणाधिक्यच्च । सर्वत. प्रकृतिः सूक्ष्मा प्रकृतेः परमेश्वरः । ज्ञानानन्दौ तथैश्वर्यं गुणाश्चान्ये ऽधिकाः प्रभोरिति हि चतुरश्रुतिः ॥ ९ ॥

अतस्तस्य ये विशेषगुणास्तेषामनुपमर्द्दनेनैव साम्यम् । देशतः कालतश्चैव समा प्रकृतिरोश्वरे । उभयोरप्य बहुत्वं स्वद्वन्द्व. परात्मनः । स्वत एव परेशस्य सर्वोपाद्यो सदा

अस्यैव चोपपत्तेरेष उष्मा ॥ ११ ॥

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

स्पष्टो ह्येकेषाम् ॥ १३ ॥

हरिम् । प्रकृतेः प्रकृतस्यापि ये गुणास्ते तु विष्णुना । नियतानेव केनापि नियता हि हरेर्गुणा इति भविष्यत्पर्वणि ॥ १० ॥

द्विधाह्येदनवद्यस्य तदुभावदनुभावश्च । तत्रोभावत् परं ब्रह्म यत्र जिघ्रन्ति न पश्यन्ति न शृण्वन्ति न विजानन्ति अथानुभावत् प्रकृतिश्च प्राकृतं च यत्र जिघ्रन्ति जिघ्रन्ति च यत्र पश्यन्ति पश्यन्ति च यत्र शृण्वन्ति शृण्वन्ति च यत्र जानन्ति जानन्ति चेति सौपर्णश्रुतेः । किञ्चित् साम्यापपत्तेः ॥ ११ ॥

असमो वा एष परमो न हि कश्चिदेवं दृश्यते । सर्वे ह्येतेऽथवो जायन्ते च म्रियन्ते च छिद्रा ह्येते भवन्त्यथ परा न जायते न म्रियते पूर्णैव भवतीति चतुर्वेदशिखायां साम्य प्रतिषेधादिति चेत् न शरीराद्धि साम्यं प्रतिषिध्यते ॥ १२ ॥

कुतः अथातः समाश्च समाश्चाभिधीयन्ते । समासमाश्च समानि ब्रह्मणो रूपाणि यैरुत्पत्तिस्थितिलयौ नियतिरायतिश्चैकं ह्येवैतद्ब्रह्मन्यथा समाब्रह्मेन्द्रो रुद्रः प्रजापतिर्बृहस्पतिर्ये केचन देवगन्धर्वा मनुष्याः पितरोऽसुरा यत् किञ्चेदं चरन् अचरच्चाथ समाऽसमा प्रकृतिर्वाव समासमा एषा हि नित्याजरा तद्वशा चेति स्पष्टो हि माध्यन्दिनानां समादिवादः ॥ १३ ॥

स्मार्य्यते च ॥ १४ ॥

तानि परे तथा ह्याह ॥ १५ ॥

अविभागो वचनात् ॥ १६ ॥

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्द्दानुगृहीतः शताधिकया ॥ १७ ॥

मत्स्यकूर्म्मवराहाद्याः समा विष्णोरभेदतः। ब्रह्माद्यस्त्वसमाः प्रज्ञाः प्रकृतिश्च समासमा इति वाराहे ॥ १४ ॥

प्राणद्वारेण सर्वाणि दैवतानि परमात्मनि विलीयन्ते सर्वे देवाः प्राणमाविश्य देवे मुक्तालयं परमे यान्त्य चिन्त्य इति कौषारवश्रुतिः ॥ १५ ॥

एते देवा एतमात्मानमनुविश्य सत्यासत्यकामाः सत्यसंकल्पाः यथा काममन्तर्वहिः परिचरन्तीति गोपवनश्रुतिः। तत्र परमेश्वर कामाद्य विभागेनैव तेषां सत्यकामत्वं कामेन मे काम आगाद्धृदयाद्धृदयं मृत्योरिति वचनात। मुक्तानां सत्यकामत्व सामर्थ्यञ्च परस्य तु। कामानुकूल कामत्वं नान्यथैषां विधीयत इति ब्राह्मे ॥ १६ ॥

उत्क्रान्ति काले हृदयस्याग्रज्वलनं भवति तस्य हैतस्य हृदयस्याग्रं प्रद्योतत इति श्रुतेः। तत् प्रकाशितद्वारो निष्क्रामति विद्यासामर्थ्यात् यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तन्तमेवेति कौन्तेय सदा तद्भावभावित इति स्मृतेः विद्याशेषगत्यनुस्मरणयोगाच्च। आचार्य्यस्तुते

रश्म्यनुसारी ॥ १८ ॥

निशि नेति चेन्न सम्बन्धात् ॥ १९ ॥

यावद्देहभावित्वाद्दर्शयति च ॥ २० ॥

अतश्चायनेऽपि हि दक्षिणे ॥ २१ ॥

गति वक्तीति लिङ्गम् । हृदिस्थेनैव हरिणा तस्यैवानुग्रहेण तु उत्क्रान्तिर्ब्रह्मरन्ध्रेण तमेवोपासतो भवेदिति चाध्यात्म्ये शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका तयोर्द्धमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्तीति च ॥ १७ ॥

निष्क्रामति सहस्रं वा आदित्यस्य रश्मयः आसुनाडीवा ततास्तत्र स्थित. सुपुम्नो ब्रह्मयानः सुपुम्नायामो ततस्तत् प्रकाशेनेव निर्गच्छतीति हि पौत्रायण श्रुतिः ॥ १८ ॥

रश्म्यभावान्निशि ज्ञानिन उत्क्रमण न युक्तमिति चेत् न सर्वदा सम्बन्धाद्रश्मीना कियत् कालम ॥ १९ ॥

यावद्देही विद्यते तावद्रश्मिसम्बन्धोऽस्त्येव सस्टा वा एते रश्मयश्च नाड्यश्च नैषां वियोगो यावदिदं शरीरमत एते पश्यत्येतैरुत्क्रामत्येते. प्रवर्त्तन्त इति माध्यन्दिनश्रुतिः ॥ २० ॥

दक्षिणे मरणं याति स्वर्गं ब्रह्मोत्तरायण इत्युक्तोऽपि ज्ञानिनो दक्षिणायनोत्क्रान्तिर्युज्यते । शतं पञ्चैव सूर्यस्य दक्षिणायन रश्मय. । तावन्त एव निर्दिष्टा उत्तरायण रश्मयः । ते सर्वे देहसम्बन्धाः सर्वदा सर्वदेहिनाम

योगिन: प्रति च स्मर्य्यते स्मार्त्ते चैते ॥ २२ ॥

इति श्रीकृष्णद्वैपायनब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादविरचिते चतुर्थाध्यायस्य द्वितीयपादः समाप्तः।

महर्लोकादिगन्तार उत्तरायणरश्मिभिः। निर्गच्छन्तोऽतरेणापि येऽष्टयेतरा गतिः। उत्तरं दक्षिणमिति त एव तु निगद्यते न तु कालविशेषोऽस्ति ज्ञानिनां नियमात् फलम्। ददाति कालेऽनुगुणे फलं किञ्चिद्विशिष्यते। अस्युत्तमानां केषाञ्चिन्न विशेषोऽस्ति कालत इति च नारायणाध्यात्मे। २१।

न केवलं कालादिकृते ब्रह्मचन्द्रगतौ स्मर्य्यते किन्तु ज्ञानयोगिनः कर्म्मयोगिनश्च।

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः। धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्। तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्त्तत इति। अत्र योगीति विशेषणात् स्मरणनिमित्ते चैते गतौ गत्यनुस्मरणाद् ब्रह्म चन्द्रं वा गच्छति ध्रुवम्। अनुस्मरन्नतः काले स्मरणं प्राप्य वै गतिरिति चाध्यात्मे। २२।

इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादविरचिते चतुर्थाध्यायस्य द्वितीयपादः समाप्तः।

अर्चिरादिना तत् प्रथितेः ॥ १ ॥

वायुशब्दादविशेषविशेषाभ्याम् ॥ २ ॥

तडितोऽधिवरुणः सम्बन्धात् ॥ ३ ॥

मार्गो गम्यं चास्मिन् पाद उच्यते । तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह आपूर्य्यमाणपक्षमित्यर्चिषः प्राथम्य श्रूयते। यथाह वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छतीति वायोः। तत्रार्चिषप्राप्तिरेव प्रथमा । द्वावेव मार्गौ प्रथितावर्चिरादिर्विपर्ययिताम्। धूमादिः कर्म्मिणाश्चेव सर्ववेदविनिर्णयात्। अग्निर्ज्योतिरिति। इत्येवार्चिषः संप्रतिष्ठितः। अग्निर्गत्वा ज्योतिरेति प्रथमं ब्रह्म संव्रजचिति। एकस्मिंस्तु परे संस्थो हिरूपोऽग्नेः सुतो महानिति ब्रह्मतर्के ॥ १ ।

अर्चिषो वायुं गच्छति स वायुमागच्छतीति सामान्यवचनात्। स इतो गतो द्वितीयां गतिं वायुमागच्छतिवायोरहरह आपूर्य्यमाणपक्षमिति विशेषवचनाच्च ॥ २ ॥

मासेभ्यः संवत्सरं संवत्सराद्वरुणलोकं वरुणलोकात् प्रजापतिलोकम् इति कौशिकश्रुतिः। संवत्सरात्तडितमागच्छतितडितः प्रजापतिलोकमिति गोपवनश्रुतिः। तत्र तडितो वरुणं गच्छति तडिता ह्यते वरुणलोकस्तडिदुपरि मुक्तामयो राजते। तथासौ वरुणो राजा सत्यावृते विचिन्वतीत्युपरि सम्बन्धश्रुतिः ॥ ३ ॥

आतिवाहिकस्तल्लिङ्गात् ॥ ४ ॥

उभयव्यामोहात्तत्सिद्धेः ॥ ५ ॥

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ६ ॥

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ७ ॥

पूर्वोक्तस्त्वातिवाहिको वायुः पूर्वगमनलिङ्गात् ॥ ४ ॥

कुतः स वायुमागच्छतीति प्रथममुच्यते। उत्क्रान्तो विद्वान् परममभिगच्छन् विद्युतमेवान्तत उपगच्छति। द्यौर्वाव विद्युतस्तत्पतिं वायुमुपगम्य तेनैव ब्रह्म गच्छतीत्यन्तेऽपि वायुगमनश्रुतेः। पूर्वोक्तः आतिवाहिक परो वेति व्यामोहे उत्तरे दिवसपतिरिति विशेषणात् पूर्वोक्तातिवाहिकस्यैव श्रुति सिद्धेः। ब्रह्मतर्के च। उत्क्रान्तस्तं शरीरात् स्वात् गच्छत्यर्चिषमेव तु। ततो हि वायोः पुत्रश्च योऽसौ नाम्नातिवाहिकः। ततोऽहः पूर्वपक्ष चाह्युदक् संवत्सरं तथा। तडितं वरुणञ्चैव प्रजेशं सूर्यमेव च। सोमं वैश्वानरं चेन्द्रं ध्रुवं देवीं दिवं तथा। ततो वायुं परं प्राप्य तेनैति पुरुषोत्तममिति ॥ ५ ॥

प्रकारान्तरेण तत्र तत्रोच्यमानत्वाद्वायोरपि परतो ब्रह्मणोऽर्वाग् गन्तव्योऽस्तीति नाशङ्कनीयं विद्युत्पतिना वायुनैव स एतान् ब्रह्म गमयतीति ब्रह्मगमनश्रुतेः। विद्युत्पतिर्वायुरेव नयेद्ब्रह्म न चापरः। कुतोऽन्यस्य भवेच्छक्तिस्तमृते प्राणनायकमिति ब्रह्मतत्त्वे ॥ ६ ॥

स एवाप ब्रह्म गमयतीति कार्यं ब्रह्मगमयतीति

विशेषितत्वाच्च ॥ ८ ॥

सामीप्यात्तु तद्व्यपदेशः ॥ ९ ॥

कार्य्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ १० ॥

स्मृतेश्च ॥ ११ ॥

परं जैमिनिर्मुख्यत्वात् ॥ १२ ॥

बादरिर्मन्यते। ऋते देवात् परं ब्रह्म कः पुमान् प्राप्नुयात् क्वचित्। यद्यपि ब्रह्मदृष्टिः स्यादब्रह्मलोकमवाप्नुयादित्यध्यात्मवचनात्। तस्यैव गत्युपपत्तेः। ७॥

यदिह वा परमभिपश्यति प्राप्नोति ब्रह्माणं चतुर्मुखमिति कौषारवश्रुतेः। ८।

ब्रह्मविदाप्नोति परमिति तद्व्यपदेशस्तत्समीप एव परमपि प्राप्नोतीत्यतदर्थमेव। ९।

कटित्वत आहुते हि ब्रह्मणा अभि सम्पद्य यदेतद्विलीयतेऽथ सह ब्रह्मणा परमभि गच्छतीति सौपर्णश्रुतेर्महाप्रलये तदध्यक्षेण ब्रह्मणा सह गच्छति ॥ १० ॥

ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते परात्मानः प्रविशन्ति परं पदमिति च ॥ ११ ॥

ब्रह्मशब्दस्य तत्रैव मुख्यत्वात् परमेव ब्रह्म गमयतीति जैमिनिर्मन्यते। १२।

दर्शनाच्च ॥ १३ ॥

न च कार्य्ये प्रतिपत्त्यभिसन्धिः ॥ १४ ॥

अप्रतीकालम्बनान्नयतीति स बादरायण उभ-
यथा च दोषात्तत् क्रतुश्च ॥ १५ ॥

दृष्टत्वाच्च परब्रह्मणः ॥ १३ ॥

न हि कार्य्ये प्रतिपत्तिः प्राप्तवान् इत्यभिसन्धिश्च। यदुपास्ते पुमान् जीवन् यत् प्राप्तुमभिवाञ्छति। यच्च पश्यति दृष्टः संस्तत् प्राप्नोति न्तरेर्न्विति पाद्मे ॥ १४ ॥

प्रतीकं देह इद्दिष्टो येषां तत्रैव दर्शनमट। न तु व्याप्ततया क्वापि प्रतीकालम्बनास्तु ते। अप्रतीका देवतास्तु ऋषीणां शतमेव च। राज्ञाञ्च शतमुद्दिष्टं गन्धर्वाणां शतं तथा। एतेऽधिकारिणोऽव्यामिदं र्शनेऽन्ये न तु क्वचित्। अयोग्यदर्शने यस्मादृभ्रंशः पूर्वस्य चापि तु। अप्रतीकाश्रया वै हि ते यान्ति परमेव तु। स्वदेहे ब्रह्मदृष्ट्यैव गच्छेद्ब्रह्म स लोकताम्। ब्रह्मणा सह संप्राप्ते संहार परमं पदमिति गारुड़वचनात्। उभयथोक्तदोषात् प्रतीकालम्बनात् परं नयति। स यथा कामो भवति तत् क्रतुर्भवति यत् क्रतुर्भवति तत् कर्म्म कुरुते यत् कर्म्म कुरुते तदो संपद्यत इति श्रुतेश्च। अत्र कर्मोपासनमेव अन्यान् कार्य्यं नयतीति भगवन्मतम् ॥ १५ ॥

विशेषञ्च दर्शयति ॥ १६ ॥

इति श्रीकृष्णद्वैपायनब्रह्मसूत्रभाष्ये श्रीमदा-
नन्दतीर्थभगवत्पादविरचिते चतुर्थाध्यायस्य
तृतीयपादः समाप्तः ।

सम्पद्याविर्भावः स्वेन शब्दात् ॥ १ ॥

अन्तःप्रकाशाद्बहिःप्रकाशा. सर्वप्रकाशादेव च सर्व प्रकाशा ऋषयोऽन्तःप्रकाशा मनुष्या एव हि बहिःप्रकाशा इति चतुर्वेदशिखायाम् ॥ १६ ॥

इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदा-
नन्दतीर्थभगवत्पादविरचिते चतुर्थाध्यायस्य
तृतीयपादः समाप्तः ।

भोगमात्राभिन पाटे स एवं विदेरमन्वान' एवं प्रा- यायानमभिस्म्पद्येत तेनात्मना यथा कामं सर्वान् ... नमभवतीति सौपर्णश्रुते. परं ज्योतिरुपसम्पद्य ... पामितिष्ठत इति च। एव सेतुं तीर्त्वान्ध' ... भवतीति च तत्र तरपम् नाम तत् प्राप्येऽमानाश्रीर ... इमां घोरामशिवां नदीं तीर्त्वा सेतुमाप्यति सेव ... मोदते प्रमोदत आनन्दी भवतीति मोदश्रुतेः ...

मुक्तः प्रतिज्ञानात् ॥ २ ॥

आत्मा प्रकरणात् ॥ ३ ॥

अविभागेनैव दृष्टत्वात् ॥ ४ ॥

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

मुक्त एव चालोच्यते । यदरहरेन मनु प्रविशत्युप संक्रमते च न तत्र मोदते । न प्रमोदते न कामाननुभवति वहो ह्येष तदा भवत्यथ यथैनं मुक्तो ऽनुप्रविशति मोदते प्रमोदते च कामांश्चैवान् भवतीति बृहच्छ्रुतौ च प्रतिज्ञानात् ॥ २ ॥

परं ज्योतिःशब्देन परमात्मैवोच्यते तत्प्रकरणत्वात् परं ज्योतिः परं ब्रह्म परमात्मादिका गिरः । सर्वत्र हरिमेवैकं ब्रूयुर्नान्यं कथञ्चनेति ब्रह्माण्डे ॥ ३ ॥

ये भोगाः परमात्मना भुज्यन्ते त एव मुक्तैर्भुज्यन्ते यानेवाहं शृणोमि यान् पश्यामि यान् जिघ्रामि तानेवे दं शरीरं विमुच्यानुभवन्तीति दृष्टत्वाच्चतुर्वेदशिखायाम् भविष्यत्पुराणे च । मुक्ताः प्राप्य परं विष्णुं तद्भोगान् गतः क्वचित् । वहिष्ठान् भुञ्जते नित्यं नानन्दादीन् कथञ्चनेति ॥ ४ ॥

सर्वदेहपरित्यागेन मुक्ताः मन्तो ब्राह्मेणैव देहेन भोगान् भुञ्जत इति जैमिनिः [illegible] वा एष ब्रह्मणि इदं शरीरं मत्यमभिसृज्य ब्रा[illegible] ब्रह्मणा ब्रह्मणा शृणोति ब्रह्मणैवेदं [illegible]

चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

सङ्कल्पादेव तु तच्छ्रुतेः ॥ ८ ॥

न च्युता ह्युपन्यासात् । आदत्ते हरिहस्तेन हरिदृष्ट्यैव पश्यति । गच्छेच्च हरिपादेन मुक्तस्यैषा भवेत् स्थितिरिति स्मृतेः । गच्छामि विष्णुपादाभ्यां विष्णुदृष्ट्या तु दर्शनम् । इत्यादि पूर्वस्मरणा स्मरणान्मुक्तस्यैतद्भविष्यतीति हृद्यत्तन्वोक्तियुक्तेश्च ॥ ५ ॥

चितिमात्रो देहो मुक्तानां पृथग्विद्यते तेन भुञ्जते । सर्वं वा एतदचित् परित्यज्य चिन्मात्र एवावतिष्ठते तामेतां मुक्तिरित्याचक्षत इत्युद्दालक श्रुतेश्चिदात्मकत्वादित्यौडुलोमिर्मन्यते ॥ ६ ॥

स वा एष एतस्मान्मुक्त्यां हि मुक्तश्चिन्मात्रो भवति अथ तेनैव रूपेणाभिपश्यत्यभिशृणोत्यभिमनुतेऽभिजानाति तामाहुर्मुक्तिमिति सौपर्णश्रुतौ चिन्मात्रेणाप्युपन्यासाज्जेमिन्युक्तस्य च भावादुभयदर्शनाविरोधं बादरायणो मन्यते नारायणाध्यात्मे च । मत्त्यं देहं परित्यज्य चितिमात्रात्मदेहिनः । चितिमात्रेन्द्रियाश्चैव प्रविष्टा विष्णुमव्ययम् । तदाज्ञानुगृहीतैश्च स्वाङ्गैरेव प्रवर्त्तनम् । कुर्वन्ति भुञ्जते भोगांस्तदनु बहिरेव वा । यथेष्टं परिवर्त्तन्ते तस्यैवानुग्रहेरिता इति ॥ ७ ॥

विकारावर्त्ति च तथा हि स्थितिमाह ॥ २० ॥
दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २१ ॥

सामीप्यं योग एव च। इदमारभ्य सर्वत्र यावत् सुचोर मागरम्। पुरुषोऽनन्तशयनः श्रीमन्नारायणाभिधः। मानुषा वर्णभेदेन तथैवाश्रमभेदतः। भूपा मनुष्या गन्धर्वा देवाश्च पितरश्चिराः। अज्ञानजाः कर्मजाश्च तात्त्विकाश्च शचीपतिः। रुद्रो ब्रह्मेति क्रमशः स्तेषु चैवोत्तमोत्तमाः। नित्यानन्दे च भोगे च ज्ञानैश्वर्यं गतेषु च। सर्वे शतगुणोद्रिक्ताः पूर्वस्मा दुत्तरोत्तरम। पूज्यन्ते च वरैस्तेतु सर्वैः पूज्यचतुर्मुखः। स्वजगद्व्याप्तिस्तेषां पूर्ववत् समुदीरिताः। सयुजः परमात्मानं प्रविश्य च वहिर्गताः। चिद्रूपान् प्राकृताश्चापि विना भोगां स्तु कांश्चन। भुञ्जते मुक्ति रेवैत विस्पष्टाः समुदीरिता इति ॥ १८ ॥

विकारावर्त्ती व्यापारो मुक्ताना न च विद्यते। इमं मानं मावर्त्तं नावर्तन्त इति श्रुतिः। वारहे च। स्वाधिकारेण वर्त्तन्ते देवा मुक्तावपि स्फुटम्। बलिं हरन्ति मुक्ताय विरिञ्चाय च पूर्ववत्। स ब्रह्मकास्तु ते देवा विष्णवे च विशेषतः। न विकाराधिकारन्तु मुक्तानामन्य एव तु। विकाराधि कृता ज्ञेया ये नियुक्तास्तु विष्णुनेति ॥ २०॥

एतत् साम गायन्नास्त इत्युच्यते। तदानन्दादीनां वृद्धिर्ह्रासश्च न विद्यते। एक-प्रकारेणैव सर्वदा स्थितिः।/ यस्मिन् ब्रह्मादि सम्पन्नो न जायते म्रियते न शोचते

जगद्व्यापारवर्ज्जम् ॥ १७ ॥
प्रकरणादसन्निहितत्वाच्च ॥ १८ ॥
प्रत्यचोपदेशादिति चेन्नाधिकारिकमण्डल-स्थोक्तेः ॥ १९ ॥

दुःखादीन् कदाचन। तीर्थाहि सर्वशोकान्ते पुण्यपापादिवर्ज्जिताः। सर्वदोषनिवृत्तास्ते गुणमात्रस्वरूपिणः इति ॥ १६ ॥

सर्वान् कामानाप्यामृतः समभवदित्युच्यते तत्र सृष्ट्यादिभ्योऽन्यान् व्यापारानाप्नोति ॥ १७ ॥

कुतः। जीवप्रकरणत्वाज्जीवानां तादृक् सामर्थ्यविरुद्धत्वाच्च। वाराहे च। स्वाधिकानन्दसंप्राप्तौ सृष्ट्यादिव्याप्तिष्वपि। भुक्तानां नैव कामः स्यादन्यान् कामांस्तु भुञ्जते। तद्योग्यता नैव तेषां कदाचित् क्वापि विद्यते। न चायोग्यं विमुक्तोऽपि प्राप्नुयान्न च कामयेदिति। १८॥

योविद् स वेद ब्रह्म सर्वस्मै देवा बलिमावहन्तीति प्रत्यचोपदेशात् जगदैश्वर्य्यमप्यस्तीति चेत् न प्राधिकारिकमण्डलाधिपतिर्ब्रह्मा हि तत्रोच्यते। गारुडे च। आत्मत्वेव परं दैवमुपास्य हरिमव्ययम्। केचिदत्रैव मुच्यन्ते नोत्क्रामन्ति कदाचन। अत्रैव च स्थितिं ते मामन्तरीचेष केचन। केचित्स्वर्गे महर्लोके जने तपसि चापरे। केचित् सत्ये महात्मानो गच्छन्ति चोरमागरम्। अत्रापि क्रमयोगेन ज्ञानाधिक्यात् समीपगाः सालोक्यस्य सरूपत्व

विकारावर्त्ति च तथा हि स्थितिमाह ॥ २० ॥
दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २१ ॥

सामीप्यं योग एव च। इदमारभ्य सर्वत्र यावत् सुचीर मागरम्। पुरुषोऽनन्तशयनः श्रीमन्नारायणाभिधः। मानुषा वर्णभेदेन तथैवाश्रमभेदतः। भूपा मनुष्या गन्धर्वा देवाश्च पितरश्चिराः। अज्ञानजाः कर्मजाश्च तात्त्विकाश्च शचीपतिः। रुद्रो ब्रह्मेति क्रमशः स्तेषु चैवोत्तमोत्तमाः। नित्यानन्दे च भोगेच ह्रानैश्वर्य्ये गतेषु च। सर्वे गतगुणोद्रिक्ताः पूर्वस्मा दुत्तरोत्तरम। पूज्यन्ते च वरैस्तेतु सर्वैः पूज्यतनुर्गुणः। स्वजगद्व्याप्तिस्तेषां पूर्ववत् समुदीरिताः। सयुलः परमात्मानं प्रविश्य च वहिर्गताः। चिद्रूपान प्राकृतांश्चापि विना भोगां सु कांश्चन। भुञ्जते मुक्ति रेवैते विस्पष्टाः समुदोरिता इति ॥ १९ ॥

विकारावर्त्ती व्यापारो मुक्तानां न च विद्यते। इमंलान मावर्त्तं नावर्त्तन्त इति श्रुतिः। वारहे च। स्वाधिकारेण वर्त्तन्ते देवा मुक्तावपि स्फुटम्। वलिं हरन्ति मुक्ताय विरिञ्चाय च पूर्ववत्। स ब्रह्मकात् ते देवा विष्णवे च विशेषतः। न विकाराधिकारन्तु मुक्तानामन्य एव तु। विकाराधि कृता ज्ञेया ये नियुक्तास्तु विष्णुनेति ॥ २० ॥

एतत् साम गायन्नास्त इत्युच्यते। तवानन्दादीनां हृद्धिह्रासश्च न विद्यते। एक प्रकारेयैव सर्वदा स्थितिः। स एषः एतस्मिन् ब्रह्मणि सम्बन्धो न जायते म्रियते न चीयते

ज्ञानानन्दादिभिः सर्वगुणैः पूर्णाय विष्णवे ।
नमोऽस्तु गुरवे नित्यं सर्वथाति प्रियाय मे ।
यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलम् ।
भक्त्या दर्शितमित्यमेव निहितं देवस्य भर्गो महत् ।
वायो राम वचो नयं प्रथमकं दृशो द्वितीयं वपु-
र्मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हरौ तेन हि ॥
इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदा-
नन्दतीर्थ भगवत्पादविरचिते चतुर्थाध्यायस्य
चतुर्थपादः समाप्तः समाप्तश्च
चतुर्थोऽध्यायः ।

समाप्तम् ।

প্রিন্টর শ্রীউদয়চরণ পাল।
নং ৩৯ সিবনারায়ণদাস লেন

भोगमात्र साम्यलिङ्गाच्च ॥ २२ ॥

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २३ ॥

न वर्द्धते स्थित एव सदा भवति। दर्शयन्नेव ब्रह्म दर्शयन्देवाम न तस्यैव दर्शयतो न पत्ति नैं विपत्ति नित्याह जाबालि श्रुतौ। यत्र गत्वा न म्रियते यत्र गत्वा न जायते न च्छीयते यत्र गत्वा न वर्द्धते इति मोचधर्मे। विद्वत् प्रत्यक्षात् कारणाभावलिङ्गाच्च। ब्रह्मवैवर्त्तेच। न ह्रासो न च वृद्धिर्वा मुक्तानां विद्यते क्वचित्। विद्वत्प्रत्यक्ष सिद्धत्वात् कारणा भावतोऽनुना। हरेरुपासनाचात्र सदैव सुखरूपिणो। ननु साधनभूता सा सिद्धिनैवात्र साध्यत इति। २१ ॥

न च भोग विशेषादिति विरोधः। एतमानन्दमय मात्मानमनु प्रविश्य न जायते न म्रियते न ह्रसते न वर्द्धते यथाकामञ्चरति यथाकामम्मिवति यथाकामं रमते यथाकाममुपरते इति भोगमात्रसाम्यलिङ्गात्। वृद्धि ह्रास रूपत्वं मुक्तानां प्रायिकं भवेत्। कादाचित्कविशेषस्तु नैव तेषां निषिध्यत इति कौर्मे। प्रवाहतस्तु वृद्धिर्वा ह्रासो वा नैव कुत्रचित्। नाप्रिय किञ्चिदपि तु मुक्तानां विद्यते क्वचित्। कुत एव तु दुःखं स्यात् सुखमेव सदोदितम्। भोगानान्तु विशेषे तु वैचित्र्यं लभते क्वचिदिति नारायणतन्त्रे। २२ ॥

न च पुन रावर्त्तते न च पुन रावर्त्तते सर्वान् कामानप्यमृतः समभवत् समभवदित्यादि श्रुतिभ्यः। २३॥

ज्ञानानन्दादिभिः सर्वैर्गुणैः पूर्णाय विष्णवे ।
नमोऽस्तु गुरवे नित्यं सर्वथाति प्रियाय मे ।
यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलम् ।
भक्त्या दर्शितमित्थमेव निहितं देवस्य भर्गोमहत् ।
वायोरामवचोनय प्रथमकं पृक्षो द्वितीय वपु-
र्मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हरौ तेन हि ॥
इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदा-
नन्दतीर्थं भगवत्पादविरचिते चतुर्थाध्यायस्य
चतुर्थपादः समाप्तः समाप्तश्च
चतुर्थोऽध्यायः ।
समाप्तम् ।

প্রিণ্টর শ্রীউদয়চরণ পাল ।
নং ৩৯ শিবনারায়ণদাস লেন